

Shri Raghunatha Temple MSS. Library,
JAMMU
No. १घ-क-२
Title महाभाष्यम्
Author म. पतञ्जलिः
Extent ५२४ पत्र Age
Subject व्याकरण

नं. १

श्री
म॰
भा॰
१

ॐ स्वस्ति श्रीगणेशाय नमः ॐ नमो भ
गवते वासुदेवाय नमः शेषाहये ॐ अ
थ शब्दानुशासनं ॐ अथेत्ययं शब्दोऽधि
कारार्थः प्रयुज्यते शब्दानुशासनं नाम
शास्त्रमधिकृतं वेदितव्यं केषां शब्दानां
लौकिकानां वैदिकानां च तत्र लौकिका
स्तावत् गौरश्वः पुरुषो हस्ती शकुनिर्मृ
गो ब्राह्मण इति वैदिकाः खल्वपि शन्नो
देवीरभिष्टये इषे त्वोर्जे त्वा अग्निमीडे पु
रोहितं अग्न आयाहि वीतये अथ गौरि
त्यत्र कः शब्दः किं यत्तत्सास्नालाङ्गूलककु
दखुरविषाण्यर्थरूपं स शब्दः नेत्याह द्रव्यं
नाम तत् यत्तर्हि तदिङ्गितं निमिषितं चेष्टि
तं स शब्दः नेत्याह क्रिया नाम सा यत्तर्हि
तच्छुक्लः नीलः कपिलः कपोतः स शब्दः
नेत्याह गुणो नाम सः यत्तर्हि भिन्नेष्व
भिन्नं छिन्नेष्वपि नच्छिन्नं सामान्यभूतं
स शब्दः नेत्याह आकृतिर्नाम सा कस्त
र्हि शब्दः येनोच्चारितेन सास्नालाङ्गूलक
कुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः

अथवा प्रतीतिपदार्थको लोके ध्वनिः शब्द इ
त्युच्यते तद्यथा शब्दं कुरु शब्दं मा कार्षीः
शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नुच्य
ते शब्दकार इति ध्वनिं कुर्वन्नेवमुच्यते त
स्माद्ध्वनिः शब्दः कानि पुनः शब्दानुशा
सनस्य प्रयोजनानि रक्षोहागमलघ्वसं
देहाः प्रयोजनं रक्षार्थं वेदानामध्येयं व्या
करणं लोपागमवर्णविकारज्ञो हि सम्य
ग्वेदान्परिपालयिष्यति ऊहः खल्वपि न
सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा
निगदिताः ते चाव यज्ञगतेनावश्यं यथा
यथं विपरिणमयितव्याः तान्नावैयाकरणः
शक्नोति विपरिणमयितुं तस्मादध्येयं व्या
करणं आगमः खल्वपि ब्राह्मणेन नि
ष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति
प्रधानं च षट्स्वङ्गेषु व्याकरणं प्रधाने च कृ
तः प्रयत्नः फलवान्भवति तस्मादध्येयं व्या
करणं लघ्वर्थं चाध्येयं व्याकरणं ब्राह्मणेन
वश्यं शब्दा ज्ञेया इति न चान्तरेण व्याकरणं
लघुनोपायेन शब्दाः शक्या विज्ञातुं
किंच यत्सामान्यभूतं किंचिद्विशेषभूतं तेन
तेषु तद्व्याकरणमपरा आलोन्वपसर्गैकः

असंदेहार्थं चाध्येयं व्याकरणं याज्ञिकाः
पठंति स्थूलपृषतीमनड्वाहीमग्निवारु।
णीमालभेतेति तस्यां संदेहः स्थू
ला चासौ पृषती च स्थूलपृषती स्थूलानि
पृषंति यस्याः सा स्थूलपृषतीति ता
न्नावैयाकरणः स्वरतोऽध्यवस्यति यदि पूर्व
पदप्रकृतिस्वरत्वं ततो बहुव्रीहिः अथांतो
दात्तत्वं ततस्तत्पुरुष इति इमानि च भू
यः शब्दानुशासनस्य प्रयोजनानि तेऽसुरा
दुष्टः शब्दः यदधीतं यस्तु प्रयुंक्ते विद्वांसो वि
भक्तिं कुर्वंति यो वा इमां चत्वारि उत त्वः स
क्तुमिव सारस्वतीं दशम्यां पुत्रस्य सुदेवोऽसि
वरुण इति तेऽसुराः तेऽसुरा हेलयो हेलय
इति कुर्वंतः पराबभूवुः तस्माद्ब्राह्मणेन
न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष
यदपशब्दः म्लेच्छा मा भूमेत्यध्येयं व्याकर
णं तेऽसुराः दुष्टः शब्दः दुष्टः शब्दः स्वरतो व
र्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह स वा
ग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतो
ऽपराधात् दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्ये
यं व्याकरणं दुष्टः शब्दः यदधीतं यदधीतम
विज्ञातं निगदेनैव शब्द्यते अनग्नाविव शुष्कै।

धो न तज्ज्वलति कर्हिचित् तस्मादनर्थ
कं माध्यगीष्महीत्यध्येयं व्याकरणं यद
धीतं यस्तु प्रयुंक्ते यस्तु प्रयुंक्ते कुशलो वि
शेषे शब्दान्यथावद्व्यवहारकाले सोऽनंतमा
प्नोति जयं परत्र वाग्योगविद्दुष्यति चापश
ब्दैः कः वाग्योगविदेव कुत एतत् यो हि श
ब्दान् जानाति अपशब्दानप्यसौ जानाति य
थैव हि शब्दज्ञाने धर्मः एवमपशब्दज्ञानेऽप्य
धर्मः अथवा भूयानधर्मः प्राप्नोति भू
यांसोऽपशब्दा अल्पीयांसः शब्दा इति तद्यथा
एकैकस्यैव हि शब्दस्य बहवोऽपभ्रंशाः तद्य
था गौरित्यस्य शब्दस्य गावी गोणी गोता गो
पोतलिका इत्येवमादयोऽपभ्रंशाः अथ यो
वाग्योगविदज्ञानं तस्य शरणं नात्यंताया
ज्ञानं शरणं भवितुमर्हति यो ह्यजानन्वै ब्राह्म
णं हन्यात् सोऽपि मन्ये पतितः स्यादिति एवं
तर्हि सोऽनंतमाप्नोति जयं परत्र वाग्योगवि
द्दुष्यति चापशब्दैरिति कः प्रयोक्ता नेथा अ
वाग्योगवित् अथ यः वाग्योगवित् ज्ञानं त
स्य शरणं क्व पुनरिदं पठितं संति भ्राजा
नाम श्लोकाः किं च भोः श्लोका अपि प्रमा।
णं किं चातः यदि प्रमाणं अयमपि श्लो

कः प्रमाणो भवितुमर्हति यद्वैस्वरवर्णा
नोच्चरितो वा मंगलं महत् पीनेन वामयेत्त्व
गौ किं न तत्कल्याणेन नयेदिति प्रमत्तगीत
ष श्लोकः तत्र भवतो यस्त्वप्रमत्तगीतः स प्र
माणं यस्त्वप्रयुंक्ते अविद्वांसः अविद्वांसः प्र
त्यभिवादे नाम्नो ये न प्लुतिं विदुः कामं तेषु
तु विप्रोष्य स्त्रीष्विवाभिवदेत्तकः अभिवाद
स्त्रीवन्मा भूमेत्यध्येयं व्याकरणं अवि
द्वांसो विभक्तिं कुर्वंति याज्ञिकाः पठंति
प्रयाजाः सविभक्तिकाः कार्या इति न चान्त
रेण व्याकरणं प्रयाजाः सविभक्तिकाः श
क्याः कर्तुं तस्मादध्येयं व्याकरणं विभक्तिं
कुर्वंति यो वा इमां यो वा इमां पदशः स्वरशो
वर्णशो ऽक्षरशो वाचं विदधाति स आर्त्विजी
नः स्यादिति आर्त्विजीनाः स्यामेत्यध्येयं व्या
करणं यो वा इमां चत्वारि चत्वारि शृंगा त्रयो
अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा
बद्धो वृषभो रोरवीति महो देवो मर्त्यां आवि
वेश चत्वारि शृंगा इति चत्वारि पदजाता
नि नामाख्यातोपसर्गनिपाताश्च त्रयः अ
स्य पादाः भूतभविष्यद्वर्त्तमानास्त्रयः कालाः
द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च स

श्री
महा
भा ३

प्त हस्तासः अस्य सप्त विभक्तयः त्रिधा बद्धो
वृषभः त्रिषु स्थानेषु बद्धः उरसि कंठे शिरसी
ति वृषभो वर्षणात् रोरवीति शब्दं करोति कु
त एतत् रौतिः शब्दकर्मा महो देवो मर्त्यां आ
विवेश महान् देवः मर्त्याः मरणधर्माणो मनु
ष्यास्तान् आविवेश महता देवेन नः साम्यं यथा स्या
दित्यध्येयं व्याकरणं अपर आह चत्वारीति च
त्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा
ये मनीषिणः गुहा त्रीणि निहिता नेंगयन्ति तुरी
यं वाचो मनुष्या वदंति चत्वारि वाक्परिमिता
पदानीति चत्वारि पदजातानि नामाख्यातोप
सर्गनिपाताः तानि विदुर्ब्राह्मणा ये मनीषि
णः मनस ईषिणः मनीषिणः गुहा त्रीणि नि
हितानि नेंगयंति गुहायां त्रीणि निहितानि नेंग
यन्ते न चेष्टन्ते न निमिषंतीत्यर्थः तुरीयं वाचो म
नुष्या वदंति तुरीयं ह वा एतद्वाचो यन्मनुष्येषु व
र्तते चतुर्थमित्यर्थः उत त्वः उत त्वः पश्य
न्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सु
वासाः अप्येकः पश्यन्नपि न पश्यति वाचं अ
शृण्वन्नपि न शृणोत्येनाम् अविद्वांसमाहा
र्धम् उतो त्वस्मै तन्वं विसस्रे तन्वं विवृणुते

जायेव पत्य उषती सुवासाः तद्यथा जाया प
त्ये कामयमाना सुवासाः स्वमात्मानं विवृणु
ते एवं वाग्वाग्विदे स्वमात्मानं विवृणुते वा।
न्नो विवृणुयादित्यध्येयं व्याकरणं सक्तुमिव
सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वा
चमक्रत अत्रा सखायः सख्यानि जानते भद्रै
षां लक्ष्मीर्निहिताधि वाचि सक्तुः सचतेर्दु
र्धावो भवति कसतेर्वा विपरीताद्वि
कसितो भवति तितउ परिपवनं ततवद्वा तुन्न
वद्वा धीरा ध्यानवन्तः मनसा ज्ञानेन वाचमकृ।
षत अत्रा सखायः सख्यानि जानते अत्र सखा
यः सन्तः सख्यानि जानते क्व य एष दुर्गो मार्गः
एकगम्यो वाग्विषयः के पुनस्ते वैयाकरणाः
कुत एतत् भद्रैषां लक्ष्मीर्निहिताधि वाचि
भद्रा ह्येषां लक्ष्मीर्निहिता भवत्यधि वाचि ल।
क्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति भद्रा
नो लक्ष्मीः स्यादित्यध्येयं व्याकरणं सक्तुमिव
सारस्वतीं याज्ञिकाः पठन्ति आहिताग्निरपश
ब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपे
दिति प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणं
सारस्वतीं दशम्यां पुत्रस्य याज्ञिकाः पठन्ति द
शम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात

श्री
महा
भा
४

घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूक
मनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भव
ति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्या
न्न तद्धितमिति न चान्तरेण व्याकरणं कृत
स्तद्धिता वा शक्या विज्ञातुं दशम्यां पुत्रस्य
सुदेवोऽसि सुदेवो असि वरुण यस्य ते सप्त सि
न्धवः अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामि
व सुदेवोऽसि सत्यदेवोऽसि यस्य ते सप्त सिन्ध
वः सप्त विभक्तयः तालु अनुक्षरन्ति अनु
क्षरन्ति काकुदं काकुदं तालु काकुज्जिह्वा
सास्मिन्नुद्यत इति काकुदं सूर्म्यं सुषि
रामिव यथा शोभनां सूर्मिं सुषिरामग्नि
रन्तः प्रविश्य दहत्येवं तव सप्त सिन्धवः स
प्त विभक्तयः तेनासि सत्यदेवः सत्यदेवाः
स्यामेत्यध्येयं व्याकरणं सुदेवोऽसि किं पु
नरिदं व्याकरणमेवाधिजिगांसमानेभ्यः
प्रयोजनमन्वाख्यायते न पुनरन्यदपि किं
चित् ओमित्युक्त्वा वृत्तान्तशः शमित्येवमा
दीन् शब्दान्पठन्ति पुराकल्प एतदासीत्
संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्मा
धीयते तेभ्यस्तत्र स्थानकरणनादानुप्र
दानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते

तद्यथेत तत्र्या वेदमधीत्य त्वरिता वक्तारो
भवंति वेदान्नो वैदिकाः शब्दा लोकाच्चैव
हि लौकिकाः अनर्थकं व्याकरणमिति
तेभ्य एवं विप्रतिपन्नबुद्धिभ्योध्येतृभ्य आ
चार्यः इदं शास्त्रमन्वाचष्टे इमानि प्रयोज
नान्यध्येयं व्याकरणं उक्तः शब्दः स्वरूप
मप्यस्य व्याख्यातं प्रयोजनान्यप्युक्तानि
शब्दानुशासनमिदानीं कर्त्तव्यं तत्कथं क
र्तव्यं किं शब्दोपदेशः कर्तव्यः आहोस्विद
पशब्दोपदेशः आहोस्विदुभयोपदेश इ
त्यन्यतरोपदेशेन कृतं स्यात् तद्यथा भक्ष्यनि
यमेनाभक्ष्यप्रतिषेधो गम्यते पंचपंचन।
खाभक्ष्या इत्युक्ते गम्यते एतदतोन्येभ
क्ष्या इति अभक्ष्यप्रतिषेधेन वा भक्ष्यनिय।
मः तद्यथा अभक्ष्यो ग्राम्यकुक्कुटः अभ।
क्ष्यो ग्राम्यसूकर इत्युक्ते गम्यते एतदारण्यो
भक्ष्य इति एवमिहापि यदि तावच्छब्दोप
देशः क्रियते गौरित्येतस्मिन्नुपदिष्टे गम्य
ते एतद्गाव्यादयोपशब्दा इति किं पुनर।
त्र ज्यायः लघुत्वाच्छब्दोपदेशः लघीयान्
शब्दोपदेशः गरीयानपशब्दोपदेशः ए
कैकस्य हि शब्दस्य बहवोपभ्रंशाः तद्यथा

श्री
महा
भा २

गौरित्येतस्य गावी गोणी गोता गोपोत
लिकेत्येवमादयोपभ्रंशाः इष्टान्वाख्या
नं खल्वपि भवति अथैतस्मिन् शब्दोप
देशे किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः
कर्तव्यः गौरश्वः पुरुषो हस्ती शकुनिर्मृ।
गो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः
नेत्याह अनभ्युपाय एष शब्दानां प्रतिप
त्तौ प्रतिपदपाठः एवं हि श्रूयते बृहस्पति
रिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां श
ब्दानां शब्दपारायणं प्रोवाच नान्तं जगा
म बृहस्पतिश्च वक्ता इन्द्रश्चाध्येता दिव्यं
वर्षसहस्रमध्ययनकालः न चान्तं जगाम
किं पुनरद्यत्वे यः सर्वथा चिरं जीवति स व
र्षशतं जीवति चतुर्भिश्च प्रकारैर्विद्योप
युक्ता भवति आगमकालेन स्वाध्याय।
कालेन प्रवचनकालेन व्यवहारकालेने
ति तत्र चास्यागमकालेनैवायुः पर्यु
पयुक्तं स्यात् तस्मादनभ्युपायः शब्दा
नां प्रतिपत्तौ प्रतिपदपाठः कथं तर्हीमे
शब्दाः प्रतिपत्तव्याः किंचित्सामान्यवि
शेषवल्लक्षणं प्रवर्त्यं येनाल्पेनाल्पेन य
त्नेन महतो महतः शब्दौघान्प्रतिपद्येरन् किं

उत्सर्गापवादौ कश्चिदुत्सर्गः क
र्तव्यः कश्चिदपवादः कथंजातीयकः
पुनरुत्सर्गः कर्तव्यः कथंजातीयकोप
वादः सामान्येनोत्सर्गः कर्तव्यः तस्य वि
शेषेणापवादः तद्यथा कर्मण्यण् तस्य
विशेषेणापवादः तद्यथा आतोनुपसर्गे क
इति किं पुनराकृतिः पदार्थ आहोस्वि
द्द्रव्यं उभयमित्याह कथं ज्ञायते उभय
था ह्याचार्येण सूत्राणि पठितानि आकृ
तिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्ब
हुवचनमन्यतरस्यामित्युच्यते द्रव्यं पदा
र्थं मत्वा सरूपाणामेकशेष एकविभक्ता
वित्युच्यते किं पुनर्नित्यः शब्द आहोस्वि
त्कार्यः संग्रह एतत्प्राधान्येन परीक्षितं
नित्यो वा स्यात्कार्यो वेति तत्रोक्ता दोषाः
प्रयोजनान्यप्युक्तानि तत्र त्वेष निर्णयः य
द्येव नित्यः शब्दोऽथापि कार्यः उभयथा
पि लक्षणं प्रवर्त्यमिति कथं पुनरिदं भगव
तः पाणिनेराचार्यस्य लक्षणं प्रवृत्तं सिद्धे
शब्दार्थसंबन्धे सिद्धे शब्देऽर्थे संबन्धे चेति अ
थ सिद्धशब्दस्य कः पदार्थः नित्यपर्यायवा
ची सिद्धशब्दः कथं ज्ञायते यत्कूटस्थेष्व

श्री
महा
भा
९

विचालिषु भावेषु वर्तते तद्यथा सिद्धा द्यौः
सिद्धा पृथिवी सिद्धमाकाशमिति ननु च
भोः कार्येष्वपि वर्तते तद्यथा सिद्ध ओदनः
सिद्धः सूपः सिद्धा यवागूरिति यदि च कार्येष्व
पि वर्तते तत्र कुत एतन्नित्यपर्यायवाचिनो ग्र
हणमिति संग्रहे तावत्कार्यप्रतिपन्नः सिद्धा
न्तः सिद्धशब्दस्य नित्यपर्यायवाचिनो वद्रूया
साधितत्वात् इहापि तदेव अथवा सन्त्येकप
दान्यप्यवधारणानि तद्यथा अब्भक्षो वायुभक्ष
इति अप एव भक्षयति वायुमेव भक्षयतीति
गम्यते एवमिहापि सिद्ध एव न साध्य इति अथ
वा पूर्वपदलोपोऽत्र द्रष्टव्यः अत्यन्तसिद्धः सिद्ध
इति तद्यथा देवदत्तो दत्तः सत्यभामा भामेति
अथवा व्याख्यानतो विशेषप्रतिपत्तिः न हि सं
देहादलक्षणमिति नित्यपर्यायवाचिनो ग्रह
णमिति व्याख्यास्यामः किं पुनरनेन वर्ण्येन
किं न महता कण्ठेन नित्यशब्द एवोपात्तः य
स्मिन्नुपादीयमाने ऽसंदेहः स्यात् मंगलार्थं
मांगलिक आचार्यो महतः शास्त्रस्य मंगला
र्थं सिद्धशब्दमादितः प्रयुङ्क्ते मंगलादीनि हि
शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्म
त्पुरुषकाणि च अध्येतारश्च सिद्धार्था यथा स्यु

रिति अयं खल्वपि नित्यशब्दो नावश्यं कूट।
स्थेष्वविचालिषु भावेषु वर्त्तते किं तर्हि आ
भीक्ष्ण्येपि वर्त्तते नित्यप्रहसितो नित्यप्रज।
ल्पित इति यावतैवाभीक्ष्ण्येपि वर्त्तते तस्याप्यत्र
नार्थः स्यात् व्याख्यानतो विशेषप्रतिपत्तिर्न
हि संदेहादलक्षणमिति पश्यति त्वाचार्यो
मंगलार्थश्चैव हि सिद्धशब्द आदितः प्रयुक्तो भ
विष्यति शक्ष्यामि चैनं नित्यपर्यायवाचिनं व
र्णयितुमिति अतः सिद्धशब्द एवोपात्तो न नि
त्यशब्द इति कं पुनः पदार्थं मत्वैष विग्रहः क्रि
यते सिद्धे शब्देर्थे संबंधे चेति आकृतिमित्याह
कुत एतत् आकृतिर्हि नित्या द्रव्यमनित्यं अथ
द्रव्ये पदार्थे कथं विग्रहः कर्त्तव्यः सिद्धे शब्दे।
र्थसंबंधे चेति नित्यो ह्यर्थवतामर्थैरभिसं
बंधः अथवा द्रव्य एव पदार्थ एष विग्रहो न्या
य्यः सिद्धे शब्देर्थे संबंधे चेति द्रव्यं हि नित्यमा
कृतिरनित्या कथं ज्ञायते एवं हि दृश्यते लो
के मृत्कयाचिदाकृत्या युक्ता पिंडो भवति पिं
डाकृतिमुपमृद्य घटिकाः क्रियंते घटिकाकृ
तिमुपमृद्य कुंडिकाः क्रियंते तथा सुवर्णं क
याचिदाकृत्या युक्तं पिंडो भवति पिंडाकृतिमु
पमृद्य रुचकाः क्रियंते रुचकाकृतिमुपम

श्री
महा
भा
१

द्य स्वस्तिकाः क्रियंते पुनरावृत्तः सुवर्ण।
पिंडः पुनरपरयाकृत्या युक्तः खदिरांगारस
दृशे कुंडले भवतः आकृतिरन्या चान्या च
भवति पुनस्तदेव आकृत्युपमर्देन द्रव्यमे
वावशिष्यते आकृतावपि पदार्थ एष।
विग्रहो न्याय्यः सिद्धे शब्देर्थे संबंधे चेति
ननु चोक्तमनित्याकृतिरिति नैतदस्ति नि
त्याकृतिः कथं न क्वचिदुपरतेति कृत्वा
सर्वत्रोपरता भवति द्रव्यांतरस्थोपलभ्य
ते अथवा नेदमेव नित्यलक्षणं ध्रुवं
यत्कूटस्थमविचाल्यनपायोपजननम।
विकार्यनुत्पत्त्यवृद्ध्यव्यययोगि तन्नित्यमिति
तदपि हि नित्यं यस्मिंस्तत्वं न विहन्यते किं
पुनस्तत्वं तद्भावस्तत्वं आकृतौ चापि तत्वं
न विहन्यते अथवा किं नः एतेन इदं नित्य
मनित्यमिति यन्नित्यं तं पदार्थं मत्वा विग्र
हः क्रियते सिद्धे शब्देर्थे संबंधे चेति कथं
पुनर्ज्ञायते सिद्धः शब्दोर्थः संबंधश्चेति
लोकतः यल्लोकार्थमर्थमुपादाय
शब्दान्प्रयुंजते नैषां निर्वृत्तौ यत्नं कुर्वं
ति ये पुनः कार्या भावास्तन्निर्वृत्तौ तावत्
यत्नः क्रियते तद्यथा घटेन कार्यं करि

ष्यन् कुंभकारकुलं गत्वाह कुरु घटं कार्य
मनेन करिष्यामीति न तद्वच्छब्दान्प्रयुक्ष्यमा।
णो वैयाकरणकुलं गत्वाह कुरु शब्दान्
प्रयोक्ष्य इति तावत्येवार्थमुपादाय शब्दान्
प्रयुञ्जते यदि तर्हि लोक एषु प्रमाणं किं
शास्त्रेण क्रियते। लोकतोऽर्थप्रयुक्ते शब्द।
प्रयोगे शास्त्रेण धर्मनियमः लोकतोऽर्थप्र
युक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते
किमिदं धर्मनियम इति धर्माय नियमः
धर्मनियमः धर्मार्थो नियमो वा धर्मनिय
मः धर्मप्रयोजनो वा नियमः धर्मनियम इ
ति यथा लौकिकवैदिकेषु प्रियतद्धिता दा
क्षिणात्याः यथा लोके वेदे चेति लौकिक
वैदिकेष्विति प्रयुञ्जते अथवा युक्त एवात्र त।
द्धितार्थः यथा लौकिकेषु वैदिकेषु च कृ
तान्तेषु लौकिकं नाम तावत् अभक्ष्यो ग्राम्यकु
क्कुटः अभक्ष्यो ग्राम्यसूकर इत्युच्यते भक्ष्यं
च नाम क्षुत्प्रतीघातार्थमुपादीयते शक्यं
चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुं त
त्र नियमः क्रियते इदं भक्ष्यमिदमभक्ष्यमिति
तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति समानश्च
खेदविगमो गम्यायां चागम्यायां च तत्र नि।

श्री
महा
भा
८

यमः क्रियते इयं गम्येयमगम्येति वैदि
केष्वपि पयोव्रतो ब्राह्मणो यवागूव्रतो
राजन्य आमिक्षाव्रतो वैश्य इति उच्यते व्र
तं च नाम अभ्यवहारार्थमुपादीयते शक्यं
चानेन शालिमांसादीन्यपि व्रतयितुं तत्र निय
मः क्रियते तथा बैल्वः खादिरो वा यूपः स्यादिति
उच्यते यूपश्च नाम पश्वनुबन्धार्थमुपादीय
ते शक्यं चानेन यत्किंचित्काष्ठमुच्छ्रित्य
अनुच्छ्रित्य वा पशुमनुबन्धुं तथाग्नौ कपालान्य
धिश्रित्याभिमन्त्रयते भृगूणामङ्गिरसां घर्म
स्य तपसा तप्यध्वमिति अन्तरेणापि मन्त्रमग्निर्द
हनकर्मा कपालानि संतापयति तत्र च निय
मः क्रियते एवं क्रियमाणमभ्युदयकारि
भवतीति एवमिहापि समानायामर्थगतौ
शब्देन चापशब्देन च धर्मनियमः क्रियते
शब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रि
यमाणमभ्युदयकारि भवतीति अस्त्यप्रयु
क्तः सन्ति वै शब्दा अप्रयुक्ताः तद्यथा ऊष
तेर चक्र पेचेति किमतो यत्सन्त्यप्रयुक्ताः
प्रयोगाद्धि भवान् शब्दानां साधुत्वमध्यवस्य
ति य इदानीमप्रयुक्ता नामी साधवः स्युः इ
दं विप्रतिषिद्धं यदुच्यते सन्ति वै शब्दा अप्रयु

प्रयुक्ता इति यदि तावत्सन्ति नाप्रयुक्ताः अथा
प्रयुक्ता न सन्ति सन्ति चाप्रयुक्ताश्चेति विप्र
तिषिद्धं प्रयुञ्जान एव खल्वपि भवानाह स
न्ति शब्दा अप्रयुक्ता इति कश्चेदानीमन्यो भ
वज्जातीयकः शब्दानां प्रयोगे साधुः स्यात्
नैतद्विप्रतिषिद्धं सन्तीति तावद्ब्रूमः यदेता
न्शास्त्रविदः शास्त्रेणानुविदधते अप्र
युक्ता इति ब्रूमः यल्लोकेऽप्रयुक्ता इति यद
प्युच्यते कश्चेदानीमन्यो भवज्जातीयकः श
ब्दानां प्रयोगे साधुः स्यादिति न तान्पि ब्रूमः
स्माभिरप्रयुक्ता इति किं तर्हि लोकेऽप्रयुक्ता
इति ननु च भवानप्यभ्यन्तरो लोके अभ्यन्तरो
हं लोके न त्वहं लोका इति अस्त्यप्रयुक्त इ
ति चेन्नार्थे शब्दप्रयोगात् अस्त्यप्रयुक्त इ
ति चेत्तन्न कुतः अर्थे शब्दप्रयोगात् अर्थे शब्दा
ः प्रयुज्यन्ते सन्ति चैषां शब्दानामर्था येष्व
र्थेषु प्रयुज्यन्ते अप्रयोगः प्रयोगान्यत्वात् अ
प्रयोगः खल्वप्येषां शब्दानां न्याय्यः कु
तः प्रयोगान्यत्वात् यदेतेषां शब्दानामर्थे
ऽन्यान्शब्दान्प्रयुञ्जते तद्यथा ऊषेत्यस्य
स्यार्थे क्व यूयमुषिताः तेरेत्यस्यार्थे क्व यू
यं तीर्णाः चक्रेत्यस्यार्थे क्व यूयं कृतवन्तः पेचे

श्री
महा
भा ४

त्यस्यार्थे क्व यूयं पक्ववन्त इति अप्रयुक्ते दी
र्घसत्त्रवत् यद्यप्यप्रयुक्ता अवश्यं दीर्घस
त्त्रवल्लक्षणेनानुविधेयाः तद्यथा दीर्घस
त्त्राणि वार्षशतिकानि वार्षसहस्रिकाणि
च न चाद्यत्वे कश्चिदप्याहरतीति केवलमृ
षिसम्प्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रे
णानुविदधते सर्वे देशान्तरे सर्वे खल्वप्येते
देशान्तरेषु प्रयुज्यन्ते न चैवोपलभ्यन्ते उपल
ब्धौ यत्नः क्रियतां महान्हि शब्दस्य प्रयोग
विषयः सप्तद्वीपा वसुमती त्रयो लोकाः
चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भि
न्नाः एकशतमध्वर्युशाखाः सहस्रवर्त्मा
सामवेदः एकविंशतिधा बाह्वृच्यं नवधा
थर्वणो वेदः वाकोवाक्यं इतिहासः पुराणं
णं वैद्यकमित्येतावान्शब्दस्य प्रयोग
विषयः एतावन्तं शब्दस्य प्रयोगविषयमन
नुनिशम्य भवानाह सन्त्यप्रयुक्ता इ
ति वचनं केवलं साहसमात्रं सन्त्यप्रयुक्ता इ
ति एतस्मिंश्चातिमहति शब्दस्य प्रयोगविष
ये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते
तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भा
ष्यते विकारमेनमार्या भाषन्ते शव इति हम्म

तिः स्यादिष्टं हि तिः ग्राम्यमर्थमेव ग्रामि
मेवान्नार्थः प्रयुज्यते दानीं लोकवणार्थे प्राचे
ष्ट येवाप्यते भवतोऽप्युक्तासिमन्नाः श
ह्यस्तेनाभ्यपि प्रयोगोऽभ्युदयः पने क वेदे तथ
था यद्यथैववती स्वम्पेन रुप यन्मेन रस्य
सं प्रलयक यवानशक्यात्रसेतन्त्रासि
ति किं पुनः शब्दस्य ज्ञाने धर्म आहोस्वित्प्र
योगे कश्चात्र विशेषः ज्ञाने धर्म इति चेत्तथा
ऽधर्मः ज्ञाने धर्म इति चेत्तथाऽधर्मोऽपि प्रा
प्नोति यो हि शब्दान् जानात्यपशब्दानप्य
सौ जानाति यथैव हि शब्दज्ञाने धर्मस्तथैवा
पशब्दज्ञानेऽप्यधर्मः अथवा भूयानधर्मः
प्राप्नोति भूयांसोऽपशब्दाः अल्पीयांसः
शब्दाः एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः
तद्यथा गौरित्यस्य शब्दस्य गावीगोण्यादयोऽपभ्रं
शाः आचारे नियमः आचारे त्वपि ऋषि
नियममेव वेदयते तेऽसुरा हेलयो हेलय इति
कुर्वन्तः पराबभूवुरिति अस्तु तर्हि प्रयो
गे प्रयोगे सर्वलोकस्य यदि प्रयोगे धर्मः
सर्वलोकोऽभ्युदयेन युज्येत कश्चेदानीं भव
तो मत्सरः यदि सर्वो लोकोऽभ्युदयेन युज्ये
त न खलु कश्चिन्मत्सरः प्रयत्नानर्थक्यं

श्री
महा
भा
१

तु भवति फलवता च नाम प्रयत्नेन भवि
तव्यं न च प्रयत्नः फलाद्व्यतिरेच्यः ननु च
ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्य
न्ते त एव साधीयोऽभ्युदयेन योक्ष्यन्ते व्य
तिरेकोऽपि वै लक्ष्यते दृश्यन्ते हि कृतप्रयत्ना
श्चाप्रवीणाः अकृतप्रयत्नाश्च प्रवीणाः त
त्र फलव्यतिरेकोऽपि स्यात् एवं तर्हि नापि
ज्ञान एव धर्मो नापि प्रयोग एव किं तर्हि शा
स्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन
शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन यु
ज्यते तत्तुल्यं वेदशब्देनेति यथा वेदशब्दा
अप्येकमेवाभिवदति अग्निष्टोमेन यजते
यस्तैनमेवं वेद अग्निनाचिकेतं चिनुते य
स्तैनमेवं वेद अपर आह तत्तुल्यं वेदशब्दे
नेति यथा वेदशब्दा नियमपूर्वमधीताः
फलवन्तो भवन्ति एवं यः शास्त्रपूर्वकं शब्दा
न्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति अथ
वा पुनरस्तु ज्ञान एव धर्म इति ननु चोक्तं ज्ञाने
धर्म इति नैष दोषः शब्दप्रमाणका वयं य
च्छब्द आह तदस्माकं प्रमाणं शब्दश्च श
ज्ञाने धर्ममाह नापशब्दज्ञानेऽधर्मं यद्
वा यच्च पुनरशिष्टाप्रतिषिद्धं नैव दोषाय

भवतिनाभ्युदयाय तद्यथा हिक्कितह
सितकंडूयितानिनैवदोषायभवंतिनाभ्यु
दयाय अथवाभ्युपायएवापशब्दज्ञानं।
शब्दज्ञानस्य योह्यपशब्दान्जानातिस
शब्दानप्यसौजानाति तदेतत्कृत्स्नज्ञाने
धर्मइतिब्रुवतः अर्थादापन्नंभवति अपश
ब्दज्ञानपूर्वकेशब्दज्ञानेधर्मइति अथवा
कूपखानकवदेतद्भविष्यति तद्यथाकू
पखानकः कूपंखनन्यद्यपिमृदापांसुभि
श्चावकीर्णोभवति सोप्सुसंजातासुतत
एवतंगुणमासादयति येनसदोषोनिर्हन्य
तेभूयसाचाभ्युदयेनयोगोभवतीति एवमिहा
प्ययद्यप्यपशब्दज्ञानेधर्मः यस्त्वसौशब्दज्ञा
नेधर्मस्तेनसदोषोनिर्घानिष्यते भूय
साभ्युदयेनयोगोभविष्यति यदप्युच्य
तेआचारेनियमइति याज्ञेकर्मणिसनिय
मः एवंहिश्रूयते यर्वाणस्तर्वाणोनाम
ऋषयोबभूवुः प्रत्यक्षधर्माणःपरापरज्ञा
विदितवेदितव्याः अधिगतयाथातथ्या
स्तेतत्रभवंतोयद्वानस्तद्वानइतिप्रयोक्तव्ये
यर्वाणस्तर्वाणइतिप्रयुंजते याज्ञेपुनःक
र्मणिनापभाषंते तैःपुनरसुरैर्याज्ञेकर्मण्यपभा

श्री
महाभा
११

षितेततस्तेपराबभूवुः अथव्याकरणमि
त्यस्यशब्दस्यकः पदार्थः सूत्रम् सूत्रेव्याक
रणेषष्ठ्यर्थोनोपपन्नः सूत्रेव्याकरणेष
ष्ठ्यर्थोनोपपद्यतेव्याकरणस्यसूत्रमिति
किंतर्हितदन्यत्सूत्राद्व्याकरणंयस्यादः
सूत्रंस्यात् शब्दाप्रतिपत्तिः शब्दानांचाप्र
तिपत्तिःप्राप्नोति व्याकरणाच्छब्दान्प्रति
पद्यामहेइति नहिसूत्रतएवशब्दान्प्रति
पद्यंते किंतर्हिव्याख्यानतोपि ननुचतदेव
सूत्रंविगृहीतंव्याख्यानंभवति नकेव
लानिचर्चापदानिव्याख्यानं वृद्धिःआदै
चिति किंतर्हि उदाहरणं प्रत्युदाहर
णं वाक्याध्याहारइत्येतत्समुदितंव्याख्या
नंभवति एवंतर्हिशब्दः शब्देल्युडर्थः य
दिशब्दोव्याकरण ल्युडर्थोनोपपद्यतेव्या
क्रियतेशब्दोनेनेतिव्याकरणंनहिशब्दे
नकिंचिद्व्याक्रियते केनतर्हिसूत्रेण भ
वेतद्धितोनोपपद्यते व्याकरणेभवोयो
गोवैयाकरणइति नहिशब्देभवोयोगः
कतर्हिसूत्रे प्रोक्तादयश्चतद्धिताः प्रोक्ता
दयश्चतद्धितानोपपद्यंते पाणिनिनाप्रो
क्तंपाणिनीयं आपिशलं काशकृत्स्नीति

ति न हि पाणिनिना प्रोक्ताः शब्दाः किं तर्हि
सूत्रं किमर्थमिदमुभयमुच्यते भवे प्रो
क्तादयश्च तद्धिता इति न प्रोक्तादयश्च त
द्धिता इत्येव भवेऽपि तद्धितः सिद्धः स्यात्
पुरस्तादिदमाचार्येण दृष्टं भव इति तद्ध
िते तत उत्तरकालमिदं दृष्टं प्रोक्तादय
श्च तद्धिता इति न चेदानीमा
चार्याः सूत्राणि कृत्वा निवर्तयन्ति अयं ता
वददोषः शब्दे ल्युडर्थ इति नावश्यं करणा
धिकरणयोरेव ल्युड्विधीयते किं तर्ह्यन्ये
ष्वपि कारकेषु कृत्यल्युटो बहुलमिति तद्य
था प्रस्कन्दनं प्रपतनमिति अथवा शब्दै
रपि शब्दा व्याक्रियन्ते तद्यथा गौरित्युक्ते स
र्वे सन्देहा निवर्तन्ते नाश्वो न गर्दभ इति अ
यं तर्हि दोषः तद्धितः भवे च तद्धितः प्रोक्ता
दयश्च तद्धिता इति एवं तर्हि लक्ष्यलक्षणे
व्याकरणं लक्ष्यं च लक्षणं चैतत्समुदि
तं व्याकरणं भवति किं पुनर्लक्ष्यं किं पु
नर्लक्षणं शब्दो लक्ष्यः सूत्रं लक्षणम् एवम
प्ययं दोषः समुदाये व्याकरणशब्दः प्रवृत्तो
ऽवयवे नोपपद्यते सूत्राणि चाप्यधीयान
इष्यते वैयाकरण इति नैष दोषः समुदा।

श्री
महाभा
१२

येषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्ते त
द्यथा पूर्वे पंचालाः उत्तरे पंचालाः तैलं भुक्तं
शुक्लो नीलः कृष्ण इति एवमयं समुदाये व्याक
रणशब्दः प्रवृत्तोऽवयवेऽपि वर्तते अथवा पुन
रस्तु सूत्रं ननु चोक्तं सूत्रे व्याकरणे षष्ठ्यर्थो।
नोपपन्न इति नैष दोषः व्यपदेशिवद्भावेन
भविष्यति यदप्युच्यते शब्दाप्रतिपत्तिरिति
न हि सूत्रत एव शब्दान्प्रतिपद्यन्ते किं तर्हि
व्याख्यानतश्चेति परिहृतमेतत् तदेव सू
त्रं विगृहीतं व्याख्यानं भवति ननु चोक्तं न
केवलानि चर्चापदानि व्याख्यानं किं तर्हि
वृद्धिरादैजिति उदाहरणं प्रत्युदाहरणं वा
क्याध्याहार इत्येतत्समुदितं व्याख्यानं भव
तीति अविजानत एतदेवं भवति सूत्र
त एव शब्दान्प्रतिपद्यन्ते आतश्च सूत्रत एव यो
ह्युत्सूत्रं कथयेत् नादो गृह्येत अथ किम
र्थो वर्णानामुपदेशः वृत्तिसमवायार्थ उप
देशः वृत्तिसमवायार्थो वर्णानामुपदेशः
कर्तव्यः किमिदं वृत्तिसमवायार्थ इति वृत्त
ये समवायो वृत्तिसमवायः वृत्त्यर्थो वा सम
वायो वृत्तिसमवायः वृत्तिप्रयोजनो वा सम
वायो वृत्तिसमवायः का पुनर्वृत्तिः शास्त्र

स्त्रप्रवृत्तिः अथकःसमवायः वर्णानामा
नुपूर्व्येणसन्निवेशः अथकउपदेशःउ
च्चारणंकुतएतत् दिशिरुच्चारणक्रियः उ
च्चार्यवर्णानाह उपदिष्टाइमेवर्णाइति
अनुबन्धकरणार्थश्च अनुबन्धकरणार्थश्च
वर्णानामुपदेशः अनुबन्धानासङ्क्ष्यामीति
नह्यनुपदिश्यवर्णाननुबन्धाःशक्याआसं
क्तुं सएषवर्णानामुपदेशोवृत्तिसमवाया
र्थश्चानुबन्धकरणार्थश्च अनुबन्धकरणंच
प्रत्याहारार्थं प्रत्याहारोवृत्त्यर्थः इष्टबुद्ध्य
र्थश्चवर्णानामुपदेशः इष्टान्वर्णान्भोत्स्या
मइति नह्यनुपदिश्यवर्णाःशक्याबोद्धु
मिष्टाः इष्टबुद्ध्यर्थश्चेतिचेत् उदात्तानुदा
त्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदे
शःकर्तव्यः एवंगुणाअपिवर्णाइष्यन्ते आ
कृत्युपदेशात्सिद्धं आकृत्युपदेशात्सिद्धमेत
त् अवर्णाकृतिरुपदिष्टासासर्वमवर्णकु
लंग्रहीष्यतीति तथेवर्णाकृतिः तथोव
र्णाकृतिः आकृत्युपदेशात्सिद्धमितिचेत्
संवृतादीनांप्रतिषेधः आकृत्युपदेशात्सि
द्धमितिचेत्संवृतादीनांप्रतिषेधःकर्तव्यःके
पुनःसंवृतादयः संवृतःकलध्मातएणीकृ

श्री
महा
भा
६

तोम्बूकृतोर्धकोग्रस्तोनिरस्तःप्रगीतउपगी
तःक्ष्विण्णोरोमशइति अपरआह ग्रस्तंनि
रस्तमविलम्बितंनिर्हतमम्बूकृतंध्मा।
तमथोविकम्पितं संदष्टमेणीकृतमर्धकं
द्रुतंविकीर्णमेताःस्वरदोषभावनाइति अतो
न्येव्यञ्जनदोषाः नैषदोषः गर्गादिबिदा
दिपाठात्संवृतादीनांनिवृत्तिर्भविष्यति अ
स्त्यन्यद्गर्गादिबिदादिपाठेप्रयोजनं किंस
मुदायानांसाधुत्वंयथास्यादिति एवंतर्ह्य
ष्टादशधाभिन्नांनिवृत्तकलादिकामवर्ण
स्यप्रत्यापत्तिंवक्ष्यामि सातर्हिवक्तव्या
लिंगार्थाहिप्रत्यापत्तिः लिंगार्थासाभविष्य
ति ननुहिसावक्तव्या यद्यपिप्रत्यापत्तिरु
च्यते अथवैतर्ह्यनेकमनुबन्धशतंनोच्चा
र्यमित्संज्ञाचनवक्तव्यालोपश्चनवक्तव्यः
यदनुबन्धैःकार्यंक्रियतेतत्कलादिभिःक
रिष्यति सिध्यत्येवमपाणिनीयंतुभवति
यथान्यासमेवास्तु ननुचोक्तमाकृत्युप
देशात्सिद्धमितिचेत् संवृतादीनांप्रतिषे
धइतिपरिहृतमेतत् गर्गादिबिदादिपा
ठात्संवृतादीनांनिवृत्तिर्भविष्यतीति उक्त
मत्रास्त्यन्यद्गर्गादिबिदादिपाठेप्रयोजनं

ष्टं किं स्वरवर्णानां साधुत्वं यथा स्यादि
ति एवं तर्हि संवृतादीनेन क्रियते पाठ एव वि
शिष्यते कलादयश्च निवर्त्यन्ते कथं तर्हि
केनयन्ते नामसंवृतलम्भे लभ्यमित्याह क
थं चैव हि गतानां प्रतिपत्तिर्न दोषः स्वेति तथा
ऽन्यास्वाश्रितिकाः पितृस्वप्रमाणनाद्बन्ति न
चावाकानापि हि हानिसर्वेति तद्यथाऽ
तो यावत्तिष्ठते तस्मान्नोपायानेति प्रयत्नादर
ऽनावर्द्धं प्रयत्नः केऽमे संवृतादयः ग्रस्त
निरस्त आसमे तु ग्रासमानाः सूदाः प्रवर्तेते वि
कारे तत्र हि विकारानपि स्पृष्टाः प्रयत्ने प्रव
र्ते प्रयत्नानपि स्पृष्टाः प्रवृत्ते प्रयत्ने पा
नवोऽपि स्पृष्टाः प्रवर्तेते प्रातिपदिके तु नोऽति प्रा
तिपदिकान्यपि स्पृष्टानि प्रवर्तते यानि तत्र
ग्रहणानि प्रातिपदिकानि तेषामपि ग्र
हणस्वरवर्णानि सर्वीकानावार्थम् उपदेशः क
र्तव्यः ग्रस्ता इति ग्रस्त इति माभूत् लपला यः
पला इति माभूत् मेवको मे कुक इति
माभूत् आग्रामाश्च विकाराः सम्प्रतयः
सन्धानतभिः दुर्ध्यायेते तत तेषु मे मेषो।
कः कलादय इति इति श्रीमद्भगवत्पत
ञ्जलिमुनिविरचिते व्याकरणमहाभाष्ये

श्री
महा
भा
१८

प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्नि
कं ॥ १ ॥ पस्पशा अथ प्रत्याहाराह्नि
कम् ॥ अइउण् ॥ अकारस्य विवृतोप
देशः आकारग्रहणार्थः अकारस्य वि
वृतोपदेशः कर्तव्यः किं प्रयोजनं आ
कारग्रहणार्थः अकारः सवर्णग्रहणेन
यथा आकारमपि गृह्णीयात् किं च का
रणं न गृह्णीयात् विवारभेदात् किमु
च्यते विवारभेदादिति न पुनः कालभेदा
दपि यथैव ह्ययं विवारभिन्न एवं
कालभेदोऽपि सत्यमेवमेतत् वक्ष्यति
ह्याचार्यः तुल्यास्यप्रयत्नं सवर्णमिति आस्य
ग्रहणस्य प्रयोजनं आस्ये येषां तुल्यो
देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति
ति बाह्यश्च पुनरास्यात्कालः तेन स्यादे
व कालभिन्नस्य ग्रहणं न पुनर्विवारभि
न्नस्य ग्रहणं किं पुनरिदं विवृतस्योपदि
श्यमानस्य प्रयोजनमन्वाख्यायते आहो
स्वित्संवृतस्योपदिश्यमानस्य विवृतोपदे
शश्चोद्यते विवृतस्योपदिश्यमानस्य प्रयो
जनमन्वाख्यायते कथं ज्ञायते यदयमप्र
इति प्रकारस्य विवृतस्य संवृतताप्रत्याप

ति शास्ति नैतदस्ति ज्ञापकं अस्त्यन्यदेत
स्य वचने प्रयोजने किंपुनरिदं प्रतिमा
लइत्यवोचाम तरिलो विवृतः प्राप्नोति संवृतः
स्यादित्येवमर्थमस्यापत्तिः स्यात् नैतद
स्ति नैव लोके न च वेदे अकारो विवृतोऽस्ति
कस्तर्हि संवृतः योऽस्ति स भविष्यति तदेत
न अकारस्यप्रत्यापत्तिवचनं ज्ञापकं भ
विष्यति विवृतस्योपदिश्यमानस्य प्रयो
जनमन्वाख्यायत इति कः पुनरत्र विशे
षः विवृतस्योपदिश्यमानस्य प्रयोजनम
न्वाख्यायेत संवृतस्योपदिश्यमानस्य वि
वृतोपदेशश्चोद्यते नावलकश्चिद्विशेषः
आदेशप्रकृतिकामात्रमेवानात् संवृतस्यो
पदिश्यमानस्य विवृतोपदेशश्चोद्यते वर्ण
नः इमः विवृतस्योपदिश्यमानस्य प्रयो
जनमन्वाख्यायत इति तस्य विवृतोपदे
शादन्यत्रापि विवृतोपदेशः सवर्णग्रहणा
र्थः तस्येतस्मात्तरसमाम्नायिकस्य विवृ
तोपदेशादन्यत्रापि विवृतोपदेशः कर्तव्यः
कान्यत्र धातुप्रातिपदिकप्रत्ययनिपातस्थ
स्य किंप्रयोजनं सवर्णग्रहणार्थः अत्रसम
माम्नायिकेनास्य ग्रहणं यथा स्यात् किंच

श्री महा भा १५

कारणं तस्मात् विवारभेदादेव आचार्य
प्रवृत्तिर्ज्ञापयति भवत्येतरसमाम्नायि
केनाप्यनादिस्य ग्रहणमिति यदयम
कः सवर्णे दीर्घ इति प्रत्याहारग्रकोऽग्र
णं करोति कथं कृत्वा ज्ञापकं नहि द्वयो
रत्तरसमाम्नायिकयोर्ग्रहणस्य प्रयोज
नमस्ति नैतदस्ति ज्ञापकं अस्त्यन्यदा
देतस्य वचने प्रयोजनं किं यस्येतरस
माम्नायिकेन ग्रहणमस्ति तदर्थमेतत
स्यात् खट्वाढकं मालाढकं इति एतत्प्र
योजनेन ज्ञापकं भवति तस्माद्विवृतोप
देशः कर्तव्यः कउपधयत्नश्चोद्यते विवृ
तोपदेशो नाम विवृतो वोपदिश्यते संवृ
तो वा कोऽत्र विशेषः सवर्णग्रहणमस्य
न्तः कर्तव्यः यावन्तानि प्रातिपदिकान्य
ग्रहणानि तेषामेतेनाभ्युपायेनोपदेश
श्चोद्यते तद्गुरु भवति तस्मात्कर्तव्या
नादिस्य विवृत इति दीर्घप्लुतवचने
च संवृतनिवृत्त्यर्थः दीर्घप्लुतवचने च
संवृतनिवृत्त्यर्थं विवृतोपदेशः कर्तव्यः
दीर्घप्लुतौ संवृतौ माभूतामिति वृक्षा
भ्यां देवदत्तात् इह हि दोषः नैव लोके

नचवेदेदीर्घप्लुतौसंवृतौस्तः कौतर्हिवि
वृतौयौलस्तौभविष्यतः स्थानेप्रकल्पये
देतावनुस्वारोयथायणांसंवृतस्थानेसं
वृतौदीर्घप्लुतौकल्पयेत अनुस्वारोय।
थायणां मयथा संख्यता संवृतस्वरोयं
लोकमतेलौकेइति अनुस्वारस्थानेय
णामनुनासिकंप्रकल्पयेदितिविग्रहा
पत्यामः प्रकृतस्तनतस्वरूपकल्पितेवि
धाति सतियणः सानुनासिकानिरनु
नासिकाश्च दीर्घप्लुतौनप्रकृतेवलौके
नचवेदेसंवृतौस्तः कौतर्हिविवृतौयौ
स्तः तौभविष्यतः एवमपिकृतपतल
तस्यस्थानोभिन्नप्रयत्नौभविष्यतः प
संहताग्रन्थमात्रवसाम्यइतिनप्रकल्प
यप्रयत्नौस्थानभिन्नौस्यातां एकारौ
कारौवेतिवक्ष्यतिस्थानेतरतमइत्यत्रस्था
नइतिवर्त्तमानेगुणः स्यानग्रहणास्थान
स्यैवागतेः यत्रानेकमान्तर्यंसंभवतित
त्रस्थानतएवान्तरीयवलीयो यथास्या
दिति तत्रान्तरतमनिर्द्देशे सवर्णाग्रहण
मनेणाम तत्रान्तरतमानिर्द्देशे सवर्णा
नांग्रहणान्नप्राप्नोति अप्रत्याख्यापितिवे

श्री
महा
भा
२९

तिकिंकारणं अग्रहणात् नहोनेचा।
णोयेग्रहणमेवानिर्दिश्यते केवलंहि ये
ग्रहणसमाम्नायेउपदिश्यन्ते एक
त्वादकारस्यसिद्धं एकोयमकारोय
श्चाक्षरसमाम्नायेपठ्यते ग्रहणमेवायस्य
मात्राद्विस्य: अनेकंपसेकारस्यग्र
हसमाम्नायिकस्यपश्चादेकत्वयाव
णाद्दास्यानिर्देशाः एकः सवर्णाइत्याद
वनेकेपोपसंहितसन्तोन्यत्रास्यज्ञावि
स्यादेशस्ववर्णाग्रहणमणाणात् अने
पसेकारस्यप्राप्नोति कंमीणाणं प्रा
नोत्वपसर्गेकइतिकेयाणि कृतेप्रा।
प्नोति एकजनेकावग्रहणोपचारेण
ति: एकाजनेकाचग्रहणोपचारान्नप्य।
तिर्भवति तत्रकोदोषः किंशाणि।
शिणा इत्यत्रएकानलत्वणमेतोदान।
त्वंप्राप्नोति दहवचोदेनतरतिरुदिक
इत्यत्रएवमलत्वणान्नप्राप्नोति कृत्वा
वोपचारः इत्यवचोपचाराः प्राप्नोति
स्मोपैतेकेनचडेनानेकोग्रहणकाचके
रोति एवमेकमकारेनानेकोडणपञ्चा
रोपेन विशेषणानन्नानालिंगकारणानि

हेमसिद्धमेतत् कृतः विषयेणानालि
ङ्गकरणात् यद्ययं विषयो विषयेणनाना
लिङ्गमकारकरोति कर्मणापरः श्रोतो
नृणामर्गंकरत्वेनैकेन ज्ञापयति नानावं
यस्मंकरोतीति यदिहि स्यात् नाना
लिङ्गकरणमनर्थकं स्यात् एकमेवा
येन वग्गुणमन्वारयेन नैतदस्ति ज्ञाप
केरस्व ज्ञापकस्यार्थमेतत्स्यात् नहा
नेवंये शल्पकवद्बकाउपवेते इत्य
ज्ञायाहिदोषःस्यात् श्रायमाहिस्यदोरि
न्ते ज्ञास्यात् कथं श्रोत्रनयो श्वेन हि
विषयेणान्पुनर्लिङ्गकरणमस्तिह यद
यं विषयो विषये पुनर्लिङ्गमकारकरोति
श्रवणेन्वतेण सिध्यदिष्याण इति तेन
ज्ञापयति नानावं यस्मंकरोतीति यदिहि
स्यात् पुनर्लिङ्गकरणमनर्थकं स्यात्
श्रुत्य वा पुनरस्त्र विषये न त नानालिङ्ग
करणाद्विस्तिहमिन्यव तन्त्रुवोक्तमित्य
ज्ञापकस्यार्थेनतस्यादिति नैषदोषः
लोकतएतत्सिद्ध तद्यथा लोके केचि
देवदत्तमाह इहगृहे अवरदत्तादिलोभ
वेदृहागायो भवति सर्वोलिङ्गायोग्या

श्री महा भा ८

नैतल्लिङ्गस्त्वेऽपस्याप्यते एवमपमकारो
यल्लिङ्गायोयच्यतेनतस्त्वेऽपस्याप्यते यदप्यु
च्यते एकाजनेकाचग्रहणेषु चानुपपत्ति
रिति एकाजनेकाचग्रहणेषु चाहन्निमित्तो
नो एकाजनेकाजग्रहणेषु चाहन्निसंख्यो
नादनेकाच्त्वं भविष्यति तद्यथा समदशामा
मिथेयोभवति त्रिःप्रथमामन्वाह त्रिरुत्त
मामन्वाहेत्याहतेःसमदशान्वं भवति एव
मिहाप्यावृत्तितोः नैकाच्त्वं भविष्यति भवे
दावृत्तितःकार्यं परिहृतेरदेशवल्लुकिर
णाविशिष्टाकोतिःभीमेश्वतिपकानेलत
णमेतोदामत्वं प्राप्नोति यत्तदापिसिद्ध तद
था ऋषिमहृस्वमेकोकपिलामे केकशः
सहस्रकृत्वो दत्तेन सर्वेन सहस्रदक्षिणोभव
ति एवमिहाप्यनेकाचत्वं भविष्यति यद
प्युच्यते द्वाबुद्ध्यपचारःश्रावतिभेवद्य
दसंभवि कार्य ततनानेकोपुनप्रकार्यो
न यत्तसंभविकार्यं येनेकोपि न पुनप
क्नोति तद्यथावरस्यदर्शनस्पर्शनेवास
भविचेदंकार्ये पुकारस्येचोवाणानामाने
कोपि न पुनःपुनःपश्यतीति श्रान्यभावा
न कालशाद्व्यवायात् श्रान्यभावेनकालं

रस्य तूलः कालशब्दव्यवायात् कालव्य।
वायात्तशब्दव्यवायाच्च कालव्यवायादेत्त
र्ते शब्दव्यवायादेतः नचैकस्यात्मनो व्यव
धितमवितव्यं भवतीति चेदात्मभावस्य
रस्य युगपद्देशादृष्टयन्तरदर्शनात् युगप
द्देशादृष्टयन्तेऽप्यदर्शनात् तेन मन्यामहे स्वा
त्मभावमकारस्यापदृष्टदेशादृष्टयन्तादुपल
भ्यते अस्त्रः अर्कः स्रुघ्ने इति नाघोकोदेवद
त्तो युगपत्स्रुघ्ने च भवति मथुरायां चेति य
दि पुनरिमे वर्णाः शकुनिवत्स्युः तद्यथा
शकुनयश्चाप्यगामिन्नात्सरलाटुपालि।
नाः पश्चादृश्यन्ते एवमकारोऽपि वक्त्रस्य मु
रवेऽदृष्टस्याऽपि दृश्येत नैव शक्यः श्रुतिम
त्वमेव स्यात् नित्यः शब्दः नित्येषु शब्देषु कू
टस्थैरविचालिभिर्वर्णैर्भवितव्यमनपा
योपजननविकारिभिः यदि चायं दृष्टस्यान्य
पि दृश्यताऽपि दृश्येत नायं कूटस्थः स्या
त् यदि पुनरिमे वर्णा आदित्यवत्स्युः तद्य
था आदित्य एकोऽनेकाधिकरणस्थो युगपद्देशपृ
थक्त्वेषूपलभ्यते विषमोऽयमुपन्यासः नैको द्र
ष्टा आदित्यमनेकाधिकरणस्थं युगपद्देशपृ
थक्त्वेषूपलभ्यते अकारं पुनरुपलभ्य

श्री
महा
भा
९८

ते अकारमपि नोपलभते किं कारणं
श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभि
ज्वलित आकाशदेशः शब्दः एकं च पुन
राकाशः आकाशदेशा अपि बहवः त
स्मादात्मभावमकारस्य आकृतिग्रह
णान्निहे सर्वाकृतिरूपदिश्यमान
वेनवर्णाकृतेर्ग्रहीष्यति तेषु वर्णाकृ
तिः तयो वर्णाकृतिः न हुत्तरपरक्र
मो एवंचकृत्वा तपराः क्रियन्ते आकृ
तिग्रहणं नाति प्रसक्ष्यमिति कृत्वा नन्
च सवर्णग्रहणं नाति प्रसक्ष्यमिति कृ
त्वा तपराः क्रियन्ते अन्याख्याख्येते न स
वर्णानां ग्रहणम् अपरिभाष्यमाकृतिग्रह।
णात् अनन्यत्वाच्च तद्ग्रहणं भवत्याकृ
तिग्रहणात्सिद्धमित्येव फलेऽफलि स
वानाम्यवाम फलग्रहणं तावदस्य
माम्नायकस्य फलेऽग्रहणं आकृतिग्र
हणाद्भविष्यति अवाने यदेतद् द्विता।
स्याः सर्वाणि ग्रहणानि त्रपुसामा
न्याद्ध त्रपुसामान्यासिद्धमेतत् तद्य
था तैलशब्दः कान्तारकाररयामः अ
मस्तपाणेतात्वआलोतम्ज्जमहेयत्न

गृह्येत नैवेदं भवतः कार्षापणं नष्टमथ
शयोऽस्य हीनमिति अन्यस्मिन्नप्यस्मिन्स्त्र।
न्यसामान्यान्नैवेदमिति ऋद्धिर्भवति य
वमिहापि उपसामान्यात्सिद्धं ऋत्लृक
लृकारोपदेशः किमर्थः किं विशेषेण।
लृकारोपदेशश्चोद्यते न पुनरन्येषां व
र्णानामुपदेशश्चोद्यते यदि किंचिदन्येषा
मपि वर्णानामुपदेशस्य प्रयोजनमस्ति
लृकारस्यापि तद्भवितुमर्हति को वा वि
शेषः अयमस्ति विशेषः अस्यैव हि लृका।
रस्याल्पीयांश्चैव प्रयोगविषयः यश्चापि
प्रयोगविषयः सोऽपि क्लृपिस्थस्य क्लृपेश्च
लत्वमसिद्धं तस्यासिद्धत्वादृकारादेवाच्
कार्याणि भविष्यन्ति नार्थो लृकारोपदेशे
न अतउत्तरं पठति लृकारोपदेशो यदृच्छा
शक्तिजानुकरणप्लुत्याद्यर्थः लृका।
रोपदेशः क्रियते यदृच्छाशब्दार्थः अश
क्तिजानुकरणार्थः प्लुत्याद्यर्थश्चेति य
दृच्छार्थस्तावत् यदृच्छया कश्चि।
ल्लृतको नाम तस्मिन्नच्कार्याणि यथा स्युः
दध्ल्लृतकाय देहि मध्ल्लृतकाय देहि उदक्लृ
तको गमत् प्लक्लृतको गमत् चतुष्ट

श्री
महा
भा·
१५

यी शब्दानां प्रवृत्तिः जातिशब्दा गुणशब्दा
क्रियाशब्दा यदृच्छाशब्दाश्चेति अशक्ति
जानुकरणार्थः अशक्त्या कयाचिद्ब्राह्म
ण्या ऋतक इति प्रयोक्तव्ये लृतक इति
प्रयुक्तं तस्यानुकरणं ब्राह्मण्यलृतक इत्या
हेति कुमार्यलृतक इत्याहेति प्लुत्याद्य
र्थः क्लृप्तक्लृप्तशिखः लृत३ः प्लुतो हि
वचने क्लृप्तशिखः प्रकृत्या क्लृप्त
वान् प्लुत्यादिष्वच्कार्येषु क्लृपेर्लत्वमसि
द्धं तस्यासिद्धत्वादच्कार्याणि सिद्धानीति
नैतानि सन्ति प्रयोजनानि न्याय्याभावा।
कल्पनं संज्ञादिषु न्याय्यस्य ऋतकस्याभा
वाल्लृतकल्पनं संज्ञादिषु साधु मन्यन्ते ऋ
तक एवासौ न लृतकः अपर आह न्या
य्य ऋतको गन्तुः शास्त्रान्वितोऽस्ति तस्य
विलयः साधुसंज्ञादिषु ऋतक एवासौ
न लृतकः अथ तमर्हति यदृच्छाशब्दोऽपि अ
शायाः लृफिडः लृफिड्ड इति एतेऽपि हि
ऋफिड ऋफिड्डश्चैव प्रकृतिरन्तरे
वेदितव्ये ऋफिड ऋफिड्डौ कोऽ
न्ये त्रयी च शब्दानां प्रवृत्तिः जातिशब्दा
गुणशब्दाः क्रियाशब्दाः न सन्ति यदृच्छा

णात्ः श्रुत्वा शास्त्रप्रयोजनमन्यथाक्
ल्पयितारः सतियदत्रशास्त्रशब्दा इतिक्।
त्वाप्रयोजनमस्के तदस्तीतिशिष्टाः स
मानेवार्थे शास्त्रान्वितो शास्त्रान्वितस्याति
वर्त्तको भवति तद्यथा देवदत्तशाकृष्व
स्तिकाश्रुतिनिर्वर्त्यति तस्माद्वाहीत तै
पदोषः पदानेरपिषिस्त्वाराः सति श
ब्दकरणेशिष्टाशिष्टमतिइदेषु यथा।
लौकिकवैदिकेषु शब्दकरणमपिशि
ष्टस्यवासाधुभवत्यशिष्टप्रतिषिद्धस्यवा
नैवदोषायभवतिनाभ्युदयाय यथालौ
किकवैदिकेषु शब्दकरणमपिशिष्ट
स्यवासाधुभवत्यशिष्टप्रतिषिद्धस्यवा।
नैवदोषायभवतिनाभ्युदयाय यथालौ
किकेषु वैदिकेषु चकृतान्तेषु लोकेताव
त् यएवासौ इदानिष्टवासौ यजते एवम
सावपीतइति तस्मात्करणाहृवेदयाज्ञ
यजेत चापीपीतश्च सोऽभ्युदयेनयुज्य
ते वेदेपि यएवेविश्वसृजः सत्राण्यध्या
सतइति तेषामनुकरणात्कुर्वेल्लहन्त्व
ण्यध्यासीत सोऽभ्युदयेनयुज्यते अपि
शास्त्रविदेषु यएवमसौ हिक्रुतिपव।

श्री
महा
भा २

मसौ हलत्येवमसौ कुर्युरितितस्मात्कु
र्वन् हिकोच हसैत्रके कुर्युरचैवास्य
तदोषायस्यान्नाभ्युदयाय यस्तुखल्वे
वमसौ ब्राह्मणान्हन्त्येवमसौ सुरांपिबति
तस्मात्कुर्वन्ब्राह्मणान्हन्यात सुरांपिबे।
त्सोपि मन्येपतितःस्यात् विषमउपन्या
सः यश्चैवहन्ति यश्चानुहन्ति उभौतौह
तः यश्चपिबति यश्चानुपिबति उभौतौपि
बतः यस्तुखल्वेवमसौब्राह्मणान्हन्त्येवम
सौसुरांपिबति तस्मात्कुर्वन्सुरांपिबन्
लितः मालागुणकैः कदलीनेमकिंपा
त्यथोवापिबेन्नसमन्येपतितःस्यात् एव
मिहापि यएवमसावशब्दं प्रयुङ्क्ते इति तस्मा
त् कुर्वन्नपशब्दं प्रयुञ्जीत सोऽपशब्दः स्या
त् अयं तत्त्वोपशब्दपदार्थकः शब्दः यस्य
उपदेशः कर्त्तव्यः नचापशब्दपदार्थकः
शब्दोपशब्दोभवति अवश्यं चैतदेवं
योऽहिमन्यते शब्दपदार्थकः शब्दोपशब्दो
भवतीति अपशब्द इत्येव तस्यापशब्दः।
स्यात् नैषोपशब्दः अस्योपह्नुत्योपि अयोन्न
कत्वाशब्दोपरिष्ठात् यः सदर्थउपदेशः स्या
त् साधुकारकश्यथैते कल्पयन्तेनैतद

नकरणं कृपिस्थस्य यदि दिकृपिस्थस्य
कृपेश्च लत्वमसिद्धं तस्यासिद्धत्वादृका
रस्यैवाकार्याणि भविष्यन्ति भवेल्लदृष्टेन
नार्थः अथ लत्वः कृपिस्थपदार्थकः श
क्षोपदर्थ उपदेशः कर्तव्यः इदमावश्यं।
वक्तव्यं प्रकृतिवदनुकरणं भवतीति किं
प्रयोजनं द्विःपचन्त्वित्याह तिङ्ङतिङः इ
ति निघातो यथास्यात् अग्नी इत्याह ईदू
देद्विवचनं प्रगृह्यमिति प्रगृह्यसंज्ञा य
था स्यात् यदि प्रकृतिवदनुकरणं भव
तीत्युच्यते अपशब्दे विकृतस्यानन्यत्वा
त्तत्रादयः एकदेशविकृतमनन्यवद्भ
वतीति स्त्रन्यादयो भविष्यन्ति यद्येकदे
शविकृतमनन्यवद्भवतीत्युच्यते राजकु
च राजकीयं अल्लोपोनः इत्यल्लोपः प्राप्नोति
एकदेशविकृतमनन्यवद्भवति षष्ठीनि
र्दिष्टस्येति यदि षष्ठीनिर्दिष्टस्येत्युच्यते कृ
मशिवः इति लुतोन प्राप्नोति नह्यत्र कृ
कारः षष्ठीनिर्दिष्टः ऋकारोपि षष्ठीनि
र्दिष्टः कथं अविभक्तिको निर्देशः कृप
उः रः लः कृपोरोलः इति अथवा पुनरस्तु वि
शेषेणानवचोक्त राजकुच राजकीयं

श्री
महा
भा
३१

अल्लोपोनः इत्यकारलोपः प्राप्नोति नैष
दोषः वक्ष्यत्येतत् श्वादीनां प्रसारणे
नकारान्तग्रहणमनकारान्तप्रतिषेधा
र्थमेतत्प्रकृतमुत्तरत्रानुवर्तिष्यते अल्लो
पोनः नकारान्तस्येति इहतर्हि कृमापी
त्वन्निशितिषः प्राप्नोति रप्रतिषेधाच्च
रप्रतिषेधाच्चेन्न सिध्यति गर्गारखनयति
वक्ष्यामि यरवत इति उच्यते होत्रकार।
कारः होत्ल्कार इत्यत्र प्राप्नोति गर्गारखवतो
कृखस्येति वक्ष्यामि सप्तमसूत्रमेदं नल्य।
कारोपदेशः लत्यार्थः मन्यत्राप्यते
षामहतो वंशस्तम्भाल्लट्वानि कृष्यते प
उत्रु-पठेव इहेविचार्यते इमानि सं
त्यागिानपवाणिवोपदेशयन पठेनर
पठेनव प्रति आहोस्विदुपदेशाणित्वा
पद्यान्यासमवायेकस्वारविशेषः सप्त
दोषेघ्नपद्धोपदेशाद्यक्ष्याणां कर्तव्यो
इह वप्रत्याहारः इतिकायनः उत्तरतो स्तम
दिषत्विषिः त्सन्मादिषत्विषिनेसिध्यति
पे ऋत्वाते ला इत्थातो इति अपनाचिद श्र।
वद्धत्तरस्य यरो हमबनतई निर्दिषं चेनशको
तिपराधृत्यवीति इमानि प्राप्नोति कृत्त

संज्ञा च प्लुतसंज्ञा च न सिध्यति ऐ३ति
कायनः औ३पगवः ऋकारः अव ऋस
दीर्घप्लुतसंज्ञो भवतीति प्लुतसंज्ञा न प्रा
प्नोति संध्यक्षराण्यनपराणि अनपराण्य
इग्घ्रस्वादेशे अपनपराणि च इग्घ्रस्वादे
शः प्लुतविकारे किं प्रयोजनं अव ऋस्या
प्रसने अर्ध इकारः अर्ध उकारो मा भू
दिति ननु च यस्यापि परापराणि तेनाप्येत
द्वक्तव्य इमावेचौ समाहारवर्णौ मात्राव
र्णस्य मात्रा इवर्णोवर्णयोः तयोर्ह्रस्वशा
सनेषु कदाचिदवर्णः स्यात् कदाचिदिव
र्णोवर्णौ मा कदाचिदवर्णो भूदिति प
न्त्याख्यायते नैतत् एवोच्चारणं भूयस्यादि
ति यदि प्रत्याख्यायते पत्र इदमपि प्रत्याख्या
यते सिद्धमेतत् इ स्थाने अनादिति ननु च ए
उः स्थाने न तः अर्ध इकारो वा उकारः
नैतौ स्तः यदि हि स्यातां तावेवायमुपदिशे
त् ननु च भोः छन्दोगानां सात्यमुग्रिराणा
यनीया अर्धमेकारमर्धमोकारं चाधी
यते सुजाते अश्वसूनृते अध्वर्यो अद्रि
भिः सुते शुक्रं ते अन्यदिति पार्षदकृति
रेषा तत्रभवतां नैव हि लोके नैवान्यवे

श्री
महा
भा
२२

दे अर्ध एकारो वास्ति एकादेशे दीर्घग्रह
णे एकादेशे दीर्घग्रहणं कर्तव्यं आद्गु
णो दीर्घ इति ह्रस्वे हि दीर्घ इति किं प्रयो
जनं आन्तर्यतस्त्रिमात्रचतुर्मात्राणां
स्थानिनां त्रिमात्रचतुर्मात्रादेशा मा
भूवन्निति खट्वा इन्द्रः खट्वेन्द्रः खट्वा उद
कं खट्वोदकं खट्वा ईषा खट्वेषा खट्वा एल
का खट्वैलका खट्वा ओदनः खट्वौदनः
खट्वा ऐतिकायनः खट्वैतिकायनः ख
ट्वा औपगवः खट्वौपगवः तत्र हि दीर्घ
ग्रहणं कर्तव्यं न कर्तव्यं उपरिष्टाद्योग
विभागः करिष्यते अकः सवर्णे दीर्घः इको भ
वतीति ततो दीर्घः दीर्घश्च भवति यथा
कः स्थानिनो निर्दिष्ट इति इह
पितॄन् प्राप्नोति पञ्चविंशतिचत्वारिंशेष
दोषः इकारापत्तावप्युक्तमिति अयमक
रीयता सिद्धं सोऽयमेवं सिद्धे सति यत्पूर्व
ग्रहणं करोति तस्यैतत्प्रयोजनं यथाजा
तीयकः पूर्वस्तथाजातीयक उभयोर्य
था स्यादिति किं कृतं भवति एवं ऋत्वा
तेन अग्न्यवाचाये पर इति कोपयति सा
नेन संप्रसारणस्य दीर्घो भवति यदेवं

लृऊतरस्यसंप्रसारणस्यदीर्घंशास्ति प
चेतीति अतोगुणेपररूपइतीयतासिद्धे
सोयमेवंसिद्धेसतियद्रूपग्रहणंकरोति
तस्यैतत्प्रयोजनं यथाजातीयकंपरस्य
रूपंतथाजातीयकंपूर्वस्ययथास्यादि
ति इहतर्हि खट्वर्श्यमालर्श्यइति दी
र्घइतिवचनादकारेण आन्तर्यादेका
रोकारेण नत्वकोदोषः विगृहीतस्य
अग्रवर्णप्रसङ्गेन नष्टमः यत्रक्रियमा
णेदीर्घग्रहणेदोषस्तत्रकर्तव्यमिति किं
नहियत्रक्रियमाणेनदोषस्तत्रकर्तव्यं
यत्रक्रियमाणेनदोषः संज्ञाविधौ ह
हिणादेच्छदीर्घः अदेङ्गुणः दीर्घइति न
नहिदीर्घग्रहणंकर्तव्यंनकर्तव्यं कस्मा
दानन्तर्यतः त्रिमात्रचतुर्मात्राणांस्थानि
नांत्रिमात्रचतुर्मात्राआदेशाभवेतितप
रेशाणहदी ननुचनःपरोयस्मात्सोयं
तपरइति नेत्याह तादपिपरस्तपरइ
ति यदितादपिपरस्तपरः ऋदोरवि।
तीहैवस्यात् यवः स्तवः लवः पवइत्य
त्रनस्यात् नैषतकारः कस्तर्हि दकारः
किंदकारेप्रयोजनं अथतकारेकिंप्र

श्री
महा
भा
२३

योजनं यद्यसंदेहार्थस्तकारः दकारो
पि अथमुखसुखार्थः तकारः दकारो
पि इदंविचार्यते यएतेवर्णैकदेशावर्णा
न्तरसमानाकृतयः तेषामवयवग्रहणे
स्याद्वानवेतिविचारणा कुतः पुनरियं
विचारणा इहसमुदायाअप्युपदिश्यं
तेऽवयवाअपि अभ्यन्तरश्चसमुदायेव
यवः तद्यथा वृक्षः प्रचलन्सहावयवैः
प्रचलति तत्रसमुदायस्यस्यावयवस्या
वयविग्रहणेनग्रहणंस्याद्वानवेतिवि
चारणा कश्चात्रविशेषः वर्णैकदेशा
वर्णग्रहणेनचेत्संध्यक्षरेसमानाक्षरवि
धिप्रतिषेधः वर्णैकदेशावर्णग्रहणेन
चेत् संध्यक्षरेसमानाक्षराश्रयोविधिः
प्राप्नोति सप्रतिषेध्यः अग्नेइन्द्रवायू
दकं अकःसवर्णेदीर्घत्वंप्राप्नोति दी
र्घप्रतिषेधः दीर्घेह्रस्वाश्रयोविधिः दी
र्घेह्रस्वाश्रयोविधिःप्राप्नोति सप्रतिषे
ध्यः ग्रामणीःआरभ्य ह्रस्वस्यपितिकृ
तितुगिति तुक्प्राप्नोति नैषदोषः आचार्य
प्रवृत्तिर्ज्ञापयति दीर्घेह्रस्वाश्रयोविधि
र्नभवतीति यदयंदीर्घाच्छेतुकंशास्ति

नैतदस्तिज्ञापकंअस्तिह्यन्यदेतस्य
वचनेप्रयोजनंकिंप्रदोतांहेत्यैवह्यपान
इहतर्हि खट्वाभिःमालाभिरित्यत्रा
तोभिसऐसित्यैस्भावःप्राप्नोति तप
रकरणसामर्थ्यान्नभविष्यति इहत
र्हियातावातेस्यतोलोपःप्राप्नोत्यनक
रस्यतोलोपःप्राप्नोति नन्वचापि
तपरकरणसामर्थ्यादेवनभविष्यति
अस्मात्तपरकरणप्रयोजने किंसर्व
स्यलोपोमाभूदिति अक्रियमाणेहि
तपरेपरस्यलोपेकृतेसर्वस्यकस्मान्न
भवति परलोपस्यस्थानिवद्भावात्
प्रसिद्धत्वाच्च एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञा
पयति नाकारस्यस्याकारस्यलोपोभ
वतीतियदयमातोनुपसर्गेकइतिक
कारमनुबन्धंकरोति कथंकृत्वाज्ञाप
कं किंककरणएतत्प्रयोजनं कितीत्या।
कारलोपोयथास्यात् यदिचाकारस्यस्या
कारस्यलोपःस्यात् किंककरणमनर्थकं
स्यात् परस्याकारस्यलोपेकृतेद्वयोरका
रयोःपररूपेणसिद्धंरूपंस्यात् गोदःकंब
लदइति पश्यतित्वाचार्योनाकारस्यस्या

कारस्यलोपइति ततःककारमनुबन्धं
करोतिनैतदस्तिज्ञापकं उत्तरार्थमे
तत्स्यात् तुन्दशोकयोःपरिमृजापनु
दोरिति यत्तर्हिगापोष्टगित्यनन्यार्थं
ककारमनुबन्धंकरोति एकवर्णवच्च
एकवर्णवच्चदीर्घोभवतिवक्तव्यं किं
प्रयोजनंवाचातरतीति ठन्लक्षण
श्चमाभूदिति इहचवाचोनिमित्तंसं
योगउत्पातोवेतिठञ्लक्षणोयन्मा
भूदिति अथोपिपातोगरूणाम्ज्ञापकं
नदीर्घोतरस्यतल्लक्षणविधिर्भवतीति।
अयंतुसर्वेषामेवपरिहारः नाव्यवस।
स्थकस्यावयवेतद्विधिर्यथाद्रव्येषु ना
नावयवस्यकस्यावयवस्यावयवाश्रयोवि
धिर्भवतीतियथाद्रव्येषु तद्यथा द्वा
दशमदशामासिमेस्यामवेतीति नचस
मरत्सरस्त्रिमात्रेकात्प्रमणावस्थापोपयते
विषमउपमासः प्रत्स्थेवैवरित्रिनकर्मे
चोद्यते अयंभवस्थ्योगोवेध्यावथयायात।
हिमाद्देशामात्रोगामस्यःसमिधोश्याद
धीतनसमदशासादेशामात्रेकाश्रमणाव
भ्याधीयतेअयाणिपृतिस्माणंवेकर्मचोद्यते

तल्पस्यास्मिन्भवो ग्रैवेयश्च यथा तर्हि तैते
न विकृतेन त्वं हतेन विकृतेन त्वमिति त्ववष्ट
केन विक्रीयते अथ वष्टकेनावस्तर्षे।
पाशु विक्रीयते यथा लोमनं वस्त्रश्चा
वे कर्तव्यमिति त्ववष्टकेस्थ्नस्थाने योगात्
कर्तव्यं अथ वष्टककाम चार्ये यथा व्याव
पकौ क्लिसं प्रवरेषु विकृतत्वात् यथा वा।
र्णौ विवृततरं तदन्यस्मात्प्रत्ययोर्वर्णा
र्णौ न विवृततरे तेभ्य एवान्याभ्यामिवर्णो
वर्णाभ्यां अथ वा एतनेन ऋदौ ते अग्रह
णं चेन्नुड्विधिलादेशविनामेष्वृकारग्रहणं
अग्रहणं अग्रहणं चेन्नुड्विधिलादेशवि
नामेष्वृकारग्रहणं कर्तव्यं तस्मान्नुड्विहि
लः ऋकारे चेति वक्तव्यं इहापि यथा स्या
त् आनृधतुः आनृधुरिति यस्य पुनर्गृह्य
ते हि हलः इत्येव तस्य सिद्धं यस्यापि न गृ
ह्यते तस्याप्येष न दोषः हिहलग्रहणं न
करिष्यति तस्मान्नुड्ढवतोरेव यदि क्रि
यते आटतुः आटुरित्यत्रापि प्राप्नोति
अश्नोतिग्रहणं नियमार्थं भविष्यति अ
श्नोतेरेवावर्णोपधस्य नान्यस्यावर्णोपध
स्येति लादेशे च ऋकारग्रहणं कर्तव्यं

इहापि यथा स्यात् क्लृप्तः क्लृप्तवानिति य
स्य पुनर्गृह्यते तस्य रः इत्येव सिद्धं यस्यापि न
गृह्यते तस्याप्येष न दोषः ऋकारो यत्र नि
र्दिश्यते कश्च विभक्तिको निर्देशः कृप
नः रः लः कृपो रो ल इति अथ वा भवतः स्फो
टमात्रं निर्दिश्यते रश्रुतिर्लश्रुतिर्भवतीति
विनामे च ऋकारग्रहणं कर्तव्यं रषाभ्यां
नो णः समानपदे ऋकाराच्चेति वक्तव्यं इहा
पि यथा स्यात् मातॄणां पितॄणामिति यस्य
पुनर्गृह्यते तस्य रषाभ्यामित्येव सिद्धं न सि
ध्यति यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वात्
अथ वा एतदेव भविष्यति न सिध्यति वर्णैक
देशाः हि के वर्णग्रहणेन गृह्यन्ते यथा वशको
अपि वर्णो भवति यद्यत्रेफात्परं तेन तत्र
विरहितवावस्थैकं दृश्यते एवं तर्हि योगवि
भागः करिष्यते रषाभ्यां नो णः समानपदे
ततो व्यवायेऽव्यवाये चतलो रषाभ्यां नो णो
भवतीति ततः ऋवर्णान्नुमिति इदमि
दानीं किमर्थं नियमार्थं एतेरेवावलम्ब्या
यपठितैः व्यवाये मा भूदिति यस्यापि न गृह्य
ते तस्याप्येष न दोषः आचार्यप्रवृत्तिर्ज्ञाप
यति भवति ऋकारान्नणत्वमिति यदयं क्षु
भ्नादिषु नृनमनशब्दं पठति नैतदस्ति ज्ञाप

केहलर्थमेतत्स्यात् नानमतिरिति यत्र
हिहलोनिशाहेयद्वतियस्यापित्रनमनशा।
हेयरति नवचोकेहलर्थमेतत्स्यादिति
बहिरंगाहहिः अतंरंगाणानेत्रसिद्धे बहिरं
गामेगारयेग्रश्यबोपरिशायोगविभागः क
रिष्यते अतंतः णोणाभवति ततः ह्लस्य
वग्रहात् अतंतरस्येवस्ततावेचरहनो अत
श्चवक्तव्यं यस्यापुनर्लिहं तेनयोजेः त्वस्या
तस्यसिद्धं यस्यापितस्थहंतेनतस्याप्यवरो
धः क्रियतएतन्यासएवतत्स्यरूपेसंयोगादि
वोजनविधिः तस्यरूपेसंयोगादिव्यंजना।
प्रयोविधिर्नेसिध्यति कुक्कुटः पिप्पिका
पिलामितियस्यपुनर्लिहं तेनतस्याहोकका
रोतस्याहोपकारोयस्यापितस्थहंतेनतस्या।
पिह्वोककारोहोपकारोहोनकारो कुंथ
मात्राकालोगम्यते नचमात्रकंव्यंजन
मस्ति अन्नपदिष्टस्मकथंशक्यंप्रतिज्ञातं
ययापितावदेतेनकककंयकके ययैतन्नास्ति
ग्रणासवर्णानगृह्णातीतिह्रस्वकथंसं
ध्याता संवत्सरः तस्लोकेयशलोकमितितस्य
तदस्याणसवर्णानगृह्णातीति अत्रापि
मात्राकालोगम्यते नचमात्रकंव्यंजनम

श्री
महा
भा
२९

स्ति अस्मत्कथंशक्यंप्रतिज्ञातं हयवरट्
सर्वेवर्णाः सकृदुपदिष्टाः अयंहकारो
द्विरुपदिश्यते पूर्वश्चैवपरश्च यदिपुनः
पूर्वएवोपदिश्येत परएववा कश्चात्रविशे
षः हकारस्यपरोपदेशेऽड्ग्रहणाश्वग्रह
णे हकारस्यपरोपदेशेऽड्ग्रहणेहग्रहणंकर्तव्यं
आनोहिनिरुद्य शाक्कोद्दिरोचारटिसमा
नपदेहकारेचेतिवक्तव्यं इहापियथा
स्यात् महोदिमः उलेचउत्वेचहकारग्र
हणंकर्तव्यं अतोरोरप्लुतादप्लुते हशि
चहकारेचेतिवक्तव्यं इहापियथास्यात्
पुरुषोहसतीति अथलतदिह पूर्वोपदेशः
पूर्वोपदेशेकिंप्रयोजनं कित्वेद्वियो फलग्रहणा
निच यदिपूर्वोपदेशः कित्वेविशेषं स्नि।
हित्वा स्नेहित्वा सिस्निहिषति सिस्नेहिषति रलो
व्युपधादितिकित्वंनप्राप्नोति कस्तुवि
शेषः अलिक्षत् अधुक्षत् शलइगुपधादनि
टः क्सइतिक्सोनप्राप्नोति इहविशेषः
कदिहित्स्वपिहि बलादिलक्षणाऽप्रा
मोति फलग्रहणानिचकिं अहकारका
रास्युः तवकोदोसः फलोफलीति इ
हनस्यात्प्रदाग्रानस्मात्स्वैवैवोपदेश

व्यः इदं विचार्यते अयं रेफो यकारव
काराभ्यां पूर्व एवोपदिश्येत हरयवडि
ति पर एव वा यथान्यासमस्त्विति कश्चात्र वि
शेषः रेफस्य परोपदेशे अननुनासिकद्विर्वच
नपरसवर्णानां प्रतिषेधो वक्तव्यः अनु
नासिक स्वर्नयति प्रातर्नयति परेणाननुना
सिकेनानुनासिको वा मा भूदननुनासिकः प्राप्नो
ति द्विर्वचने मद्रह्रदो भद्रह्रदः यर इति
द्विर्वचनं प्राप्नोति परसवर्ण कुण्डरथेन
वनरथेन ययीति परसवर्णः प्राप्नोति अ
स्तु तर्हि पूर्वोपदेशः पूर्वोपदेशे किन्त्वप्र
तिषेधो व्यलोपवचने च यदि पूर्वोपदेशः
किन्त्वप्रतिषेधो देवित्वा सेवित्वा दिदेविष
ति सिसेविषति रलो व्युपधादिति कित्त्वं
प्राप्नोति नैवं विज्ञायते रलः व्युपधादिति
कथं तर्हि रलः व्युपधादिति किमिदम
व्युपधादिति उवकाराभ्यामुपधा व्युप
धादिति व्यलोपवचने च व्योश्च लोपो व
क्तव्यः गौधेरः पचेरन् यजेरन् जीवेरदा
नुः कल्लीवदानुः वलीति लोपो न प्राप्नोति
नैष दोषः रेफोऽप्यत्र निर्दिश्यते लोपो व्योर्व
लीति रेफवकारयोरिति अथवा पुनरस्तु परो

श्री
महा
भा
२२

पदेशः ननु चोक्तं रेफस्य परोपदेशे अननुना
सिकद्विर्वचनपरसवर्णप्रतिषेध इति
अननुनासिकपरसवर्णयोस्तावत्प्रतिषे
धो न वक्तव्यः रेफोष्मणां सवर्णा न सन्ति
द्विर्वचनेऽपि नैमौ रहौ कार्यिणौ द्विर्वचनस्य
किं तर्हि निमित्तमिमौ रहौ द्विर्वचनस्य न
च निमित्तं कार्यि भवति तद्यथा ब्राह्मण
भोजे माठरकौण्डिन्यौ परिविवेशामिति
नेदानीं तौ भुञ्जाते इमे अयोगवाहा न क्व
चिदुपदिश्यन्ते श्रूयन्ते च तेषां कार्यार्थ उप
देशः कर्तव्यः के पुनरयोगवाहाः विसर्ज
नीयजिह्वामूलीयोपध्मानीयानुनासिक
यमाः कथं पुनरयोगवाहाः यदयुक्ता
वहन्त्यनुपदिष्टाश्च श्रूयन्ते क्व पुनरेषामुप
देशः कर्तव्यः अयोगवाहानामट्सु ण
त्वे अयोगवाहानामट्सूपदेशः कर्तव्यः किं
प्रयोजनमस्मिन् उरःकेण उरःकेणा उरःपे
णा उरःपेणा शर्षु जश्भाव इति तानिमान्भवे
ति जश्भावषत्वे चर्षूपदेशः कर्त
व्यः किं प्रयोजनं जश्भावषत्वे अयम
ब्जिरुपध्मानीयोपधः पठ्यते तस्य जश्त्वेकृ
ते उब्जिता उब्जितुं इत्येतद्रूपं सिध्यति

रिति यच्छपद्यमानीयोपधः प्रश्नाने उज्झि
षिषतोन्यपद्यमानीयादेर्द्विर्वचनं प्राप्नोति
रकारोपधेषु कः सति नहः संयोगाद
यः इति प्रतिषेधः सिद्धो भवति यदिह का
रोपधः प्रश्नाने कान्येपसिद्धिः उज्झितानु
ज्झितामिति अभिद्धेमरु क्षेः इदमपिस्तो
स्तुनास्तुरिति ततोवक्ष्यामि उभेइउन्ने स्तु
नासन्निपातोभवतीति तन्महिर्वक्तव्यं
नवक्तव्यं निपातनादेतत्सिद्धं किंनिपा
तनं भत्ननश्रन्नोपाल्लप्रपानयोरिति रहा
पितर्हि प्राप्नोति प्रभ्रक्षः समक्षः इति प्रकृ
तविषयनिपातनं अथवा नैतज्ज्ञेरपे
गमेरेष्वपसर्गाद्वेविधीयते प्रभ्रक्षतः
प्रभ्रक्षः समक्षतः समक्षः इति यत्व च
त्वप्रयोजनं सर्पिष्षु वर्हिष्षु धाष्यावायवः
तिषत्वे सिद्धं भवति तन्मिसर्जनीयशष्य
वायवीति विसर्जनीयग्रहणं न कर्तव्यं भ
वति नन्वेषितर्हि ग्रहणशाकत्यमकर्तं क
थं सर्पीषि यजूंषि प्रजानस्वारकतेशष्व्यवा
यइतिसिद्धं अवशं नन्वोग्रहणं कर्तव्यं अ
नस्वारविशेषणार्थं नन्मोयोनस्वारस्तेनैव
यथास्यात् इदमाभृत प्रसित्वि अथवा।

श्री
महा
भा
२८

प्रविशेषणोपदेशः कर्तव्यः किंप्रयोज
नं प्रविशेषण्योः संयोगोपधासंज्ञालोप
विधिर्द्विर्वचनस्थानिवत्प्रतिषेधाः प्रवि
शेषणं संयोगसंज्ञाचप्रयोजनं ऊरुज्ञा।
कः हलोनन्तराः संयोगः इति संयोगसंज्ञा सं
योगे गुरु इति गुरुसंज्ञा गुर्वीरितिस्तलोप
धायास्यात् उपधासंज्ञाचप्रयोजनं निष्कु
ते इष्कृते निष्पीते दुष्पीते इदुदुपध
स्यचाप्रत्ययस्येति षत्वं सिद्धं भवति नैत
दस्ति प्रयोजनं नइदुदुपधग्रहणेन वि
सर्जनीयो विशेष्यते किंतर्हि सकारो वि
शेष्यते इदुदुपधस्य सकारस्य यो विसर्ज
नीयः इति अथवोपधाग्रहणेन क्रियते
इदुद्भ्यांपरो विसर्जनीयो विशेष्यते भमः
इदुद्भ्यामनन्तरस्य विसर्जनीयस्येति अलो
न्त्यविधिश्च प्रयोजनं वृक्षस्तत्र लक्ष
स्तत्र अलोन्त्यस्य विधयो भवन्तीत्यन्त्य
स्य सत्वे सिद्धं भवति पत्वद्वयेन नास्ति प्र
योजनं निर्दिश्यमानस्यादेशा भवन्ती
ति विसर्जनीयस्यैव भविष्यति द्विर्वच
ने च प्रयोजनं [illegible] नविच
श्चतुन्नरस्य यरोऽद्भवतइति द्विर्वचनं

सिद्धं भवति स्थानिवत्प्रतिषेधश्च स्थानि
कृद्भावस्य च प्रतिषेधः प्रयोजनं यथेह भ
वति उरस्केन उरस्त्रेण अद्भ्यस्वावाशनि
नमेवाभिहापि स्थानिवद्भावात्प्राप्नोति सु
दोरस्केन महोरस्केनेति अत्राप्यल्विधावि
ति प्रतिषेधः सिद्धो भवतीति किं पुनरि
मे वर्णाः अर्थवन्तः आहोस्विदनर्थकाः अ
र्थवन्तो वर्णाः कुतः धातुप्रातिपदिकप्रत्य
निपातानामेकवर्णानामर्थदर्शनात् धा
तवः एकवर्णाः अर्थवन्तः एति अध्येति अ
धीते इति प्रातिपदिकान्येकवर्णान्यर्थव
न्ति आभ्यां एभ्यः एषु प्रत्ययाः एकवर्णा अ
र्थवन्तः औपगवः कापटवः निपाता एक
वर्णा अर्थवन्तः अ अपेहि इ इन्द्रं पश्य धा
तुप्रातिपदिकप्रत्ययनिपातानामेकवर्णा
नामर्थदर्शनान्मन्यामहे अर्थवन्तो वर्णा
इति वर्णव्यत्यये चार्थान्तरगमनात् वर्ण
व्यत्यये चार्थान्तरगमनान्मन्यामहे अर्थव
न्तो वर्णा इति कूपः सूपः यूपः ककारे
णा कश्चिदर्थो गम्यते ककारापाये सका
रोपजनने चार्थान्तरं गम्यते सूप इति सका
रापाये यकारोपजनने चार्थान्तरं गम्यते यू

प इति तेन मन्यामहे यः कूपे कूपार्थः
स ककारस्य यः सूपे सूपार्थः स सका
रस्य यः यूपे यूपार्थः स यकारस्येति वर्णा
नुपलब्धौ चानर्थगतेः वर्णानुपलब्धौ
चानर्थगतेर्मन्यामहे अर्थवन्तो वर्णा इति
वृक्षः ऋक्षः काण्डीरः ताण्डीरः वृक्ष इति
स वकारे कश्चिदर्थो गम्यते वकारापा
ये सोऽर्थो न गम्यते काण्डीर इति सकका
रे कश्चिदर्थो गम्यते ताण्डीर इति सकका
रापाये सोऽर्थो न गम्यते किं तर्हि उच्य
तेऽनर्थगतेरिति न साधीयः अत्राप्यर्थग
तिर्भवति एवं तर्हि इदं पठितव्यं वर्णा
नुपलब्धौ चानर्थगतेरिति किमिदम
नर्थगतेरिति तस्यार्थः अनर्थः अनर्थ
स्य गतिः अनर्थगतिः न अनर्थगतिः अ
नर्थगतिः अनर्थगतेरिति तत्तर्हि
तथा निर्देशः कर्तव्यः न कर्तव्यः उत्तरप
दलोपोऽत्र द्रष्टव्यः तद्यथा उष्ट्रमुखमिव मु
खमस्य उष्ट्रमुखः एवमनर्थगतेः
अनर्थगतेरिति संघातार्थवत्त्वाच्च संघा
तार्थवत्त्वान्मन्यामहे अर्थवन्तो वर्णा इति
यदेषां संघाता अर्थवन्तः अवयवा अप्यर्थ

वेतस्तेषां समुदायाश्चाप्यर्थवन्तः तद्यथा
एकश्चक्षुष्मान्दर्शनेन समर्थः तत्समु
दायाच्च शतमपि समर्थं एकश्च तिलस्तै
लदाने समर्थः तत्समुदायाश्च खारीशतमपि
समर्था भवति येषां पुनरवयवा अनर्थ
काः समुदाया अपि तेषामनर्थकाः त
द्यथाः एकोऽन्धो दर्शनेऽसमर्थस्तत्समुदा
याश्च शतमप्यसमर्थं एका च सिकता तै
लदानेऽसमर्था तत्समुदायाश्च खारीशत
मप्यसमर्थं यदि तर्हीमे वर्णा अर्थवन्तः
अर्थवत्कृतानि प्राप्नुवन्ति कान्यर्थवत्कृ
तानि अर्थवदधातुरप्रत्ययः प्रातिपदि
कमिति प्रातिपदिकसंज्ञा प्रातिपदिका
दिति स्वाद्युत्पत्तिः सुबन्तं पदमिति पदसं।
ज्ञा तत्र को दोषः पदस्येति नलोपादीनि प्रा
प्नुवन्ति वनं धनमिति संघातस्यैकार्थ्या
त्सुबभावो वर्णात् संघातपाचकवदर्थः
तेन वर्णात्सुबुत्पत्तिर्न भविष्यति अनर्थ।
कास्तु प्रतिवर्णमर्थानुपलब्धेः अनर्थका
स्तु वर्णाः कुतः प्रतिवर्णमर्थानुपलब्धेः न
हि प्रतिवर्णमर्था उपलभ्यन्ते किमिदं प्रतिव
र्णमिति वर्णं वर्णं प्रतिवर्णं वर्णव्यत्यया

श्री
मह
भा
३

पायोपजनविकारेष्वर्थदर्शनात् वर्णव्य
त्ययापायोपजनविकारेष्वर्थदर्शना
न्मन्यामहे अनर्थका वर्णा इति वर्णव्यत्य
यः कृतेस्तर्कः कासेः सिकताः हिंसेः सिंहः
वर्णव्यत्ययेनार्थान्तरगमनं अपाये लोपः
घ्नन्तीत्यत्र अघ्नन् वर्णापायेनार्थापायः
उपजनः आगमः लविता लवितं वर्णो
पजनेनार्थोपजनः विकारेनार्थान्यथाभा
वः घातयति घातकः वर्णविकारेणार्थ
विकारः यद्येव वर्णव्यत्ययापायोपजनविका
रा भवन्ति तदर्थस्यात्ययविकारोपजनवि
कारैरपि भवितव्यं नचेत्सन्ति अनर्थका
वर्णा इति उभयमिदं वर्णेषूक्तं अर्थवन्तो
वर्णाः अनर्थकाश्चेति किमत्र न्याय्यं उभ
यमित्याह कुतः स्वभावतः तद्यथा समा
नमीहमानानामधीयानानां केचिदर्थैर्युज्य
न्ते अपरे न चेदानीं कश्चिदर्थवानिति कृ
त्वा सर्वैरर्थवद्भिः शक्यं भवितुं एवमिहा
तिपदिकप्रत्ययनिपातानामेकवर्णा अर्थवन्तो
अतोन्येऽनर्थका इति स्वाभाविकमेतत्
यं यदुभयवतां वर्णानामर्थवत्त्वमाश्रित्य
द्वोपदिष्टः अर्थवन्तो वर्णाः धातुप्रातिपदि

कतिपयानामेकवर्णानामर्थदर्शनात्
वर्णव्यत्यये चार्थान्तरगमनात् वर्णानु-
पलब्धौ चानर्थगतेः संघातार्थवत्त्वेति संघा-
तार्थान्तराण्येव नान्यथान्तरे प्रवर्तन्ते कूपः
सूपः यूप इति यदि हि वर्णव्यत्यये कृतम-
र्थान्तरगमनं स्यात् भूयिष्ठः कूपार्थः सू-
पे स्यात् सूपार्थश्च कूपे कूपार्थश्च यूपे
स्यात् सूपार्थश्च कूपे सूपार्थश्च यूपे सूपा-
र्थश्च सूपे यतस्त्वेवं तन्न किंचित् कूपस्य
वा सूपे सूपस्य वा कूपे कूपस्य वा यूपे यूपस्य
वा कूपे सूपस्य यूपे यूपस्य वा सूपे अतो म-
न्यामहे संघातान्यर्थान्तराण्येवेमान्यर्थान्तरे
प्रवर्तन्त इति इदं खल्वपि भवतो वर्णानाम-
र्थवत्त्वे नानुबन्धनामसामान्ये योऽनर्थकत्वे योऽनिते
दोषो हि मन्यते यः कूपे कूपार्थः सककारस्य
यः सूपे सूपार्थः ससकारस्य यो यूपे यूपार्थ-
स्य यकारस्य उपसंहृतस्यानर्थकत्वं स्यात्
न चेदमपहृते संघातार्थवत्त्वेति एतस्मात्
प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति अर्थव-
णऽङ्गुल्कपटोऽकूपेटोच प्रत्याहारे तत्र यथा
तोकस्य मध्यग्रहणेन पदेनैव तत्सन्याहा-
रार्थस्तवबन्धः क्रियते पदेषामवग्रहणा

नो ग्रहणं कस्मान्न भवति किं च स्यात्
दधि णकारीयति मधु णकारीयति इ-
को यणचीति यणादेशः प्रसज्येत आ-
चारात् किमिदमाचारादिति आचार्याणा-
मुपचारात् नैतेष्वाचार्यो अनुबन्धकार्या-
णि करोति न चैतेः अप्रधानत्वात् न खल्वपि
तेषामर्थापायेनोपदेशः क्रियते कृत-
हि तस्य ऊनपतनं पचनतो वाऽर्थस्याप्र-
लीलक्षते यत्र सजातीयस्तत्र सजाती-
ये रुपदेक्ष्यति अचः अच हलः हल्-
लोपस्त्वलवमः लोपः खल्वपि नाव-
श्यं भवति ऊकालो जितिवा पाणात्
कालानामग्राभवेत् अचोग्रहणमत्र
कार्यते नैषां न भविष्यति अथवा योग-
विभागः करिष्यते ऊकालोऽच् ऊऊऊ
३ इत्येषां कालेन भवति ततो ह्रस्वदीर्घ-
प्लुताः ह्रस्वदीर्घप्लुतसंज्ञं भवति ऊका-
लो च एवमपि सं भवति ऊ ऊ ऊ३ इत्य-
ज्ञापि प्राप्नोति तस्माल्लौकिकमेव परिह-
रः अपरं पाठ्यं पदवार्थः इलादीनां च
नान्याथावनावदेवयोगस्त प्रकार्या-
णि पश्यामस्तकालेऽपि तत्कार्याणि अप

किमर्थोनस्यानामत्तास्त्रुपदेशः क्रिय
ते इह सेय्यन्तासंछन्नरः तं लोकं यल्ले
कम्मिति परसवर्णास्यासिद्धत्वात् अनु
स्वारस्यैवद्दि द्विवचनं नचपरस्यपरसवर्णे
कृतेनस्यापग्रहणेनग्रहणान्नुवस्यापि
परसवर्णोयथास्यात् नैतदस्ति प्रयोज
नेवद्यपिवनत् द्विवचने परसवर्णोऽसि
द्धवक्तव्यः यावतासिद्धत्वमच्यातेपरसव
र्णोपवतान्नुवैभवति परसवर्णेनहि कृ
तेयस्यापग्रहणेनग्रहणात् द्विर्वचनेयथा
स्यात् सीम्नृ द्विवचने नत्वचभेदोभवति
सतिद्विवचनेत्रियकारे असति द्वियकारे
नास्तिभेदः सत्यपि द्विवचने द्वियकारमे
वकथं हल्लोपमा यमांतिलोपेनभवित
व्यं एवमपिभेदः सति द्विवचने कदाचि
द्वियकारं कदाचित्त्रियकारं असति द्वि
यकारमेवमपथकथं भेदोनस्यात् यदि
हि नित्योलोपः स्यात् विभाषा च सलोपः
यथाभेदस्तथास्तु अन्नवर्तते विभाषा
यानविचहारयतायेद्विवे यदयशरोची
तिद्विवचनप्रतिषेधयाप्तिनतल्लोपय्य।
स्याचार्यः अनुवर्तते विभाषेतिकथं कृ।

श्री
महा
भा
३२

ताज्ञापकं नित्ये हि तस्यलोपेनकश्चिद
र्थोनिषेधेन यदिहि नित्योलोपः स्यात्प्र
तिषेधवचनमनर्थकं स्यात् अस्त्वद्वि
र्वचने करोकारिसवर्णा इति लोपो भवि
ष्यतिपश्यति त्वाचार्यः विभाषासलोप
इति ततोद्विवचनप्रतिषेधं शास्ति नै
तदस्तिज्ञापकं नित्येहिलोपेवशेषप्र
तिषेधोवक्तव्यः यद्विनदयोरह्यास्यामिति
द्विवचने लोपापवादः सविज्ञापते कथ
मेवमिनस्यात एतावदत्रापरः यत्ततफ
शवाययमाकथयरिच्यात्रनित्योलोपः स्यात्
द्विवचनमनर्थकं स्यात् किंतुहि तु योगौ
यो कृदाहरणं यद्यनेनद्विवचनेन विभे
जनसंयोगः प्रत्ययस्वते विज्ञेयमिति इहदा
नीकर्ता हनेतितिद्विवचनसामर्थ्याल्लोपेन
भवितव्यं यथा च द्विवचनसामर्थ्याल्लो
पेनभवितव्य मिहापिलोपोनस्यात् कथं
तिर्हषिनीतितस्यास्त्विनिष्पिलोपेवशेषप्र
प्रतिषेधोवक्तव्यः नैतदस्तिसंहितायां
चोर्यायामनुवर्तते विभाषानवेति लोपा
अयेणकारो द्विरनुवर्त्याने सर्वे अनुपरा
अग्रमाणग्रहणोषाणाग्रहणोपचसेदो

भवति सर्वैणवासः परेणैवेति कतर
स्मिंस्तावद्ग्रहणे संदेहः हल्लोपे सर्वे
स्य च दीर्घ इति असंदिग्धं सर्वेणापरेण
कृतपनतपराभावात् नहि हल्लोपपरे
णः सन्ति ननु चायमस्ति ग्रामेष्ठे ग्रामट
मिति एवं तर्हि सामर्थ्यात् अण्ग्रहणसा
मर्थ्यात्सर्वेणानपरेण यदि परेण स्यादण
ग्रहणमनर्थकं स्यात् हल्लोपो ह्येष्व च दी
र्घाच्च इत्येव सिद्धं स्यात् अथ्यैवं तदपि न सिध्या
त् अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति
अस्मिंस्तर्ह्यण्ग्रहणे संदेहः केऽण इति अ
संदिग्धं सर्वेणानपरेण कृतपनत नहि
केपराणः सन्ति ननु चायमस्ति गोकानी
केति एवं तर्हि सामर्थ्यात् अण्ग्रहणसा
मर्थ्यात् सर्वेणानपरेणेति यदि हि स्यादण
ग्रहणमनर्थकं स्यात् के च इत्येव सिद्धं स्यात्
अथ्यैवं तदपि न सिध्यात् अचो ह्येतद्भवति
ह्रस्वो दीर्घः प्लुत इति तर्ह्यण्ग्रहणे संदेहः
केऽण इति असंदिग्धं सर्वेणानपर कृतप
नत नहि केपराणः सन्ति ननु चायमस्ति
गोकानीकेति एवं तर्हि सामर्थ्यात् अण
ग्रहणसामर्थ्यात्सर्वेणानपरेणेति यदि

हि स्यादण्ग्रहणमनर्थकं स्यात् के च इ
त्येव सिद्धं स्यात् अथ्यैवं तदपि न सिध्यात् अचो
ह्येतद्भवति ह्रस्वो दीर्घः अस्मिंस्तर्ह्यण
ग्रहणे संदेहः अणोऽप्रगृह्यस्यानुनासि
क इति असंदिग्धं सर्वेणानपरेण कृतप
नतपराभावात् अण्ग्रहणसामर्थ्यात्स
र्वेणानपरेण यदि हि परेण स्यात् अण्ग्र
हणमनर्थकं स्यात् अचो न हि परे नाः
पराणः सन्ति ननु चायमस्ति कर्त्रे ह्लरेप
वेति एवं तर्हि सामर्थ्यात् अप्रगृह्यस्यानुनासि
क इत्येव सिद्धं स्यात् अस्मिंस्तर्ह्यण्ग्रहणे
संदेहः उरण्रपर इति असंदिग्धं सर्वेणा
नपरेण कृतपनतपराभावात् न ह्युः
स्थाने च रपरत्वं स्यात् द्वयोः रेफयोः अव
णेऽसमस्तेन हल्लोपमायमिल्लोपो भवि।
ष्यति विभाषा मल्लोपः विभाषाग्रहण
मसत्येन अर्थं तर्हि निपालोपः रोरीति
पदान्तस्येति पदान्तस्यैवमसः नशाकः से
पदान्तस्येति विज्ञाने इह हि दोषः स्या
त् नर्दैपेः तरु अजसाः पत्ते स्तुया
स्या इति अयं तर्हि पिन्नणामिनिरपर।
नेऽसमस्तेन आचार्यप्रवृत्तिर्ज्ञापयति न

च रपरत्वं भवतीति यदयं ऋत इद्धातो
रिति धातुग्रहणं करोति कथं कृत्वा ज्ञा
पकं धातुग्रहणस्यैतत्प्रयोजनं इह मा
भूत् मातॄणां पितॄणामिति यदि चा
ऽत्र रपरत्वं स्यात् धातुग्रहणमनर्थकं स्या
त् रपरत्वे कृतेऽनृदन्तत्वान्न भविष्यति पश्य
ति त्वाचार्यः नात्र रपरत्वं भवतीति ततो
धातुग्रहणं करोति इहापि तर्हि न प्रा
प्नोति चिकीर्षति जिहीर्षतीति मा भूदेव
उपधायाश्चेत्वं भविष्यति इहापि तर्हि
प्राप्नोति मातॄणां पितॄणामिति तस्मात्
ऋधातुग्रहणं कर्तव्यं एवं तर्हि सामर्थ्या
त् ऋग्रहणसामर्थ्यादृवर्णान्तपरेण
यदि हि रपरेण स्यात् ऋग्रहणमनर्थकं।
स्यात् उरण्रपरस्यैव रूपात् प्रसिद्धि
रित्यग्रहणमिदं इह ऋदिवर्णास्य
चाप्यस्य इति प्रसादिस्य ऋवर्णान्तपरेण
कृतपनेन सवर्णानां ग्रहणात् ऋमर्दति
यदयं ऋपर्दति निरकारान्तपरं करोति
तज्ज्ञापयत्याचार्यः परेणानृवर्णानि
ऋग्रहणेन गृह्यन्ते इति ऋसवर्णानां परे
णानृवर्णा कृतपनेन योऽत्रपरेणा

श्री
महा
भा
३५

स्यात् यत्रैकमित्यवर्णान्तममग्रहणेन
ग्रहणं योगितेन ऋकारं भवति कथं कृत्वा
ज्ञापकं तत्र विभक्तिनिर्देशः समग्रहणं
पञ्चविशेषाणामन्यान्यपि ग्रहणानि ज्ञानानि
श्रीमाया सोऽयमेवलचीयमानासमसिद्
सति यद्वोषासपन्नमारमेतेतज्ज्ञापय
त्याचार्यः परेणानृवर्णानि किं पुनः सर्व
वर्णानि किमवर्णकारोऽङ्गित्वमुच्यते प
तज्ज्ञापयत्याचार्यः भवत्येषा परिभाषा
व्यानतो विशेषप्रतिपत्तिर्न हि सन्देहाद
लक्षणमिति ऋणादिसवर्णानां ऋवर्णाऋवर्णा
णग्रहणं परेणाणग्रहणामिति व्याख्यास्या
मः यमद्रणां नकपन किमर्थमिमोऽस्ना
त्वेनासिकावचनाद्गुमावेणानामनुप्रपत्ते
न अकारयत्वानुबध्यते कथं यानिमकारे
णाप्रत्याहारग्रहणानि हलोयमां यमीति
संतमकारेण हलोयमोऽयमिलोपश्च इति
नैवंशाक्य झकारभकारयोरपि मकार
भकारयोर्लोपः प्रसज्येत न झकारभ
कारयोरिति तयोः प्रसज्येत न झकारभ
कारयोः स्यात् कथं ऊमोह्रस्वादचि ङ
मुणित्यमितिपत्तनरूपाणकारेण ङमो

हस्वादचिरन्त्यागनित्यमिति नैवंशक्यं
फकारभकारयोरपिपदान्तयोः फकारभ
कारावागमौस्यातां नफकारभकारौपदा
न्तौस्तः एवमपिपंचागमाः त्रयग्रामणिनः
वेषस्यात्संख्यातानुदेशोनप्राप्नोति संत
नावयुषामागमानामागमिकः संतिफका
रभकारावपिपदान्तौनस्तः इतिकृत्वाग।
मावपिनभविष्यतः अथकिमिदमक्षर।
मितिअक्षरंनक्षरंविद्यात् नक्षीयतेनक्षर
तिवाक्षरं अश्नोतेर्वाअश्नोतेर्वासरोक्षरं
अश्नोतेर्वायमौणादिकःसरप्रत्ययः अश्नु
तेइत्यक्षरंवर्णंवाहुः पूर्वसूत्रे अथवापूर्व
सूत्रेवर्णस्याक्षरसंज्ञाक्रियते किमर्थमिद
मुच्यते अथकिमर्थउपदेशःक्रियतेवृत्ति
माने विषयेविषयवाचोयश्चास्मिन्वर्तते
तरश्चमिदमुत्पत्त्यलक्ष्यंवापदिश्यते सो
यमक्षरसमाम्नायोवाक्समाम्नायः पुष्पि
तःफलितश्चन्द्रतारकवत्प्रतिमंडितोवेदि
तव्योब्रह्मराशिः सर्ववेदपुण्यफलावाप्ति
श्चास्यज्ञानेभवतिमातापितरौचास्यस्वर्गे
लोकेमहीयेतेइति ॥ ॥ इतिश्रीमद्भग
वत्पतंजलिमुनिविरचितेव्याकरणमहा।

भाष्येप्रथमाध्यायस्यप्रथमपादेद्वितीय
माह्निकं समाप्तं समाप्ताः ॐनमःशि
वाय वृद्धिरादैच् कृतेकस्मान्नभवति
वोऽकः परस्येतिकलिपदांतेच इतिशा
तिभवान् कथंभसत्ता अयस्मयादीनि
छंदसीति छंदसीत्युच्यतेनचेदंछंदोव
नहाणिभवंति यदिभसत्ताह्रिदादेज
देङ्गुणः इतिजशत्वमपिनप्राप्नोति उभय
संज्ञान्यपिछंदसिदृश्यंते तद्यथासरूर
भासहस्कमागतेन पदत्वात्कुत्वे भवा
ज्जशत्वेनभवति एवमिहापिपदत्वाज्ज
शत्वंभवात्कुत्वंचनभवति किंपुनरि
दंतद्भावितग्रहणं किंपुनरिदंतद्भावि
तग्रहणमाहोस्विदावैर्यकारैकारौकारा
भाव्यन्तेतेषांग्रहणं आहोस्विदादैज्मात्र
स्य किंचातो यदितद्भावितग्रह
णं शालीयोमालीयइतिवृद्धलक्षणः
छोनप्राप्नोति इहचनमर्षमालमयं
हलक्षणोमयट्प्राप्नोति इहचाम्रगुप्ता
यनिःसालगुप्तायनिः वृद्धलक्षणः फिञ्
नप्राप्नोति अथादैज्मात्रस्यग्रहणं सर्वो
भासः सर्वभासः तत्परपदवृद्धोसर्वोवेद

स्वरः प्राप्नोति इह च यावती भार्या यस्य
स यावद्भार्यः तावद्भार्यः वृद्धिनिमित्तस्ये
ति पुंवद्भावप्रतिषेधः प्राप्नोति अस्त्वन्तर्या
दैज्भावस्य ग्रहणं न च वोक्के सर्वो भासः स
र्वभासः उभयपदवृद्धौ सर्वचेलः स्वरः प्रा
प्नोतीति नैष दोषः नैवं विज्ञायते अवयवे
चेत्तद्धितेये तद्भावितग्रहणे समस्यापि ग्रहणं
प्रसज्येत सर्वःकारः सर्वःकार इति यदु
च्यते इह च यावती भार्या यस्य स यावद्भार्यः
तावद्भार्यः वृद्धिनिमित्तस्येति पुंवद्भावप्रति
षेधः प्राप्नोति नैष दोषः नैवं विज्ञायते न
यथा वृद्धिनिमित्तं वृद्धिनिमित्तं वृद्धिनिमि
त्तस्येति कथं तर्हि वृद्धिनिमित्तमस्मिन्सो
ऽयं वृद्धिनिमित्त इति किंच वृद्धिनिमित्तं योऽसौ
ककारो णकारो ञकारो वा अथ वा यत्र कृ
त्स्ना या वृद्धिनिमित्तं स वृद्धिनिमित्तः कस्य च
वृद्धिनिमित्तं यस्य त्रयाणामाकारैकारौकाराणां
संज्ञाधिकारः संज्ञासंप्रत्ययार्थः संज्ञाधि
कारः संज्ञासंप्रत्ययार्थः कर्तव्यः अथ संज्ञ
योर्वप्रकृतयोः व्याख्यास्यः शास्त्रे परिभाषाः
किं प्रयोजनं संज्ञासंप्रत्ययार्थः वृद्ध्यादीनां सं
ज्ञानां संज्ञात्वेन संप्रत्ययो यथा स्यात् इतर

श्री
महा
भा
३१

था ह्यसंप्रत्ययो यथा लोके लोके अक्रिय
माणे संज्ञाधिकारे वृद्ध्यादीनां संज्ञात्वेन सं
प्रत्ययो न स्यात् इदमिदानीमेवं वक्तव्य
मनर्थकं स्यात् अनर्थकमित्याह यथा
लोके न यथा लोके अर्थवन्ति चानर्थका
नि वाक्यानि दृश्यन्ते अर्थवन्ति तावत् दे
वदत्त गामभ्याज शुक्लां दण्डेन देवदत्त गा
मभ्याज कृष्णामिति अनर्थकानि च द
शदाडिमानि षडपूपाः कुण्डमजाजिनं
पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फै
यकृतस्य पिता प्रतिशीन इति क्रियमा
णेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदे
ह क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञि
नोरसंदेहो वक्तव्यः कुतो ह्येतत् वृद्धिश
ब्दः संज्ञा आदैचः संज्ञिन इति न पुनरादै
चः संज्ञा स्यात् वृद्धिशब्दः संज्ञीति यत्ता
वदुच्यते संज्ञाधिकारः संज्ञासंप्रत्ययार्थ
इति न कर्तव्यः आचार्याचारात्संज्ञासि
द्धिः आचार्याचारात्संज्ञासिद्धिर्भविष्य
ति किमिदमाचार्याचारादिति आचार्या
णामुपचारात् यथा लौकिकवैदिकेषु
न यथा लौकिकेषु वैदिकेषु कृतान्तेषु

लोके तावत् मातापितरौ पुत्रस्य जातस्य सं
वृतेवकाशे नाम कुरुतः देवदत्तो यज्ञद
त्त इति तयोरुपचारादन्येपि जानंति इय
मस्य संज्ञेति वेदेपि याज्ञिकाः संज्ञां कु
र्वंति स्फो यूपश्चषाल इति तत्रभवतामु
पचारादन्येपि जानंतीति इयमस्य संज्ञेपि
एवमिहापि इहैव तावत्केचिद्वदन्त्यावृ
द्धः वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति अ
परेसि विद्विह्विरित्वस्मा आकारैकारौका
रान्वदाहरेति तेन मन्यामहे यथाप्रत्याय
ते संज्ञा ये प्रतीयंते ते संज्ञिन इति यदप्यु
च्यते क्रियमाणोपि संज्ञाधिकारे संज्ञासंज्ञि
नोरसंदेहः कर्तव्य इति क्रियमाणेपि संज्ञा
धिकारे संज्ञासंज्ञिनोरसंदेहः सिद्धः कुतः
आचार्याचारादेव उक्तमाचार्याचारः पुना
कृतिः अथवा आकृतिः संज्ञा आकृतिमं
तः संज्ञिन इति लोकोप्याकृतिमतो मात
पित्रोः संदेवदत्त इति संज्ञा क्रियते लिंगेनवा
अथवा किंचिल्लिंगमासज्य वक्ष्यामि इत्ये
लिंगासंज्ञेति वृद्धिशब्दश्च तल्लिंगकरिष्यति
नादैचकुस्वे इदंतावदयुक्तं यदुच्यते आचार्या
चारादिति किमत्रायुक्तं तमेवोपालभ्यायाम

केनेत्थमिति तस्यैव वचनः प्रमाणीक
रणं एतदयुक्तं अपरित्यक्तनत्वादपि
भवानेवानेन परिहारेणाकृतिर्लिंग
नचेत्याह तत्रापि वक्तव्यं यद्यप्येतदुच्य
ते अथवैतद्धीतसंज्ञानवकव्य लोप
श्चनवकव्यः संज्ञालिंगमनुबंधेषु करि
ष्यते न च संज्ञाया निवृत्तिरुच्यते स्वभा
वतः संज्ञा निवर्तते तेना नवेषानामपि
निवृत्तिर्भविष्यति सिद्धं त्वेवमपाणिनी
यत्तु भवति यथान्यासमेवास्तु ननु चो
क्ते संज्ञाधिकारः संज्ञासंप्रत्ययार्थः इतरथा
ह्यसंप्रत्ययो यथा लोकेति तत्र यथा लोके
तथा व्याकरणे प्रमाणभूत आचार्यो दर्भ
पवित्रपाणिः शुचाववकाशे प्राङ्मुख
आसीनः मंगलपूर्वकं महतायत्नेनसू
त्रप्रणायतिस्म तत्रानर्थकेनैकेनवर्णेन
भवितुं शक्यं किंपुनरियतासूत्रेण किम
तो यदशक्यं ततः संज्ञासंज्ञिनावेव कृता
न्त्वावत्तत्संज्ञासंज्ञिनाविव तत्रभः सा
ध्वनुज्ञायते यस्मिन्नप्यसाधुत्वमने
क्रियते इत नमनयोः साधुत्वेकथं हीद
यमस्याप्यमविशेषणोपदिशः प्रकृतिपा

दे तस्मात्किमनयोः आदैचोपात्तरस
माम्नायउपदिष्टः प्रयोगनियमार्थेन
ह्यादिस्यात् वृद्धिशब्दात्परे आदैचः प्रयुक
ध्या इति तेस्य प्रयोगनियम आरभ्यते किंत
र्हि संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां
यथेष्टमभिसंबंधो भवति तद्यथा आहर
र पात्रं पात्रमाहरेति आदेशास्तर्हीमेस्युः
वृद्धिशब्दस्य आदैच आदेशाः षष्ठीनिर्दि
ष्टस्यादेशा उच्यन्ते नचात्र षष्ठीं निर्दिष्टां प
श्यामः आगमास्तर्हीमेस्युः वृद्धिशब्दस्या
दैच आगमाः आगमा अपि षष्ठीनिर्दिष्टस्यो
च्यन्ते लिंगेन च न चात्र षष्ठीनिर्दिष्टेनाव
ल्वापि गमलिंगं पश्यामः इदं खल्वपि भूयः
सामानाधिकरण्यमेकविभक्तित्वं च द्वयोश्चै
तद्भवति कयोर्द्वयोर्विशेषणविशेष्ययोः
संज्ञासंज्ञिनोर्वा तत्र कुत एतत्स्यात् वि
शेषणविशेष्ये इति नचैतयोरप्रतीत
पदार्थकयोर्विशेषणविशेष्यभावो भवति
नादैच्छब्दः प्रतीतपदार्थकः तस्मात्संज्ञा
संज्ञिनावेव तयोरेतावान्संदेहः कःसंज्ञी
कासंज्ञेति सचापिकः संदेहः यत्रोभे समा
नाक्षरे यत्रत्वन्यतरल्लघुः यल्लघुःसासंज्ञा

श्री
महा
भा
२८

यल्लघु तत्संज्ञी कुत एतत् लघ्वर्थं हि संज्ञा
करणं यत्राप्येतनावश्यंफलंचान्यमे
दोपलक्षितुमारोहति किंतर्हि अन्वाकृति
तामपि प्रत्याकृतिसंज्ञा आकृतिमेत संज्ञि
न इति लोके ह्याकृतिमतो मांसपिण्डस्य दे
वदत्त इति संज्ञा क्रियते अथवा आवर्तिन्यः
संज्ञा भवन्ति वृद्धिशब्दश्चावर्तते नादैच्छब्दः
तद्यथा इतरत्रापि देवदत्तशब्द आवर्तते न
मांसपिण्डः अथवा पूर्वोच्चारितः संज्ञी परोच्चा
रिता संज्ञेति कुत एतत् सतो हि कार्यिणः
कार्येण भवितव्यं तद्यथा इतरत्रापि सतो
मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते कथं
वृद्धिरादैजिति एतदेकमाचार्यस्य मङ्गला
र्थं मृष्यताम् माङ्गलिक आचार्यो महतः शा
स्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते
मङ्गलादीनि शास्त्राणि प्रथन्ते वीरपुरुषा
णि भवन्ति आयुष्मत्पुरुषाणि चाध्येतार
श्च वृद्धियुक्ता यथा स्युरिति सर्वत्रैव हि व्या
करणे पूर्वोच्चारिता संज्ञेति अपरोच्चारिता
संज्ञाप्रदेशाः इति पराद्येष वा तात्वपि
संज्ञाधिकारः अष्टमेपि संज्ञाः क्रियन्ते तस्यप
रमाम्रेडितमिति तत्रापीदमन्वर्थं स्यात्

अथवास्यानेकयत्नः क्रियते नह्येदंलो
काड्डियते यदिहिस्याल्लोकाड्डियते ततो
यत्नोहिस्यात् अयोक्तायकश्चिड्डामक्तिनी
कर्णीवागट्टीन्वोपदिश्यते अथेयोगोरिति तथा
स्मायाचष्टे योगोरियमस्याः संज्ञेति भवति चा
स्य संप्रत्ययः तद्वैवतत्स्यात् कृतमत्र सर्वे
गभिसंबध्यइति इहापि कृतः के आचार्ये
ल्लैवतत्स्यात् यस्मिन हि समस्य प्रत्युपदिश्य
तेतस्यकृतः लोकेपि हियस्मिन हि संप्रत्युप
दिश्यते तस्याकृतः अथयत्रकृतः इहापि
कृतोइष्टव्यः सतोहद्यादिभिसंज्ञाभावा
भदाअथयतेरेतराअयत्वादप्रसिद्धिः सतःसं
ज्ञिनः संभावानतराअयसंज्ञाअयसतिसं
ज्ञीसंद्रादिष्वितरेतराअयत्वादप्रसिद्धिः के
तेरेतराअयत्ना सत्तामादैचोसंज्ञयाभावो
संज्ञयाचादैचोभाव्येतेनदेतदितरेतरा
यत्वंभवति इतरेतराअयाणिकार्याणिन
प्रकल्पते तद्यथा नौर्नावाबद्धानेतरे
त्राणायाभवति नत्वभोरितरेतराअयाणि
कार्याणिपरिदृश्यते तद्यथा नौशाकटंवह
तिशाकटमपिनावंवहति अन्यदपिकिंचि
त्तत्रभवति स्थलेजलेवा स्थलेशाकटंनावं

श्री
महां
भा
३५

वहति जलेनौः शाकटंवहति यथातर्
हि त्रिविष्टब्धकं तत्राप्यन्ततः सूत्रंभवति इ
दंपुनरितरेतराश्रयमेव सिद्धंतुनित्यशा
ब्दत्वात् सिद्धमेतत् कथंनित्यशब्दत्वात् नि
त्याःशब्दाः नित्येषुशब्देषुसतामादैचांसं
ज्ञाक्रियते नसंज्ञयादैचोभाव्यन्ते यदित
र्हि नित्याःशब्दाः शास्त्रंकिमर्थं शास्त्रंकि
मर्थमितिचेन्निवर्तकत्वात्सिद्धं निवर्तकं
शास्त्रंकथंमृजिरस्माअयमविशेषेणोप
दिष्टः तस्यसर्वत्रमृजिबुद्धिः प्रसक्ता तत्रा
नेननियमः क्रियते अकितोःप्रत्यययोर्मृजेः
प्रसंगेमार्जिःसाधुर्भवति अनेकंगुणावृ
द्धेते अनेकंगुणावृद्धिसंज्ञोभवतइतिवक्त
व्ये किंप्रयोजनं समुदायेमाभून्नामिति अ
थतत्रसहवचनात्समुदायेसंज्ञाप्रसंगः अ
थत्रसहवचनात्समुदायेगुणावृद्धिसंज्ञे
योरप्रसंगः यत्रेच्छतिसहभूतानांकार्यं
तत्रकरोति सहभूतग्रहणं तद्यथा सहस्या
उभेअभ्यस्तमितिसहेति प्रत्येकंचवाक्य
परिसमाप्तिः अवयवेवाक्यपरिसमा
प्तिर्दृश्यते तद्यथा देवदत्तयज्ञदत्तविष्णु
मित्राभोज्यन्तामितिनकृत्प्रत्येकंभुजिःसमा

घ्येते नवचायमप्यस्ति दृष्टांतः समुदा
येवाक्यपरिसमाप्तिरिति तद्यथा गर्गाः
शतंदंड्यतामर्थिनश्चराजानोहिर
ण्येनभवंतिनचप्रत्येकंदंडयंति सत्येतस्मि
न्नदृष्टांतेयदितत्रमहद्ग्रहणंक्रियते इहा
पितर्हिप्रत्येकमितिवक्तव्यं अथतदित
रेणापिमहद्ग्रहणंमहद्भूतानांकार्यंभव
ति इहापितर्हिनार्थःप्रत्येकमितिवचने
न अथकिमर्थमाकारस्तपरःक्रियते आ
कारस्यतपरकरणमवर्णग्रहणार्थं आ
कारस्यतपरकरणंक्रियते किंप्रयोजनंस
वर्णग्रहणार्थंतपरस्तत्कालस्यतत्काला
नांसवर्णानांग्रहणंयथास्यात् केषामुदा
त्तानुदात्तस्वरितानुनासिकानां किंचका
रणंनस्यात् भेदकत्वात्स्वरस्य भेदकाउदा
त्तादयः कथंपुनर्ज्ञायतेभेदकाउदात्ताद
यइति एवंहिदृश्यतेलोकेयउदात्तेकर्त
व्येनुदात्तंकरोति खंडिकोपाध्यायस्तस्मै
चपेटांददाति अन्यत्त्वंकरोषीति अ
स्तिप्रयोजनमेतत् किंतर्हीति भेदकत्वा
द्गुणस्येतिवक्तव्यं किंप्रयोजनं आनुना
सिक्यंनामगुणः तद्भिन्नस्यग्रहणंयथा

श्री
महा
भा
५

स्यात् किंचकारणंनस्यात्भेदकत्वाद्गु
णस्येति भेदकागुणाइति एवंहिदृश्य
तेलोके एकोयमात्माउदकंनाम तस्य
गुणभेदादन्यत्वंभवति अन्यदिदंशीत
मन्यदिदमुष्णमिति ननुचभोःअभेद
काअपिगुणादृश्यंते तद्यथा देवदत्तोयं
मुंड्यपिजट्यपिशिख्यपिस्वामाख्यांनज
हाति तथाबालोयुवावृद्धोवत्सोबलीव
र्दइति उभयमिदंगुणेषूक्तं भेदकागुणा
अभेदकागुणाइति किंपुनरत्रन्याय्यं
भेदकागुणाइतिन्याय्यं कुतएतत् य
द्यमाणुदित्सवर्णस्याप्रत्ययइ-णांग्रह
णंकरोति यदिभेदकाःस्युःउदात्तमेवाय
मुच्चारयेत् यदितर्हिभेदकागुणाः अव
दात्तादेरनुदात्तादयश्चात्तस्वरितादेःस्व
रितोदात्तग्रहणंप्राप्नोति नैषदोषः आश्रीय
माणोगुणोहिभेदकोभवति तद्यथा
शुक्लमालभेतकृष्णमालभेत यःशुक्ले
आलब्धव्येकृष्णमालभेतनतेनयथोक्तं
कृतंभवति अथेदानींत्वंहितकारःप
ठितव्याभावेसंदेहःस्यात् किमेतावा
वाचेव आहोस्विदाकारस्यग्रहणंस्यात्

नइति संदेहमात्रमेतद्भवति सर्वसंदेहेषु
चेदमुपतिष्ठते व्याख्यानतो विशेषप्रति
पत्तिर्न हि संदेहादलक्षणमिति त्रयाणां ग्र
हणमिति व्याख्यास्यामः अन्यत्रापि एवंजाती
यकेषु संदेहेषु न किंचिद्यत्नं करोति तद्यथा
ङोलोमशासोविति इदं तर्हि प्रयोजनमान्तर्य
तस्त्रिमात्रचतुर्मात्राणां त्रिमात्रचतुर्मात्रा।
आदेशा मा भूवन्निति खट्वा इन्द्रः खट्वेन्द्रः ख
ट्वा उदकं खट्वोदकं खट्वा ईषा खट्वेषा खट्वा
ऊढा खट्वोढा खट्वा एलका खट्वैलका खट्वा
ओदनः खट्वौदनः खट्वा औपगवः खट्वौपग
वः अथ क्रियमाणेऽपि वर्णे कस्मादेवात्र त्रि
मात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा
आदेशा न भवन्ति तपरस्तत्कालस्येति निय
मात् ननु च तः परो यस्मात्सोऽयं नेत्याह तादपि
परस्तपर इति यदि तादपि परस्तपरः ऋदोर
बित्येव स्यात् यवः स्तवः पवः लवः इत्यत्र न
स्यात् नैष तकारः कस्तर्हि दकारः किं दका
रे प्रयोजनं अथ किं नकारे यत्र संदेहस्त
कारः न हि दकारोऽपि त्र्यग्रमस्य वाच्यः त
कारः इकारोऽपि इको गुणवृद्धी इकग्रहणं।
किमर्थं इकग्रहणमात्संध्यक्षरव्यञ्जननि

श्री
महा
भा
४८

वृत्त्यर्थं इकग्रहणमात्संध्यक्षरव्यञ्जननि
वृत्त्यर्थं क्रियते आकारनिवृत्त्यर्थं संध्यक्ष
रनिवृत्त्यर्थं व्यञ्जननिवृत्त्यर्थं क्रियते आ
कारनिवृत्त्यर्थं तावत् याता वाता आका
रस्य गुणः प्राप्नोति इकग्रहणान्न भवति
संध्यक्षरनिवृत्त्यर्थं तावत् ग्लायते म्लायते
संध्यक्षरस्य गुणः प्राप्नोति इकग्रहणान्न
भवति व्यञ्जननिवृत्त्यर्थं तावत् उम्भिता
उम्भितुं उम्भितव्यं व्यञ्जनस्य गुणः प्राप्नोति
इकग्रहणान्न भवति अकारनिवृत्त्यर्थे
नतावानर्थः आचार्यप्रवृत्तिर्ज्ञापयति
नाकारस्य गुणो भवतीति यदयमातोऽनु
पसर्गे कः इति ककारानुबन्धं करोति कथं
कृत्वा ज्ञापकं किंकरणमेतस्य प्रयोजनं
कितीत्याकारलोपो यथा स्यात् यदि चाका
रस्य गुणः स्यात् किंकरणमनर्थकं स्यात्
गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं
स्याद्गोदः कंबलद इति पश्यति त्वाचार्यो
नाकारस्य गुणो भवतीति ततः ककारानु
बन्धं करोति संध्यक्षरनिवृत्त्यर्थेन चापि ना
र्थः उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो
न भविष्यति व्यञ्जननिवृत्त्यर्थेन चापि।

नार्थः आचार्यप्रवृत्तिर्ज्ञापयति नेध्रेजनस्य
गुणो न भवतीति यदयं जनेर्ड इति डितं
शास्ति कथं कृत्वा ज्ञापकं डित्करणस्य एत
त्प्रयोजनं डितीति टिलोपो यथा स्यात् य
दि चेज्जनस्य गुणः स्यात् डित्करणमनर्थकं
स्यात् गुणे कृते द्वयोरकारयोः पररू
पेण सिद्धं रूपं स्यात् उपसरजो मन्दुरज इति प
श्यति त्वाचार्यो नेह जनस्य गुणो न भवतीति
ततो जनेर्डं शास्ति नैतानि सन्ति ज्ञापका
नि यत्तावदुच्यते डित्करणं ज्ञापकं नाका
रस्य गुणो भवतीति उत्तरार्थमेतत्स्यात् त्वद
शाकेयोः परिमृजापनुदोरिति यत्तर्हि गा
पोष्टगित्यनन्यार्थं ककारमनुबन्धं करोति य
दप्युच्यते उपदेशसामर्थ्यादत्राप्यस्य ग
णो न भविष्यतीति यदि तर्हि यदन्यस्याप
रस्य प्राप्नोति तत्तदुपदेशसामर्थ्याद्बाध्येत
अयादेशोऽपि न प्राप्नोति नैष दोषः यं वि
धिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते य
स्य तु विधेर्निमित्तमेव नासौ बाध्यते गुणं च
प्रत्युपदेशोऽनर्थकः अयादीनां पुनर्निमि
त्तमेव यदप्युच्यते जनेर्डवचनं ज्ञापकं न
जनस्य गुणो न भवतीति सिद्धे विधिरारा

भ्यमाणो ज्ञापकार्थो भवति न च जनेर्गु
णेन सिध्यति कुतो ह्येतत् जनेर्गुण उच्य
माने टकारो भविष्यति न पुनरेकारो वा स्या
दोकारो वेति आन्तर्यतोऽर्धमात्रिकस्य व्य
ञ्जनस्य मात्रिकोऽकारो भविष्यति एवमप्य
न्नात्मिकः प्राप्नोति पररूपेण शुद्धो भवि
ष्यति एवं तर्हि गमेरप्येष वक्तव्यः गमे
र्गुण उच्यमाने आन्तर्यतो डाकारः प्राप्नो
ति तस्मादिग्ग्रहणं कर्तव्यं यदि तर्हीदुक्
ग्रहणं क्रियते द्यौः पन्थाः स इमं पेलेपी।
कः साम्नुं इति संज्ञाविधाने नियमः संज्ञा
याये विधीयते तेन तन्नियमः किं च कृतस्य।
मेतत् नहि कथमनुच्यमाने स्थाने गुण
वृद्धिग्रहणसामर्थ्यात् कथं पुनरनेनेग
गुणवृद्धिग्रहणं इको गुणवृद्धी स्यातां
प्रकृतं गुणवृद्धिग्रहणमनुवर्तते क्व
प्रकृतं वृद्धिरादैजदेङ्गुण इति यदि त
दनुवर्तते अदेङ्गुणो वृद्धिश्चेति इको वृद्धि
ज्ञा प्राप्नोति संबन्धमनुवर्तिष्यते वृद्धि
रादैजदेङ्गुणः वृद्धिरादैच् इको गुणवृद्धी
ति गुणवृद्धिग्रहणमनुवर्तते अदेङ्ग्र
हणं निवृत्तं अथवा मण्डूकगतयोऽधिका

गाः नयथा मंडूका उत्प्लुत्योत्प्लुत्य गच्छंति
तद्वदधिकाराः अथवैकयोगः करिष्य
ते वृद्धिरादैजदेङ्गुणः इति ततः इकोगु
णवृद्धी इति नचैकयोगेनुवृत्तिर्भवति
अथवा अन्यवचनाच्चकाराकरणात्प्रकृ
तस्यापवादो विज्ञायते यथोत्सर्गेण प्रस
क्तस्यापवादो बाधको भवति अन्यस्याः सं
ज्ञाया वचनात् चानुकरणार्थस्याकरणा
त्प्रकृतायाः अपि वृद्धिसंज्ञायाः गुणसंज्ञा बा
धिका भविष्यति यथोत्सर्गेण प्रसक्तस्याप
वादो बाधको भवति अथवावद्यतेतत्र अ
नुवर्त्तते च नाम विधयः न चानुवर्त्तनादेव भ
वंति कथं तर्हि यत्नाद्भवंति अथवोभय
निर्देशात्तत्र इत्यविष्यामहे किं पुनरलोन्त्यस्य
शेषः अहोस्विदलोन्त्यापवादः कथं वा
यत्र तत्क्षेपः स्यात् कथं चायं तदपवादः
यद्येकवाक्यं तच्चेदं च अलोन्त्यस्य विधयो भ
वंति इको गुणवृद्धी अलोन्त्यस्येति ततो
यत्क्षेपः अथ नानावाक्यं अलोन्त्यस्य
विधयो भवंति इको गुणवृद्धी अलोन्त्यस्ये
ति ततो यत्क्षेपः अथ नानावाक्यं अ
लोन्त्यस्य विधयो भवंति इको गुणवृद्धी

श्री
महा
भा
४२

ऽन्त्यस्यानेनेतस्य चेति ततो यत्तदपवादः
कस्तर्हि विशेषः वृद्धिगुणावलोन्त्यस्येति
चेत् मिदिपुगंतलघूपधच्छिदृशि
क्षिप्रसदेशिकस्य ग्रहणं इकश्च ग्रहणं कर्त
व्यं मिदेर्गुणः इक इति वक्तव्ये अनेनान्त्य
न्त्यादिन प्राप्नोति पुगंतलघूपधस्य गु
णः इक इति वक्तव्ये अनेनान्त्यादिन प्रा
प्नोति ऋच्छेर्लिटि गुणः इक इति वक्तव्ये
अनेनान्त्यादिन प्राप्नोति इवोर्दिगुणः
इक इति वक्तव्ये अनेनान्त्यादिन प्राप्नो
ति क्षिप्रसदेशयोर्गुणः इक इति वक्तव्ये
अनेनान्त्यादिन प्राप्नोति सर्वादेशप्रस
ङ्गश्चानिगंतस्य सर्वादेशगुणो निगंतस्य
प्राप्नोति यातावाता किं कारणं अलो
न्त्यस्येति षष्ठी चैवंभूतमनेकमप्यनेकाला
अशसीति स्यात्तेषष्ठीत यद्विदानीमनिगं
तस्यांगस्य गुणः सर्वादेशः प्राप्नोति नै
ष दोषः यत्रैव तर्हि अलोन्त्यषष्ठ्यंतानि
कस्मपकामति एवमंगस्यापि षष्ठीता
यदिदानीमनिगंतमंगंतत्र षष्ठ्येवतानि
गुणागुणः कृतः सर्वादेशः एवं तर्हि सर्वो
पेतो यद्दोषात्प्येवापपदितः स्मिदिग्रहो

न्तलघूपधस्य क्ङिदिति मिदित्यत्र इषिकग्रह
णं सर्वादेशार्थं गोह्यादिकं नेष्यति मिदे
र्गुणः इकइति वचनादवल्नस्य न श्रेय
स्येति वचनादिकोन उच्यते च गुणः स
र्वादेशः प्राप्नोति एवं सर्वत्र प्रत्ययनाहेत
दपवादः उच्यान्नस्येति चेन्नसिसार्वधा
तुकार्धधातुकरूत्वाद्योर्गुणः अनेनस्य प्र
तिषेधः उच्यानस्येति चेन्नसिसार्वधातु
कार्धधातुकरूत्वाद्योर्गुणोऽनेनस्यऋति
षेधो वक्तव्यः जसि गुणो यथेदं भवति
प्रजन्हुः प्रविभगुरिति एवमनेनिवं
प्रयंवेविदुः अप्राप्तिप्राप्नोति सार्वधातु
कार्धधातुकयोर्गुणः यथेदं भवति क
तारहलो नयति तरति भवतीति एवं इहि
नाहिदिते इहलै अप्राप्तिप्राप्नोति ह्रस्व
स्य गुणः यथेदं भवति हेअग्ने हेवायो इ
ति एवं हे अग्निचेन हेसमेत्तन अप्राप्ति
प्राप्नोति जसि गुणः यथेदं भवति अग्न
यः वायव इति एवमग्निचितः सोमसुतः
अप्राप्तिप्राप्नोति ऋतोङिसर्वनामस्थान
योर्गुणः यथेदं भवति कर्तरि कर्तारौ
कर्तार इति एवं स्वस्कृति सुकृतौ सुकृतः

श्री
महा
भा
४४

अप्राप्तिप्राप्नोति घेर्ङिति गुणः यथेदं
भवति अग्नये वायवे इति एवमग्निचि
ते सोमसुते अप्राप्तिप्राप्नोति ओर्गुणः
यथेदं भवति बाभ्रव्यो माण्डव्य इति एवं
सुश्रुत सौश्रुतः अप्राप्तिप्राप्नोति नैष
दोषः पुगन्तलघूपधग्रहणमनेनापि
यमार्थं पुगन्तलघूपधग्रहणमनेनाप्र
नियमार्थं भविष्यति पुगन्तलघूपधस्य
वानेनापवादान्नस्यानेनस्येति प्रकृतस्य
प्यनियमः स्यात् किंच प्रकृतं सार्वधातु
कार्धधातुकयोरिति तेन भवेदिह न
यमात्रस्यात् इहिता इहिते इहितव्य
ति इत्यादि गुणास्तु नियतः सोऽनेनस्या
प्राप्नोति अप्राप्ये च नियमः स्यात् पुग
न्तलघूपधस्य सार्वधातुकार्धधातुकयो
रेवेति एवमपि सार्वधातुकार्धधातुक
योर्गुणः अनियतः सोऽनेनस्याप्राप्नो
ति इहिता इहितेति इहते इति अप्रयाप्य
भयतो नियमः स्यात् पुगन्तलघूपधस्य
च सार्वधातुकार्धधातुकयोः सार्वधातु
कार्धधातुकयोरेव च पुगन्तलघूपध
स्येति एवमप्यर्धजसिगुणः अनियतः

सोनेनस्यापि प्राप्नोति अन्ते निर्ज्ञः पर्यवे
विष्ठिरिति एवं तर्हि नैवायं तत्र्कुषः नापि
तदपवादः अन्यस्वेदं परिभाषान्तरमसं
वदं तयापरिभाषया परिभाषान्तरमपि
चमत्कृत्कोष्टीयाः पठंति नियमादिको
गुणवृद्धीभवतो विप्रतिषेधेनेति यदि
वायं तत्र्कुषः स्यात्तेनैवतस्याश्चयुक्तोप्र
तिषेधः अथापि तदपवादः उत्सर्गापवा
दयोश्चायुक्तं विप्रतिषेधः तत्रनियमस्याव
काशः राज्ञः कचराजकीयं इकोगुणवृद्धी
इत्यस्यावकाशः चयनं चायकः लवनं।
लावकः इहोभयंप्राप्नोति मेद्यति मेद
नः मेद्यति मार्ष्टीति इकोगुणवृद्धीइत्ये
तद्भवति विप्रतिषेधेन नेषयुक्तो विप्र
तिषेधः विप्रतिषेधे हि परमित्युच्यते अ
वैयाव्ययोगः परो नियमः इत्यत्राचोपरश
न्दः विप्रतिषेधे परे यदिष्टं तद्भवति एवम
प्ययुक्तो विप्रतिषेधः द्विकार्ययोगो हि वि
प्रतिषेधः नचात्रैको द्विकार्ययुक्तः ना
वश्यं द्विकार्ययोगएव विप्रतिषेधः किं
तर्हि असंभवोपि तत्रचास्त्यसंभवः कोसा
वसंभवः इहतावत् हेतेभ्यः सतेभ्यइति

प्री
महा
भा ६

पकः स्थानी द्वावादेशौ नचास्ति संभवः
यदेकस्य स्थानिनो द्वावादेशौस्यातां इ
हेदानीं मेद्यति मेद्यतः मेद्यंति द्वौ स्थानि
नावेकादेशः नचास्तिसंभवः यद्द्वयोः स्था
निनोरेकादेशःस्यात् एषोप्यसंभवः अ
त्यसंभवयुक्तो विप्रतिषेधः एवमप्ययु
क्तो विप्रतिषेधः किंतर्हि द्वयोरपि साव
काशयोः समवस्थितयो विप्रतिषेधो भ
वति अनवकाशश्चायं योगः नन्विदा
नीमेवावकाशः प्रक्रमः चयनं चायकः
लवनं लावकः अथापि नियमः प्राप्नो
ति नाप्राप्ते नियमे योगआरभ्यते यान
ना प्राप्ते तदपवादोयं योगो भवति उ
त्सर्गापवादयोश्चायुक्तो विप्रतिषेधः अ
थापि कथंचिदिकोगुणवृद्धी इत्यस्यायो
गस्यावकाशः स्यात् एवमपि दोषः यथे
ह विप्रतिषेधाद् इकोगुणो भवति मेद्यते
मेद्यतः मेद्यंतीति एवमिहापि स्यात्
अन्ते निर्ज्ञः पर्यवे विष्ठिरिति एवं तर्हि
द्विर्भवति गुणोभवतीतियत्तत्स्यात् इ
कइत्येतत्तत्रोपस्थितं द्रष्टव्यं किं कृतं
भवति द्विर्णोपामसौप्राङ्भीर्यतीति नेर

कामचारः ग्रहणेन वा इकं विशेषयि
तुं इकावाग्रहणं यावता कामचारः
इह तावन्मध्ये स्थित्वा जिघ्रतं लक्षणं पर्यु
द्दिशति ग्रहणे इग्ग्रहणेन इकं प्रति
शेषयिष्यामः एतेषां इकः इति इहेदानीं
अस्मिंश्च पाते कार्यं यान् कहस्यायोग
णेऽधिकार ग्रहणेन विशेषयिष्यामः एते
षां गुणो भवति इकः गुणं ताव्नामिति अथ
वा सर्वे एव अत्र स्थानी निर्दिश्यते इह ताव
न्मिदेरिति अविभक्तिको निर्देशः मिदः एः
मिदेरिति अथवा षष्ठी समासेन भविष्य
ति मिदः इः मिदिः मिदेरिति पुगंतलघू
पधस्यापि नैवं विज्ञायते पुगंतस्याङ्गस्य
लघूपधस्येति कथं तर्हि पुगंतं च
तः लघ्वी उपधा लघूपधा पुगंतश्च लघू
पधश्च पुगंतलघूपधं पुगंतलघूपधस्ये
ति अथवा यद्येतद्धितेयं अंगविशेषणम
ति इहापि प्रसज्येत भिनत्ति छिनत्ती
ति अर्च्छ इत्यपि अक्लिश्नि निर्देशायं अर्च्छ
ति अर्केरता अरुकन्ताभिति इहोर
पिपोजाविभागः करिष्यते उरडि नित्य
णः इः ऋदित्गुणो भवति ततो ष्ठाः इषी

श्री
मरु
भां
५१

अपि गुणो भवति ऊरित्येव विश्वतर
योः इष्यपणां विपरीतगुणं यत्ना सिद्धं म
ध्यमेव सिद्धं सति यत्र स्वत्र ग्रहणं करोति
स्यैतत्प्रयोजनं इकोऽन्यथा स्यात् प्रतिको
मा भूदिति अथ हि ग्रहणं किमर्थं किं
विशेषणेन हि ग्रहणं चोद्यते न प्रत्यक्षं
णत्रग्रहणमपि एकं चिह्न ग्रहणं यत्प्रत्य
नेन अस्ति गुणग्रहणं स्थापितं अतिम
हे तिको वा विशेषः अयमस्ति विशेषः गु
णविधानेऽविकृत्य वा निर्दिश्यते तत्रा
वश्यं स्थानि निर्देशार्थं गुणग्रहणं कर्त
व्यं हि विधाने पुनः सर्वे एव स्थानी प्रति
निर्दिश्यते अचो ञ्णिति अत उपधायाः त
द्धितेष्वचामादेरिति अत उत्तरपदे तहि
ग्रहणमनर्थकं क्रियते हि ग्रहणमनर्थ
कं क्रियते किंतु वेति प्रतिषेधं वक्ष्यति
सा वृद्धिर्मा भूदिति कथमिदानीं क्लिक्त
प्रत्ययस्थः इको गुणः यावता चास्मिन्नाभि
धीयते इहेदानीं मृजेर्वृद्धिः विशेषणं परि
द्यते मार्ष्टि मामृजत मृजः मृष्टवान् इ
हार्थं चापि मृज्यर्थे वृद्धिग्रहणं कर्तव्यं मृ
जेर्वृद्धिर्विशेषणं चोद्यते मार्ष्टि कोऽयमात

अनिकोमाभूदिति स्रज्यर्थमितिचेद्यो
गविभागात्सिद्धं स्रज्यर्थमिति वेयोगवि
भागादिवोके किमर्थं स्रनेत्पविकारेत्
सदेशस्यकार्यंभवतीति वृद्धिप्रतिषेधा
नुपपत्तिस्तिकप्रकरणे वृद्धेस्तु प्रतिषे
धोनोपपद्यते किंकारणं इकप्रकरणात्
इत्तलक्षणायोगलक्षणायोः प्रतिषेधः नचैवं
सति स्रजेरिग्लक्षणावृद्धिर्भवति तस्मात्स्र
जेर्वृद्धिरिग्लक्षणाप्राप्नोतिनवा पवंतर्हि इत
त्ध्वैवव्याकरणात्स्रजेरवादोसंक्रमेविभाषा
वृद्धिमारभेत परिस्रजति परिमार्जतिप
रिस्रजेत परिमार्जेत इत्येवमर्थं तर्हि
ह्यपिसाध्ये तस्मिन्साध्येयोगविभागः क
रिष्यते स्रजेर्वृद्धिर्वचनं ततः अचिञ्णिति
अजादौचक्ङिति स्रजेर्वृद्धिर्भवतिपरिमा
र्जंतिपरिमार्जन्तु किमर्थमिदं नियमार्थं
अजादावेवक्ङितिनान्यत्र कमाभूत् म
ष्टः मृष्टवानिति ततोवावाचप्रुविक्ङिति
स्रजेर्वृद्धिर्भवति परिस्रजंति परिस्रजंति
परिस्रजेत इत्याद्यर्थमेवतर्हि सिजर्थं वृद्धि
ग्रहणं कर्तव्यं सिचिवृद्धिर्विशेषणोपदि
श्यते इकोयथास्यात् अनिकोमाभूदि

श्री
महां
भां
४०

ति कस्यपुनरनिकः प्राप्नोति अकार
स्य अचिकीर्षीत् अजिहीर्षीत् नैतद
स्ति लोपोस्याकारस्य भविष्यति अकार
स्यतर्हि प्राप्नोति अपासीत् अवासीत्
नास्यप्रतिषेधः सत्यावाहद्वावसन्ता
वासर्थंतरस्यतर्हि प्राप्नोति नैवंसंध्य
न्तरमस्त्यमस्ति नचैतदस्ति ढलोपके
ते उदवोढां उदवोढं उदवोढेति नैत
दस्ति असिद्धोढलोपः तस्यासिद्धत्वा
न्नैतदंतंभवति यांजनस्यतर्हि प्राप्नोति
अभैत्सीत् अच्छैत्सीत् हलंतलक्षणावृ
द्धिर्वाधिकाभविष्यति यत्रतर्हिसाप्रति
षिध्यते अकोषीत् अमोषीत् निचिवृद्धे
रेषप्रतिषेधः कुटादिलक्षणाद्धिलामधुन
निभमति अङ्कितेनापिनावतिष्ठते अय
वासिचिवृद्धिः प्राप्नोति तस्याहलंतलक्ष
णावृद्धिर्वाधिकाभविष्यति तथाऽपि
नेटीति प्रतिषेधः अचिति पुनः क्वचिद
न्यत्राप्यपवादेप्रतिषिद्धउत्सर्गोपिनभ
वति अस्तोषीत् सज्जातेष्यपवृत्ते मे प्र
धर्षीत् प्रतिभिः स्रते अकंतेअप्रतिषिद्धर
र्वतेप्रतिषिद्धेप्यपवादेनभवति उ

नरार्थमेव नहिक्विजर्थेहहिग्रहणांक
नेव्यं क्विचिहदिहशिविशेषणोवोच्यते सा
क्रितिमाभूत् न्यवधीत् न्यभयीत् ने
तर्हिप्रयोजनं श्रुतंस्थान्यानमेवशङ्कशे
नेनस्यात्वाहहिनभविष्यति यदितर्हिकि
च्यतेरंगंभवति अकाषीत् अहार्षीत्
शेषोक्तेनलपरत्वेनात्वेनस्यनाहहिनप्राप्नो
ति माभूदेवं हलंतस्येत्येवंहहिर्भविष्य
ति इगहिविकर्त्ते न शेषोक्तेनरपरत्वेन
नेत्यहहिनप्राप्नोति हलंतलक्षणायावा
नेदीर्घलोपःमाभूदेवं श्रुतेलीलन्ये।
त्वेवंभवति इदंतर्हिप्रलावीत् अपावी।
त् शेषोक्तेनप्रवादेशाचानितेनस्यनाहहि।
नप्राप्नोति हलंतलक्षणायाश्चनेदीनिष
तिषेधःमाभूदेवं लीनस्येवंभविष्यति
लीनस्येत्युच्यते नचेदंलीनं लीनस्येत्य
चककारोपिनिर्दिश्यते किंवककारोनश्रू
यते लमनिर्दिष्टोवकारः यद्येवमाभवा
नवीत् माभवान्भवीत् अत्रापिप्राप्नोति
अविकमवोर्नेतिवक्ष्यामि नत्ववक्तव्यनव
क्तव्यं णिश्विभ्यांनेतिमात्रवो यद्युच्यते
इच्यते अथैवनाहिणिभ्यांःप्रतिषेधोव

श्री
महा
भा
४८

कव्योभवति शेषोक्तेनप्रयादेशाच यां
तांतोनेनेवप्रतिषेधोभविष्यति एवंत
र्ह्याचार्यप्रवृत्तिर्ज्ञापयति नक्विच्यतेरंग
भवतीतियदयं श्रुतोहलादेर्लघोरित्यका
रग्रहणांकरोतिकथंकृत्वाज्ञापकंअका
रस्यैतत्प्रयोजनं इहमाभूत् अकोषी
त् अमोषीत्यदिक्विच्यतेरंगंस्यात् अका
रग्रहणमनर्थकंस्यात् शेषोक्तेनलघुत्वा
हहिर्नभविष्यतीति पश्यतित्वाचार्यः
नक्विच्यतेरंगंभवतीति ततोहकारग्र
णांकरोति नैतदस्तिप्रयोजनं ज्ञापितिर्हि
अत्पदेनस्यवचनेप्रयोजनं किंयत्रगुणः
प्रतिषिध्यतेतदर्थमेतत्स्यात् न्यकुटीत्
न्यपुटीत् इति यत्तर्हिणिश्वोःप्रतिषेधं
शास्तितेनहोनेरंगंभवतीतिदर्शयतीति
यत्तकारोकारस्यग्रहणं लघोरितिक्रिते
तस्मादिहलक्षणावृद्धिर्वाधितव्या यस्याः
स्थानेयालघोरिदितिवृद्धिः यस्याःस्थानेयो
गतान्सर्वोह्णामिकोनिवृत्तिःप्राप्नोति
अस्यामपिप्राप्नोति इयमप्यकंन्तं यतर्हि
वनमितिनेतिकिमर्थंस्यात् अत्रतर्हि
उत्तरवचने अस्मदर्थमेतत्स्यात् सा

र्वधातुकार्धधातुकयोर्गुणएवेति प्र
सारणेच प्रसारणेचसर्वेषांनिवृत्तिः
प्राप्नोतिप्रसारणेपिप्राप्नोति याता वाता
पुनर्वचनमिदानींकिमर्थंस्यात् विषया
र्थंपुनर्वचने विषयार्थमेतत्स्यात् वचि
स्वपियजादीनांकिंस्यादिति उरण्रपरेव
उरण्रपरेचसर्वेकाराणांनिवृत्तिःप्राप्नो
ति प्रसारणेपिप्राप्नोतिकर्तृहर्तृ सिद्धंतप
ष्ठ्यधिकारेवचनात् सिद्धमेतत्कथंष।
ष्ठ्यधिकारेऽमीयोगाःकर्तव्याः एकंता।
वत्क्रियतेएव तत्रैषभावपिषाणीषष्ठ्य
धिकारमनुवर्तिष्यते अथवाषष्ठ्यधिका
रेऽमीयोगाअपेक्षिष्यामहे अथवाइह
तावद्यंश्चाः सार्वधातुकार्धधातुक
योर्गुणोभवति इक्कस्थानेभवति या
ता वाता इदंतावदयमपेक्ष्यते इकइति
षष्ठ्यन्तमिदंतदपेक्षतएवमिहाप्यिदमप
क्षिष्यामहे सार्वधातुकार्धधातुकयोरि
कोगुणवृद्धीइति ॥ ॥ इतिश्रीमद्भ
गवत्पतंजलिमुनिविरचितेव्याकरणम
हाभाष्येप्रथमाध्यायस्यप्रथमपादेद्वि
तीयमाह्निकं ॥ ॥ ॐनमःश्रीगणेशाय न

धातुलोपआर्धधातुके धातुग्रहणंकि
मर्थंइहमाभूत् लूञ् लवितालवितु
मार्धधातुकइतिकिमर्थं त्रिधाबद्धोवृ
षभोरोरवीति किंपुनरिदमार्धधातुक
ग्रहणंलोपविशेषणं आर्धधातुकनि
मित्तेधातुलोपसतियेगुणवृद्धीप्राप्नुतः
तेनभवतइति आहोस्विद्गुणवृद्धिविशे
षणं धातुलोपसत्यार्धधातुकनिमित्ते
येगुणवृद्धीप्राप्नुतःतेनभवतइति किं
चातःयदिलोपविशेषणं प्रेद्धः उपेद्धः प्र
प्राप्नोति अथगुणवृद्धिविशेषणं
क्नोपइत्यत्रापिप्राप्नोति यथेच्छसितथा
स्तु अस्तुवालोपविशेषणं कथंप्रेद्धः उ
पेद्धः बहिरंगोगुणः अंतरंगःप्रतिषेधः
असिद्धंबहिरंगमंतरंगेअथवानार्धधातु
ग्रहणेन इक्कस्थानेनभवति लूञ्
लवितालवितं लवितव्यमिति आर्धधा
तुकनिमित्तेलोपप्रतिषेधः नचैषआ
र्धधातुकनिमित्तोलोपः अथवापुन
स्तुगुणवृद्धिविशेषणं ननुचोक्तंक्नोप
इत्यत्रापिप्राप्नोतीति नैषदोषःनिपातना
त्सिद्धं किंनिपातनं चेलेक्नोपमिति निप

विगणनेकर्तव्यं यस्मात्कक्यावलोपप्र।
तिषेधः यउःयककव्यवलोपप्रतिषेधोभ
वत्यः यउःवेभिदिता वेभिदिते यक
ऊधभिन्ना गमस्यकः क्य समिधिता इ
षेकः वलोपे जीरदानुः किंप्रयोजनं
वलोपस्त्रिवानुवेयलोपप्रतिषेधार्थं न
लोपेस्त्रिवानुवेयलोपेचप्रतिषेधोमाभू
दिति वलोपे अभाजिरागः उपबर्हणं
स्त्रिवेः अस्रेमाणांहितेजयाथ्यस्त्रवेयल
पे लड् लविनालविनेलविनवं यदि।
परिगणनेक्रियते स्यादःप्रस्रयः हिमस्र
यः अत्रनप्राप्नोति वद्त्यतेन निपात
नात्सस्पदादिष्विति नतर्हिपरिगणनंकर्त
व्यंनकर्तव्यंनलोपेकस्मान्नभवति इक
प्रकरणान्नलोपहक्कि इग्लक्षणयोगुण
वृद्ध्योःप्रतिषेधः नचैषइग्लक्षणावृद्धि
यदीग्लक्षणयोर्गुणवृद्ध्योःप्रतिषेधःस्या
दःप्रस्रयः हिमस्रयः अत्रनप्राप्नोति अ
वोदःएधः ओपमः इतिनिपातनात् निपा
तनात्स्पदादिषु निपातनात्स्पदादिषुप्र
तिषेधोभविष्यति नभविष्यतिच यदी।
ग्लक्षणयोर्गुणवृद्ध्योःप्रतिषेधःस्त्रिवान

श्री
महा
भा
८

वेयलोपे कथं स्त्रिवेः अस्रेमाणांहिते
जयाथ्य अन्याअप्यजावद्भात्मसिद्धं आर्ध
धातुकनिमित्तेलोपप्रतिषेधः नचैष आ
र्धधातुकनिमित्तोलोपः यद्यार्धधातुक
निमित्तेलोपप्रतिषेधः जीरदानुरत्रप्रा
प्नोति रकिज्यःसंप्रसारणं नेतज्जीवेः
रूपं रकि एतज्ज्यःसंप्रसारणंभवति
यावतावेदानीरक्जीवेरपिसिद्धंरूपं
भवति कथमुपबर्हणमिति बृहेःअ
स्त्यन्यमस्तीतिज्ञायते बृहेःप्रकृत्य
न्तरमिति अचीतिलोपाच्यते अन्तरा।
दावपिदृश्यतेनिबृह्यते अनिरीतिचो
च्यते उद्गावपिदृश्यतेनिबर्हितानि
बर्हितमितिअज्ञातावेपिनदृश्यते बृ
हयति बृहकइति तस्मान्नार्थःपरिग
णनेन यदिपरिगणनंनक्रियते भेद्य
ते छेद्यते अत्रापिप्राप्नोति नैषदोषः
धातुलोपइतिनैवंविज्ञायते धातोर्लो।
पोधातुलोपइति कथंतर्हिधातोर्लो।
पोयस्मिन्नार्धधातुकेतद्धातुलोपं धातुलोप
इति तस्मादिग्लक्षणयोर्गुणवृद्ध्योःप्र
तिषेधः यदितर्हिइग्लक्षणयोर्गुणवृ

घोः प्रतिषेधः पापचकः पापठकः म
गधकः दृषदकः अत्र न प्राप्नोति अल्लोप
स्य स्थानिवत्त्वात् अल्लोपे कृते न स्थस्था
निवद्भावाद् हृद्धिर्न भवतीष्यति अनारंभो वा
अनारंभो वा पुनरस्य योगस्य न्याय्यः कथं
चमिदिता मरीमृजः ऊर्णुमिता मग
धिता अत्राप्यकारलोपे तस्य स्थानिवद्भा
वाद् गुणवृद्धी न भविष्यतः यत्तु स्थानिव
द्भावो नास्तीत्यर्थमयं योगो वक्तव्यः सं
चस्थानिवद्भावो नास्ति लोलुवः पोपुवः
यत्र हलचोरादेशः अत्राप्यकारलोपे कृ
ते तस्य स्थानिवद्भावाद् गुणवृद्धी नः भवि
ष्यतः लकि कृते न प्राप्नोति इदमिह संप्र
धार्यं लुक् क्रियतां लोप इति किमत्र क
र्तव्यं परत्वाल्लोपः नित्यो लुक् कृतेपि लो
पे प्राप्नोति अकृतेपि प्राप्नोति लुगप्यनि
त्यः कथं अन्यस्य लोपे कृते प्राप्नोत्यन्यस्या
कृतेपि शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो
भवति अनवकाशस्तर्हि लुक् सावका
शो लोपः कोवकाशः अत्र शिष्टेप्यापि
कथं चिरवकाशो लुकस्मात् एवमपि न
दोषः अल्लोपयोगविभागः करिष्यते अ

तो लोपः यस्य यस्य च लोपो भवति अत
इत्येव किमर्थमिदं लुकं वक्ष्यति न ह्याय
नाद्ये ततो हलः हलन्तस्य यस्य च लो
पो भवति इहापि नाहि परत्वाद्योगविभा
गाद्वा लोपो लुकं बाधते कृतो नाम नाव
ग्भोपदेशेनान्वयते नौनाव समानाश्र
यो लुग्लोपेन बाध्यते कथं समानाश्रयः
यः प्रत्ययाश्रयः अत्र च प्रागेव प्रत्ययोत्प
त्तेर्लुग्भवति कथमस्य प्रत्ययः हिमश्रयः
जीरदानुः निकुचित इति उक्तेशेषे कि
मुक्ते निपातनात्स्यादि प्रत्ययाश्रयत्वा
दसमासिद्धे धकिः यः सम्प्रसारणमिति
निकुचितेत्युक्ते किमुक्तं निपातनल
णो विधिरनिमित्तेन द्विवानत्येति क्ङिति
च क्ङिति प्रतिषेधेनाग्निमित्तग्रहणं क्ङिति
प्रतिषेधेनाग्निमित्तग्रहणं कर्तव्यं क्ङिन्नि
मित्ते ये गुणवृद्धी प्राप्नुतः ते न भवत इति
किं प्रयोजनं उपधारोरवीत्यर्थं उपधा
रोरवीत्यर्थं च उपधार्यं भिन्नः भिन्नवा
न छिन्नः छिन्नवान् किं कारणं न सिध्य
ति क्ङितीत्युच्यते यत्र चाक्ङित्त्वं तत्र ते
णोक्ङितत्वेव स्यात् चितेस्मात इहेन स्यात्

भिन्नः भिन्नवान् छिन्नः छिन्नवान् इति
नत्वं च यथा स्यादित्युच्यते नत्वं क्रियते परत्वे
न विशिष्यते पुगन्तलघूपधस्यागस्य गु।
ण उच्यते न चात्र क्ङित्परे पुगन्तलघूप
धस्य चेति नैवं विज्ञायते पुगन्तस्याङ्गस्य
लघूपधस्य चेति कथं तर्हि पुकोन्तः पुग
न्तः लघ्वी उपधा पुगन्तस्य लघूपधा च पु
गन्तलघूपधे पुगन्तलघूपधस्य चेति पु
वर्णं चेन्न हितत्वं पुगागमविशेषणं हि सति इ
ह्यपि प्रसज्येत भिनत्ति छिनत्ति रोरवो
न्यर्थेन विपाशं इहष्टभोरोरवीति यदि
तर्हि भिन्नग्रहणं क्रियते शाचर्ङ्. लेदोषः रि
पयति पिपति माङ्खवन्तप्रास्वन्त प
चनप्राप्नोति शाचर्ङ्. तस्मान्नेगलक्षणेना
त् पुगन्तेरगन्वादियपाद्. उवङ्होक्तन्तयोः
पुन्तपयन्नाद्गुणोन भविष्यति एवं क्रिय
तेचेदं तर्हि भिन्नग्रहणे न कश्चिद्दोषो भव
ति इमानि च भूयस्तानि भिन्नग्रहणस्य प्रयो
जनानि हेतः हयः उपायते उपयत लौ
यमानिः पोयमानिः तेनिक्र इति तेना
निसन्ति प्रयोजनानि इहतावत् हेतः
हयः इति प्रतक्तस्मान्नमानि हेतस्य प्रति

घेयेन निहन्तिः शाकाकन्दे नत्वं च यथा न्
पदेशात्स्यायामेवासावकाशः उपायते
उपयत लौयमानिः पोयमानि विति व
हिरङ्गगुणाहदे पुन्तरङ्गः प्रतिषेधः पुमि
इव हिरङ्गमन्तरङ्गेनेनिक्र इति परेणा
पेणाज्याव हितत्वान्न भविष्यति उपधाय
नन्ताबान्वाणः धातोरिति वर्तमाने धातोः
क्ङित्परत्वेन न विशेषयिष्यामः यदि धातुर्वि
शिष्यते विकरणस्य न प्राप्नोति चिनुत सु
नुतः लुनीतः नैष दोषः विहितविशेष
णं धातुग्रहणं धातोर्यो विहित इति धा
तोरेव विहितः प्राप्नोति नैवं विज्ञायते धातो
विहितस्य क्ङित इति अथवा कार्यकाले
संज्ञापरिभाषं यत्र कार्यं तत्रावस्थितं द्रष्टव्यं।
चेत् पुगन्तलघूपधस्य गुणो भवति इत्यप
स्थितमिदं भवति क्ङितीति अथवा य
दि तस्मिन्योगे क्ङिद्ग्रहणं नेदनवकाशं न
स्यानवकाशान्नाङ्गणक्लेन भविष्यतः
अथवाचार्यप्रवृत्तिर्ज्ञापयति भवत्यप
वादलक्षणस्य प्रतिषेध इति यदयं मिद
रशिष्टशिष्टेः कृत्वः इको ‒ लहलेना
चेति कृत्स्नो गोकिनौ करोति कथं कृ

न्वाज्ञापकं किं कृणास्येतत्प्रयोजनं गु
णो न स्यादिति यदि चात्र गुणप्रतिषेधो न
स्यात् किं कृणामनर्थकं स्यात् पश्यति
त्वाचार्यः भवत्युपधालक्षणस्य गुणस्य प्र
तिषेध इति ततः कृत्तेनो किमाकरोति
दीधीवेव्योर्ग्रहणं चापि नार्थः क्ङिति चेति न
चात्र क्ङितं पश्यामः अन्यल्लक्षणेन प्रा
प्नोति नलमकानस्मिन् क्ङिति प्रत्ययलक्ष
णः प्रतिषेधः अथापि तल्लक्षणमेतावस्यत्।
च्यते एवमपि न दोषः कथं न लक्षणेनात्र
गाधिकारः प्रतिनिर्दिश्यते किं तर्हि योऽसौ
त्वमनाल्प्यतेतस्मिन्नार्द्धगलस्य पकार्येण
त्र भवतीति अथाध्यगाधिकारः प्रतिनि
र्दिश्यते एवमपि न दोषः कार्यकालं संज्ञा
परिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमार्द्ध
धातुकार्यधातुकयोर्गुणो भवतीत्युपस्थि
तमिदं भवति क्ङितीति अथवा द्धोऽ
मेतत् इष्टान्तविधिं कृत्वा इदं सिभवति अथ
वा बहिरङ्गो गुणः अन्तरङ्गः प्रतिषेधः असि
द्धं बहिरङ्गमन्तरङ्गे अथवा एवं स्मिन्योगे
यदार्धधातुकग्रहणं तदनवकाशं तस्या
नवकाशत्वाद्गुणो भविष्यति इह कस्मान्न

श्री
महा
भा
२३

भवति लैगवायनः कामयते नश्चि
न काम्यतीति किं प्रकरणात् इकलक्षणा
योर्गुणवृद्ध्योः प्रतिषेधः नचैनेइग्लक्ष
णो लकारस्य क्ङिति निमित्तादेशो प्राप्नोति
वक्तव्यं स्यात् लकारस्य क्ङिन्निमित्तादेशो प्र
प्नोति वृद्धिभावः प्राप्नोति प्रचिनवे प्र
चिनवे लकारस्य क्ङिन्निमित्तादेशो प्राप्नोति प्रा
तिवल्येण इति विशेषस्य कस्तोः क्ङितः सता
त्सिद्ध यदुं विशेषकरोः क्ङितश्य प्राप्नोति ने
त्याप यत्याचार्यः नडिदादेशादिड्भव
तीति यदेतत्प्राप्यनेकमन्त्यमिति डित्वः
इतस्तु इति डितोपकार्यंतत्रं भवति डिति
यत्कार्यं तत्रं भवतीति किं विशेषेण
न नहि कथं भवत्यमानेनाप्यते पा
स्तदोपवादिष्टवचनात् अपरिणाम स्यैव
यास्यद सम्भवस्य डिन्त्वादित्यं डितश्चे
नेकरोति तस्यैतत्प्रयोजनं डितोय
कार्यं तत्र यथा स्यात् डितिपत्कार्यं तत्र।
मा भूत् दीधीवेव्योः किमर्थमिद
मुच्यते गुणवृद्धी मा भूतामिति धा
दीध्यनं आदीध्यक आवेव्यनं आवे
व्यकः इति अथ योगः शाकोकालेन कथं

दीर्घीवेयोश्छेदोविषयत्वात् इहतावद्वि
चिन्वाञ्छदमोदीर्घेन प्रदीर्घगुरिलिवञ्छ
दसिगुणास्यदर्शनात्प्रतिषेधः --- च्छ
दोविषयत्वात् दीर्घीवेयोश्छेदोविषयो
इहतावद्विचिन्वाञ्छदमः इहतावद्विधेः
च्छदसिभवति प्रदीर्घेन प्रदीर्घगुरि
ति च्छंदसिगुणास्यदर्शनात्प्रतिषेधः
अनर्थकप्रतिषेधेप्रतिषेधः अत्राप्रति
वंपत्किंचमनत्स्यादीर्घेन ह्रस्वपकृतः
कृपयन्त्वदीर्घेन प्रदीर्घगुर्द्दपावात्सोश्चता
सः भवेदिदंगुकृत्स्यदाहृत्वा प्रदीर्घेदि
ति इदंतगुकेप्रदीर्घगुरीति अयंजसिगु
णः प्रतिषेधविषयआरभ्यते यत्रैव हि
क्ङितिचेत्यनेनप्रतिषेधंबाधतेएवमिम
मपिप्रतिषेधंबाधेत नैषदोषः जसि
गुणः प्रतिषेधविषयआरभ्यमाणोस्मा
त्पुजतीयंप्रतिषेधंबाधेत कस्मात्तत्प
जातीयः यः अस्याप्राश्रयः अकृत्वाश्र
यञ्चास्य अथवाधेनलाप्राप्तेसतस्याबा
धनेभवति नचाप्राप्ते क्ङितिचेत्यनेनप्रति
षेधेजसिगुणआरभ्यते एतस्मिन्तु
नःप्राप्ते चाप्राप्तेच यदितर्हिस्पर्शयोगेना

श्री
महा
भा ५५

रभ्यतेकथंदीर्घ्यादिति दीर्घ्यातिशयत्वा
न्यायेन दीर्घ्यादितिशयन्त्वमप्ययेनभविष्य
ति इहश्वप्रोष्टशाकामकते कथंप्र
कर्णानिर्भ प्रवाणिर्भ कर्णिनाश्वः शफिला
श्वः आर्यपानकसंहुलादिर्गिन्धोद्धति
भिमानेप्रत्नरित्वहाय्यातस्पोजनं इ
डेत्पयश्चास्यात यदन्यत्स्यामोतितत्स्याम
दिति किंचान्यत्स्यामोतिगुणः यदिनिय
मः क्रियते पिपठिवते इत्यताः पिपठोः
दीर्घत्वेनप्राप्नोति नैषदोषः अंगेयत्का
र्यंतन्निपात्यते नचैतदोषे अथवासिद्धं
दीर्घत्वेनत्यामसि ह्रस्वान्निपातान्भविष्य
ति हलोनंतराः संयोगाः अनंतराइति
कथमिदंविज्ञायते अविद्यमानमंतरं
येषामिति आहोस्विदविद्यमानाअंत
रायेषामिति किंचातः यदिविज्ञायते
अविद्यमानमंतरंयेषामिति अवगृह्
संयोगसंज्ञानप्राप्नोति अधिकत्वात्
इति विग्रहेऽप्यंतरमिति अथविज्ञा
यते अविद्यमानाअंतरायेषामिति न
दोषोभवति यद्यालदोषस्तथात्र अथ
वाप्तुनरस्तु अविद्यमानमंतरंयेषामि

तिनन्वचोक्तमवग्रहेसंयोगसंज्ञानप्रा
प्नोतीति प्रश्लिष्यप्लइति विच्छेदात्त्वं
तर्हिलिङ्गेघरोषोनप्रयोजनं संयोगसं
ज्ञायांसहवचनेयथास्यात्संयोगसंज्ञाया
सहग्रहणंकर्तव्यं हलोनन्तराःसंयोगः
सहेति किंप्रयोजनं सबहूनामपिसंयो
गसंज्ञायथास्यात् एकैकस्यमाभूदिति
यथान्यत्रयथा गुणाश्रायिपदेष्वलिस
हस्त्यलाकार्यं नष्करोतिसहग्रहणं
तन्नयथासहस्रस्य उभेग्रहणस्वसहेति
किंचस्यात् यद्येकैकस्यहलःसंयोगसं
ज्ञास्यात् इहनिर्याणात् निर्वाणात् वाक्य
स्यसंयोगादेरितिलोपप्रसज्येत इहसहवी
ष्ट स्प्तनस्यसंयोगादेरितीडप्रसज्येत इह
चसंस्कृयतइति गुणोर्तिसंयोगाद्योरिति
गुणःप्रसज्येत इहचहषत्करोति समि
ति समित्करोति संयोगान्तस्यलोपइति
लोपःप्रसज्येत इहचनिर्याणःनिर्वाणइति
संयोगादेरातोधातोर्यण्वतइतिनिष्ठानत्वं
प्रसज्येत नैषदोषःयत्तावदुच्यते निर्वा
णादिति वाक्यस्यसंयोगादेरितिलोपःप्रसज्ये
तइति नैवविज्ञायते संयोगाद्यादिर्यस्येति

श्री
महा
भा
५५

सोयंसंयोगादिःसंयोगादिरिति कथं
तर्हि संयोगावादौयस्यसोयंसंयोगादिः
संयोगादिरितिएवंतावत् सर्वसंयोगका
र्येपरिहृते यस्तूच्यते इषत्करोति स
मित्करोतीति संयोगान्तस्यलोपःप्रस
ज्येतेति नैवविज्ञायते संयोगान्तोयस्य
तदिदंसंयोगान्तं संयोगान्तस्येति कथं
तर्हिसंयोगावन्तौयस्यतदिदंसंयोगान्तं
संयोगान्तस्येति यस्तूच्यते इहचग्ला
कावल्लेतिस्कोःसंयोगाद्योरिति कथं
तर्हिसंयोगयोरादिःसंयोगादिःसंयोगा
द्योरिति यस्तूच्यते इहचनिर्याणोनि
र्वाणइति संयोगादेरातोधातोर्यण्वतइ
तिनिष्ठानत्वंप्रसज्येतेति नैवविज्ञायते
संयोगआद्यादिर्यस्यसोयंसंयोगादिः संयो
गादेरिति कथंतर्हिसंयोगावादीयस्य
सोयंसंयोगादिःसंयोगादेरिति कथंत
र्ह्येकैकस्यहलःसंयोगसंज्ञाप्राप्नोतिप्र
त्येकंवाक्यपरिसमाप्तिर्दृष्टेति तद्यथा
गुणवद्भ्योसहस्रंप्रत्येकंभवन्तइति नन्वचा
यमप्यस्तिदृष्टान्तः समुदायेवाक्यपरि
समाप्तिरिति तद्यथा गर्गाःशतंदं

नाम्भिति अर्थेनशब्देनराजानोहिरण्येन
भवंति नचप्रत्येकंदंडयंति सत्येतस्मिन्दृ
ष्टांतेयदिप्रत्येकमित्युच्यतेइहापिसहग्र
हणंकर्तव्यं अथयतनांतरेणप्रत्येकमिति
वचनं प्रत्येकंगणाहलिसंज्ञेभवतः इहा
पितर्हिनार्थः सहग्रहणेन अथयथैवबहू
नामानंतर्येकिंनद्वयोर्द्वयोः संज्ञा अहो।
स्विद्विशेषेण कस्माद्विशेषः समुदाये
संयोगादिलोपोमस्तेः समुदायेसंयोगादि
लोपः मस्जेर्वक्तव्यः मंक्तामंक्तं मंक्ष्यामि
तिरश्च निर्ग्लायात निर्ग्लेयात निर्म्लायात
निर्म्लेयात इतिवान्यस्यसंयोगादेरित्येतेन
प्राप्नोति इहचसंस्वरिषीष्टेति ऋतश्चसंयो
गादेरितीट्नप्राप्नोति इहचनिर्ग्लानः नि
र्म्लान इति संयोगादेरातोधातोर्यण्वत इति
निष्ठानत्वंनप्राप्नोतिइति अस्तुतर्हिद्वयोर्द्व
योः संयोगः द्वयोर्हलोःसंयोगइतिचेद्द्विव
चनं द्वयोर्हलोःसंयोगइतिचेद्द्विर्वचनंनप्रा
प्नोति इंद्रमिच्छति इंद्रीयति इंद्रीयतेःसन
इंदिद्रीयिषति नंद्राःसंयोगादयइतिद्विर्वच
नंनप्राप्नोति नवासिधेः नवाएषदोषः किं
कारणं अवसिधेः अचोनंद्राःसंयोगादयो

श्री
मह
भा
५८

नद्विरुच्यंते अजादेरितिवर्त्तते अथयदि
बहूनामेवसंयोगसंज्ञा अथापिद्वयोः किं
गतमेतत् इयतासूत्रेण आहोस्विदन्यत
रस्मिन्यत्ने अयःसूत्रेकर्तव्यागतमित्याह
कथंनाबहूनांसंयोगसंज्ञातदेवविग्रहं
करिष्यते अविद्यमानमंतरंयेषामिति य
दाद्वयोर्द्वयोस्तदेवविग्रहःकरिष्यते अवि
द्यमानांतरयेषामिति द्वयोस्त्वेवान्तराक
ङ्क्षिर्भवति नवाएवमपिबहूनामेवसंयोग
संज्ञाप्राप्नोति याह्रिद्रिभवानसंख्याप्रति
निर्दिशति एतेषामेवानवकाशेनभवित
व्यं अस्तुतर्हिद्वयोरेकानामसमुदायेसंयोगसं
ज्ञा ननुचोक्तंसमुदायेसंयोगादिलोपोमस्
तेरिति नैषदोषःबहूनामेतत् प्रमाणंसर्वो
मस्जेर्मिदन्त्यात्संयोगादिलोपार्थमिति अ
थवाविशेषणंसंयोगसंज्ञाविज्ञास्यते द्वयो
र्द्वयोरपिबहूनामपि द्वयोर्द्वयोः संयोगसंज्ञातं
दाश्रयोलोपोभविष्यति यदप्युच्यते इहनि
निर्ग्लेयात निर्ग्लायात निर्म्लेयात निर्म्ला
यात इतिवान्यस्यसंयोगादेरित्येतेनप्राप्नो
तीति प्रातनासंयोगादिविशेषविशेषणमः
संयोगस्यसंयोगादेनिपर्वतेनावश्यसंयोगपी

हृते यदुच्यते गोमानकरोति संयोगांत
स्यलोपइतिलोपोनप्राप्नोतीति पदेनसंयोगं
विशेषयिष्यामः पदस्यसंयोगांतस्येति य
दस्मुच्यते निर्यातोनिर्वातःसंयोगादेरा
तोधातोर्यण्वतइतिनिष्ठानत्वंनप्राप्नोती।
ति धातुनासंयोगादिंविशेषयिष्यामःधा
तोःसंयोगादेरिति सर्वानंतर्हितवचने स
र्वैरनंतर्हिताहलःसंयोगसंज्ञाभवतीतिव
क्तव्ये व्यवहितानामाभूत् पचतिपचसे
नन्वचानेनताइत्युच्यतेनव्यवहितानांनभ
विष्यति इष्यमानेनतर्थ्यव्यवहितेपि व्यवहि
तेप्यनेनतरशब्दोदृश्यते तद्यथा अनंतरावि
मौग्रामावित्युच्यते तयोश्चेदंतरानद्यःप
र्वताश्चभवंति यदितर्ह्यव्यवहितेप्यनेन
रशब्दोभवति आनंतर्यवचनमिदानींकि
मर्थंस्यात् आनंतर्यवचनेकिमर्थमितिचे
देकप्रतिषेधार्थं एकैकस्याहलःसंयोगसं
ज्ञामाभूदिति किंचस्यात् यद्येकैकस्याहलः
संयोगसंज्ञास्यात् उयष उवाष इजादेर्गुरु
मतोनृच्छइत्याम्प्रत्ययःप्रसज्येत नचात
ज्जातीयव्यवायात् नवाएषदोषः किंकार
णंअतज्जातीयव्यवायात् अतज्जातीयकं

श्री
महा
भा
५२

हिलोकेव्यवधायकंभवति कथंपुनर्ज्ञा
यते अतज्जातीयकंलोकेव्यवधायकं
भवति एवंकश्चित्कंचित्पृच्छति अनेन
रेपनेव्राह्मणकुलेइति सआहनानंतरे
वृषलकुलमनयोरंतरइति किंपुनःका
रणं क्वचित्तज्जातीयकंव्यवधायकंभ
वति क्वचिन्नसर्वेवैतज्जातीयकंव्यव
धायकंभवति कथमनंतरावेताविमौग्रा
माविति ग्रामशब्दोयंबह्वर्थोस्त्येव शा।
लासमुदायेवर्तते तद्यथाग्रामोदग्धइ
ति अस्तिवाटपरिक्षेपेवर्तते तद्यथाग्रा
मंप्रविष्टइति अस्तिमनुष्येषुवर्तते त
द्यथाग्रामोगतोग्राममागतइति अस्ति
सारण्यकेससीमकेसस्थंडिलकेवर्तते त
द्यथाग्रामोलब्धइति तद्यःसारण्यकेस
सीमकेसस्थंडिलकेवर्तते तमभिसमीक्ष्यै
तत्प्रयुज्यते अनंतराविमौग्रामाविति
सर्वत्रैवह्यतज्जातीयकंव्यवधायकंभव
ति मुखनासिकावचनोनुनासिकः कि
मिदंमुखनासिकावचनइति मुखंचना
सिकाचमुखनासिकं मुखनासिकेनव
चनमस्यसोयंमुखनासिकावचनः यद्येवं

म्यत्वेनानासिकत्ववचनइतिप्राप्नोति निपा
तनादीर्घत्वंनभविष्यति अथवामुत्वेना
सिकभाववचनमस्यास्तीयमुत्वेनासिका
वचनः किंसिद्धमाववचनइति ईषद्वचन
मावचनेकिंचिन्नासिकावचने मुत्वेहि
तोयावानासिकावचनमस्यास्तीयमुत्वेना
सिकावचनः अथमुत्वग्रहणं किमर्थं
नासिकावचनेनानुनासिकइत्युच्यमानेय
मानुस्वाराणामेवप्रसज्येत मुत्वग्रहणे
पुनः क्रियमाणेनदोषोभवति अथना
सिकाग्रहणं किमर्थं मुत्ववचनेनानुना
सिकइत्युच्यमानेक चटतपानामेव
प्रसज्येत नासिकाग्रहणेपुनः क्रियमा
णेनदोषोभवतिमुत्वग्रहणं शक्यमक
र्तुं केनेदानीमुभयवचनानांसिद्धंभवि
ष्यति प्रासादवासिन्यायेनभविष्यति
तद्यथा केचित्प्रासादवासिनः केचिद्भू
मिवासिनः केचिदुभयवासिनः येप्रासाद
वासिनोगृह्यन्तेतेप्रासादवासिग्रहणेन ये
भूमिवासिनोगृह्यन्तेतेभूमिवासिग्रहणेन
यउभयवासिनोगृह्यन्तेतेप्रासादवासिग्रह
णेनभूमिवासिग्रहणेनच एवमिहापिके

श्री
महा
भा
५८

चिन्मुत्ववचनाः केचिन्नासिकावचनाः
केचिदुभयवचनाः येनमुत्ववचना
गृह्यन्तेतेमुत्ववचनग्रहणेन येनासिका
वचनागृह्यन्तेतेमुत्ववचनग्रहणेन येना
सिकावचनागृह्यन्तेतेनासिकावचनग्रह
णेन यउभयवचनागृह्यन्तेतेमुत्ववच
न ग्रहणेननासिकावचनग्रहणेनच
भवेदुभयवचनानांसिद्धंयमानुस्वारा
णामपिप्राप्नोति नैषदोषः नप्रयोजनं
इतरेतराश्रयंतन्नभवतिकेनेतरेतराश्रया
नामनेनानुनासिकसंज्ञायांभवितव्यं
संज्ञयाचानुनासिकोभाव्यतेतदितरेत
राश्रयंभवति इतरेतराश्रयाणिकार्या
णिनप्रकल्पन्ते अनुनासिकसंज्ञायामि
तरेतराश्रयमुक्तं किमुक्तं सिद्धंतुनित्य
शब्दत्वात् नित्याः शब्दाः नित्येषुशब्देषु
सतोनुनासिकस्यसंज्ञाक्रियते नसंज्ञ
यानुनासिकोभाव्यते यदिनित्याः श
ब्दाः शास्त्रंकिमर्थं शास्त्रंकिमर्थमिति
चेन्निवर्तकत्वात्सिद्धं निवर्तकंशास्त्रं क
थंग्रामस्याप्यविशेषेणोपदिष्टः अनु
नासिकः तस्यसर्वत्रानुनासिकत्वेहि

प्रसक्ता नचानेन निर्हृतिः क्रियते चेद्
स्याद्यपरत्वस्यास्येन नासिकसंयोगेन ना
सिकः साधुर्भवतीति तुल्यास्यप्रयत्नं स
वर्णं तुल्यास्ये मितं तत्त्वं आस्ये च प्रयत्न
श्चास्यप्रयत्ने तुल्यमास्यप्रयत्नं सवर्ण
संज्ञं भवति किं पुनरास्यं लौकिकमास्य
मोष्ठात्प्रभृति प्राक्काकलकात् काकल
कं नाम ग्रीवायामुन्नतः प्रदेशः कथं पु
नरास्यं अस्यन्त्यनेन वर्णानित्यास्यं अथवा
अन्नमेतदास्यन्दत इत्यास्यं अथ कः प्रय
त्नः प्रयतनं प्रयत्नः प्रपूर्वाद्यततेर्भावसा
धनो नङ्प्रत्ययः यदि लौकिकमास्यं कि
मास्योपादाने प्रयोजनं सर्वेषां हि त
त्तुल्यं वक्ष्यत्येतत् प्रयत्नविशेषणमा
स्योपादानमिति सवर्णसंज्ञायामभिन्नदे
शेषु तिप्रसंगः प्रयत्नसामान्यात् सव
र्णसंज्ञायामभिन्नदेशेषु तिप्रसंगो भवति
ञचगडदशां किं कारणं प्रयत्नसामान्या
त् एतेषां हि समानः प्रयत्नः सिद्धं त्वास्ये
तुल्यदेशप्रयत्नं सवर्णं सिद्धमेतत् कथं
आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसं
ज्ञा भवन्तीति वक्तव्यं एवमपि किमास्यो

श्री
महा
भा
५९

पादाने प्रयोजनं सर्वेषां हि तत्तुल्यं प्रय
त्नविशेषणमास्योपादानं सन्ति ह्यास्या
द्बाह्याः प्रयत्नाः तेष्वपि तुल्या भवति तेषु
सत्स्वसत्स्वपि वा सवर्णसंज्ञा सिद्धा भवति
के पुनस्ते विवारसंवारश्वासनादघोष
वद्घोषवत्ता अल्पप्राणता महाप्राणते
ति तत्र वर्गाणां प्रथमद्वितीया विवृतक
ण्ठाः श्वासानुप्रदानाः अघोषाः एकेऽल्प
प्राणा इतरे महाप्राणाः तृतीयचतुर्थाः
संवृतकण्ठाः नादानुप्रदानाः घोषवन्तः
एकेऽल्पप्राणा इतरे महाप्राणाः यथा
तृतीयास्तथा पञ्चमाः आनुनासिक्यव
र्ज्जं आनुनासिक्यं तेषामधिको गुणः
एवमप्यवर्णस्य सवर्णसंज्ञा न प्राप्नोति वि
वृतत्वादाकारस्य संवृतत्वादकारस्य
न सवर्णमेकरूपं इति एवमपि व्यपदेशो
न प्रकल्पते आस्ये येषां तुल्यो देशः प्र
यत्नश्चेति व्यपदेशवद्भावेन व्यपदेशो
भविष्यति सिद्धान्तिसूत्रं तर्हि भिद्यते य
थान्यासमेवास्तु ननु चोक्तं सवर्णसंज्ञा
यामभिन्नदेशेषु तिप्रसंगः प्रयत्नसामान्या
त् नैष दोषः आस्ये भवमास्यं न हि तो।

किकमास्य किंतर्हितद्धितांतमास्यं शरी
रावयवायत् किंपुनरास्ये भवं स्थानंकर
णंच एवमपिप्रयत्नोविशेषितोभवति
प्रयत्नश्चविशेषितः कथंतर्हिप्रयतने
प्रयत्नः किंतर्हिप्रारंभोयत्नस्यप्रयत्नः
एवमप्यवर्णस्य एङोश्चसवर्णसंज्ञान
प्राप्नोति यस्मिन्श्ववर्णावैते सुवर्णस्यत
र्हि एचोश्चसवर्णसंज्ञाप्राप्नोति किंतत
तरावर्णयोरेवतर्हिमिथःसवर्ण
संज्ञाप्राप्नोति नैतौतस्यानोदात्तादी
नांतर्हिसवर्णसंज्ञानप्राप्नोति प्रभेदका
उदात्तादयः अथवाकिंनेतेन प्रारंभो
यत्नस्यप्रयत्नइति प्रयतनमेवप्रयत्नः
तदेतनतद्धितांतमास्यं यत्समानेनराश्र
यिष्यामः किंसतिभेदेसमानमाहू सत्य
मेवहिभेदेसवर्णसंज्ञयाभवितव्या कुत
एतत् भेदाधिष्ठानासवर्णसंज्ञा यद
समेवैसमानंतच्चतत्स्यात् सवर्णसंज्ञा
वचनमनर्थकंस्यात् यदितर्हिसतिभे
देकिंचित्समानमितिकृत्वासवर्णसंज्ञा
भविष्यति शकारछकारयोःषकारठ
कारयोरपिसकारथकारयोरपिसवर्ण

श्री
महा
भा
९

शब्देन विषमउपन्यासः इहैकेषिद्रुणाः अथ
र्थपरिमाणं नामरूपानवाचकाभवंति यथ
तैसंख्याः शब्दाः परिमाणशब्दाश्चैव संभवन्ति
एकेनाप्युपायेन भवति द्रोणः खारी आढक
मिति नैवाधिके न न्यूने केचिद्यावदेव तत्र भव
ति तावदेवाहुः यथा नेन्द्रियेणाशब्दाः शाश्च

श्री
म॰ भा॰
२२३

तैलं घृतमिति खार्यामपि भवति द्रोणोपि शुक्लः
नीलः कृष्ण इति हिमवत्यपि भवति वटकणि
कामात्रेपि द्रव्ये अथ संख्यावाचकपरिमाण
नामर्थानां क्रियते साकेनाधिक ·· स्यात्।
एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति तदेकदेश
भूतं तद्ग्रहणेन गृह्यत इति यदयं नेदमद
सोरकोरिति सककारयोः प्रतिषेधं शास्ति
कथं कृत्वा ज्ञापकम् इदमदसोः कार्यमुच्य
मानं कः प्रसंगः यत्सककारयोः स्यात् यत्त
र्हि न वाच्यं तदेकदेशभूतं तद्ग्रहणेन गृह्यते
इत्यतस्सककारयोः प्रतिषेधं शास्ति अथ द्वि
तीयं प्रत्ययग्रहणं किमर्थं प्रत्ययग्रहणं पदा
दावप्रसंगार्थम् प्रत्ययग्रहणं क्रियते पदा
दौ यसंख्यासाभूदिति किं च स्यात् अर्थ
मुर्थमिति अथ गस्याति इषुस्यवसोस्याताम्
परिमाणार्थे चापि द्वितीयं प्रत्ययग्रहणं क्रियते
यस्मात्प्रत्ययविधिस्तदादेशमिन्नुपमाणे
द्यातन्यस्याप्यसंज्ञाप्रसंगस्तत्तर्हि कर्तव्य
न कर्तव्यं कथमित्यानीमंगकार्यं भविष्यति
प्रत्यय इति प्रकृत्यंगकार्यं वक्ष्यामि प्रत्यय
इति प्रकृत्यंगकार्यं वक्ष्यामि प्राकरणे उपदिष्टे
म् उपसर्गास्त्वेव ···· प्रातुतः सिद्धं तु प्र
त्ययग्रहणे यस्मात्स प्रत्ययो विहितस्तदा

हेस्तदंतस्य च ग्रहणं भवतीत्येषापरिभाषाक
र्तव्या कः पुनरत्र विशेषः एषा वा परिभाषा क्रि
येत प्रत्ययग्रहणं वा अवश्यमेषा परिभाषा
कर्तव्या बह्वन्येतस्याः परिभाषायाः प्रयोज
नानि कानि प्रयोजनं धातुप्रातिपदिकप्रत्य
यसमासतद्धितविधिस्वराः धातरेवदृन्नः ।
चिकीर्षकः संघातस्य धातुसंज्ञा प्राप्नोति
धातुप्रातिपदिके देवदत्तग .... संघातस्य
प्रातिपदिकसंज्ञा प्राप्नोति प्रातिपदिकं प्र
त्ययमहांतं पुत्रमिच्छति संघातात्प्रत्ययोत्प
त्तिः प्राप्नोति प्रत्यय समासकृद्धस्य राज्ञः पु
रुषः संघातस्य समाससंज्ञा प्राप्नोति समास
तद्धितविधिर्देवदत्तगार्ग्यायणः संघातात्त
द्धितोत्पत्तिः प्राप्नोति तद्धितविधि स्वरदेव
दत्तो गार्ग्यः संघाते ञित्याद्युदात्तत्वं प्राप्नोत्य
तः प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भ
वतीति न दोषो भवति सा तर्ह्येषा परिभाषा
कर्तव्या न कर्तव्या एवं वक्ष्यामि यस्मात्प्रत्य
यविधिस्तदादि प्रत्यये परतः समाणेष्यते ।
ततो गसंज्ञा च भवति यस्मात्प्रत्ययो विधि
स्तदादि प्रत्यये परि प्रत्ययग्रहणे यस्मात्स
तदादेर्ग्रहणं भवतीत्यनुच्यते अवतप्तेनकु
लस्थितं तत्पतत्त उदकविशीर्णेत पतत्त ।

श्रीः म॰ भा॰ २७४

सगतिकेन ससनकुलेन समासो न प्राप्नोति एवं त
र्हि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्य
त्र नत्वेव वक्ष्यामि कृद्ग्रहणे गतिकारक एवं स्या
पि ग्रहणं भवतीत्येषा परिभाषा कर्तव्या कान्य
स्याः परिभाषायाः प्रयोजनानि प्रयोजनं सं
घाततद्धितविधिस्वराः अवतप्तेनकुलस्थितं
तेपतत्त उदकेविशीर्णेत पतत्त सगतिकेन स
नकुलेन च समासः सिद्धो भवति समासतद्धि
तविधि सांकुटिनम् व्याक्रोशी संघातात्तद्धि
तोत्पत्तिः सिद्धा भवति कृद्ग्रहणे गतिकारक
पूर्वस्यापि ग्रहणं भवतीति न दोषो भवति सा त
र्हि एषा परिभाषा कर्तव्या न कर्तव्या आचार्य
प्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं
गतिरनन्तर इति अनंतरग्रहणं करोतीति ॥
सुप्तिङन्तं पदं अंतग्रहणं किमर्थं न सुप्तिङौ वा
च्येत केनेदानीं तदंतानां भविष्यतीति तदंतवि
धिना अन्तग्रहणं पठति पदसंज्ञायां तदंतवच
नमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदंतवि
धिप्रतिषेधार्थम् पदसंज्ञायामंतग्रहणं क्रि
यते ज्ञापकार्थं किं ज्ञाप्यम् एतज्ज्ञापयत्याचा
र्यः अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे न तदं
तविधिर्भवतीति किमेतस्य ज्ञापने प्रयोजनं
नरमसमर्याचः नरमसमर्थेतस्य च संज्ञा न भवती

ति किं च स्यात् कुमारी गौरितराद्यतिश्च नयाक्रो
स्रोभवतीति कृत्स्नं प्रसज्येत यद्येतज्ज्ञाप्यते स
नाघंताघानवः श्रुतग्रहणं कर्तव्यं क्रोडादिनस
मासाश्च श्रुतग्रहणं कर्तव्यं इदं प्रक्रोडाप का
र्थम् हेतावप्रियते न्यासएव यदपुच्यते क्रो
डादिनसमासाश्च श्रुतग्रहणं कर्तव्यमिति न
कर्तव्यं सूर्यंवदिति वर्तते क्रोडादितां तेवैवा
र्थवित् नैकवसाः क्रोडादिताः ॥ नःक्ये ॥
किमर्थमिदमुच्यते नलं वर्तते परमित्येव सिद्धे
नियमार्थोयमारंभः नांतमेव क्ये पदसंज्ञं भवति
नान्यत् कमाश्व वाध्यति सिध्यति ॥ स्वादि
ष्वसर्वनामस्थाने ॥ असर्वनामस्थान इत्युच्य
ते तत्र तेराजानत्वाम् असर्वनामस्थान इति प्रति
षेधः प्रसज्येत नाप्रतिषेधात् नायं प्रसज्यप्र
तिषेधात् नायं प्रसज्यप्रतिषेधः सर्वनामस्था
नेनेति किं तर्हि पर्युदासोयम् यदन्यत्सर्वना
मस्थानादिति सर्वनामस्थाने व्यापारः यदिके
न चित्प्राप्नोति तेन भविष्यति सर्वेन च प्राप्नोति
अप्राप्नेव अयथा चैनेतरायाम्प्राप्तिः साप्रतिषि
धेः कृतयत्नदनेन तस्याविधिर्वा भवति प्रतिषे
धो वा एवं प्राप्तिप्रतिषिद्धानया भविष्यति ॥
नन्वेव प्राप्तिः पूर्वाप्राप्तिवाधेन नो त्वन्तत प्र
तिषिद्धामतीवाधितस्य अयथायोगविभागः

श्री॰
म॰ मा॰
२१५

करिष्यते स्वादिष्ट एवं पदसंज्ञं भवति ततः स
र्वनामस्थाने अयचि एवं पदसंज्ञं भवति यजा
दावसर्वनामस्थाने इति यदित्तर्हि साद्यपि पदं
भवति पयः स्तनविकामेपदां तग्रहणं वादितं
इहमाभूत मद्रेकरोत्प्रियोविति नास्मिंक्रिया
माणेपिप्राप्नोति वाक्यपदयोरंत्यस्येत्येवं तत्
भवङ्योवारभवद्भ्यः पदसंज्ञा वक्तव्या भवद्भ्यः
वारयद्भ्यः ॥ यचिभम् ॥ भसंज्ञायामन्तरपदलो
पेषषः प्रतिषेधः भसंज्ञायामन्तरपदलोपे षषः
प्रतिषेधयोक्तव्यः षडंगुलिः षाडिक इति सिद्धम
वः स्थानिवत्वात् सिद्धमेतत्कथमवः स्थानिवद्भा
वात् संज्ञा न भविष्यति इहापि तर्हि न प्राप्नोति
वाराग्रीटेत्रः वाचिक इति वक्ष्यत्येतत्सिद्धमेका
क्षरे पूर्वपदानामन्तरपदलोपवचनादिति इहा
पि तर्हि प्राप्नोति षडंगुलिः षाडिक इति वक्ष्यत्येत
त् षषः प्रत्यादिवचनादिति नभोंगिरोमनुषो
वत्युपसंख्यानम् नभोंगिरोमनुषां वत्युपसंख्या
नेकर्तव्यम् नभस्वत् अंगिरस्वत् मनुष्वत् वृष
एवस्वश्वयोश्छन्दसि भसंज्ञा वक्तव्या वृषण्वस
वृषण्वस्य पञ्चिरवृषणश्वस्य मेने ॥ उमोम
त्वर्थे ॥ अर्थग्रहणं किमर्थं ततसौ वतावित
वोच्यते तसौ वतावितीयत्युच्यमाने इहैव स्यात्

पयस्त्वात् यशस्त्वात् इहानस्मात् पयस्वी यश
स्वी अर्थग्रहणे पुनः क्रियमाणे मत्वर्थेऽपि वसिद्धं
भवति यस्मात्प्रत्ययेन समानार्थः यद्यर्थग्रहणं
क्रियते पयस्त्वात् अत्र न प्राप्नोति वहिमतुप् ।
मत्वर्थे वर्तते मत्वर्थोऽपि मत्वर्थे वर्तते तद्यथा देव
दत्तशालायाः आसनमानीयं तामिन्सुक्तेय
दिदेवदत्तोऽपि शालातो भवति सोऽप्यानीयते अप
त्ययादीनि उभयसंज्ञान्यपीति वक्तव्यम् स
सद्रूभासस्वरकेनागोन बहुषु बहुवचनम्
बहुषु बहुवचनमित्युच्यते केषु बहुष्वर्थेषु
यद्येवं वृक्षः प्लक्षः अत्रापि प्राप्नोति बहवस्त
स्याः मूलं स्कन्धः फलं पलाशमिति एवं तर्हि ए
कवचनबहुवचनमिति शब्दसंज्ञा एता येष्वर्थेषु
द्व्यादयो विधीयन्ते केषु च द्व्यादयो विधीयन्ते कर्मादि
षु नैव कर्मादयो विभक्त्यर्थाः के तर्हि एकत्वादयः
एकत्वादिष्वपि वै विभक्त्यर्थेषु अवशेषकर्मादयो नि
मित्तत्वेनोपादेयाः कर्मणः एकत्वे कर्मणो हि द्वेक
र्मणो बहुत्व इति एवं तर्हि यथा निर्देशः कर्तव्यः न
ह्यन्तरेण भावप्रत्ययं गुणप्रधानम्'''' भवति निर्देशः
इह चैके मन्यन्ते नटे के मन्यन्ते इति परत्वादेक
वचनं भवति बहुषु बहुवचनमित्येषयोगः प
रः करिष्यते सूत्रविपर्यासश्चैवं कृतो भवति इ

श्री
म भा
१२५

ह्व बहुरोदनः बहुः सूप इति परत्वाद्बहुवचनं
प्राप्नोति नैष दोषः यत्रावबुध्यते न ह्यन्तरेण भा
वप्रत्ययं गुणप्रधानो भवति निर्देशः इह कदाचि
द्गुणो गुणिविशेषको भवति तद्यथा पटः शुक्ल
इति कदाचिच्च गुणिना गुणो विशिष्यते पट''शु
क्ल इति यदा तावद्गुणो गुणिविशेषको भवति
पटः शुक्ल इति सामानाधिकरण्यं तदा गुणगु
णिनोः तदा नान्तरेण भावप्रत्ययं गुणप्रधानो भ
वति निर्देशः यदा तु गुणिना गुणो व्यपदिश्यते प
टस्य शुक्ल इति स प्रधानस्तदा गुणो भवति न
तादृक्षेष हीतदा नान्तरेणापि भावप्रत्ययं गुणा।
प्रधानो भवति निर्देशः न च वयमिहैकत्वादि
भिः कर्मादीन्विशेषयामः किं तर्हि कर्मादिभि
रेकत्वादीन्विशेषयामः ॥ कथमेकस्मिन्नेक
वचनम् कस्यैकस्य कर्मणः द्वयोर्द्विवचनं के
योर्द्वयोः कर्मणोः बहुषु बहुवचनम् केषां
बहूनां कर्मणामिति कथं बहुषु बहुवचन
मिति एतदेव ज्ञापयत्याचार्यः नानाधिकर
णवाचीबहुशब्दः तस्येह ग्रहणं न वैपुल्य।
वाचिन इति किमेतस्य ज्ञापने प्रयोजनम् य
दुक्तम् बहुरोदनः बहुः सूप इति परत्वाद्ब
हुवचनं प्राप्नोतीति यदप्युच्यते इह चैके
कमन्यन्त इति परत्वादेकवचनं प्राप्नोतीति नै

षेदोषः एकशब्दोयं बह्वर्थः अस्त्येव संख्यापदम्
तद्यथा एकः द्वौ बहव इति अस्त्यसहायवाची त
द्यथा एकाग्नयः एकहलानि एकाकिभिः क्षु
द्रकैर्जितमिति अस्त्यन्यार्थे वर्त्तते तद्यथा सधमा
दो द्युम्न एकास्ताः एकोन्य इत्यर्थः तदोन्यार्थे व
र्तते तस्येह प्रयोगः किमर्थं पुनरिदमुच्यते स
स्मिन्नामविशेषविधानात् द्व्येकविप्रयोगात्वाश्र
नियमार्थं वचनं सुपः अविशेषेण प्रातिपदिका
द्विधीयते तत्रैतत्स्यात् यथा अविशेषेणाविधीय
ते नैव विप्रयोगो लक्ष्यत इति द्व्येकविप्रयोगात्वाश्र
द्व्यपते त्वल्पविप्रयोगः विरुद्धः प्रयोगः तद्यथा
अक्षीणि मे दर्शनीयानि पादा मे सुकुमारा इति
स्मिन्नामविशेषविधानाद्द्व्येकविप्रयोगात्वाश्र
व्यतिकरः प्राप्नोति इष्यते वा व्यतिकरः स्यादिति
न त्वानेन यत्नेन सिध्यतीति नियमार्थं वचनम्
एवमर्थमिदमुच्यते अथ तस्मिन्क्रियमाणे द्व
नयोः प्रत्ययनियमः एकस्मिन्नेवैकवचनं द्वयो
रेव द्विवचनं बहुष्वेव बहुवचनमिति आहोस्वि
दर्थनियमः एकस्मिन्नेकवचनमेव द्वयो
र्द्विवचनमेव बहुषु बहुवचनमिति कश्चात्र विशेषः
तत्र प्रत्ययनियमे व्ययानां पदसंज्ञाभावोऽसत्त्व
वत्त्वात् अत्र प्रत्ययनियमे व्ययानां पद
संज्ञा न प्राप्नोति (उच्चैर्नीचैरिति ॥ ॥)

श्री·
प· भा·
२११

उच्चैः नीचैरिति किं कारणमसत्त्ववत्त्वात् अर्थनि
यमे सिद्धम् अर्थनियमे सिद्धं भवति अस्त्वर्थनि
यमः अथवा पुनरस्तु प्रत्ययनियमः ननु चोक्त
म् तत्र प्रत्ययनियमेव्ययानां पदसंज्ञाभावोऽस
त्त्ववत्त्वादिति नैष दोषः सुपां कर्मादयोप्यर्थाः
संख्या चैव तथा तिङाम् सुपां संख्या चैवार्थः।
कर्मादयस्तु तथा तिङां प्रसिद्धो नियमस्तत्र प्र
सिद्धस्तत्र नियमः नियमः प्रकृतेषु वा अथ
वा प्रकृतानर्थानपेक्ष्य नियमः एकत्वादयः
एकस्मिन्नेकवचनेन द्वयोर्न बहुषु द्वयोरेव
द्विवचनेन नैकस्मिन्न बहुषु बहुष्वेव बहुवचने
नैकस्मिन्न द्वयोरिति अथवाविशेषेणोत्पन्ना
ते उत्प[illegible]नां नियमः अथवा आचार्यप्रवृत्ति
ज्ञापयति भवत्यव्ययेभ्यः स्वादय इति यदय
मव्ययादाप्सुप इति अव्ययाल्लुकं शास्ति ॥ ।
इति प्रथमाध्यायस्य चतुर्थपादे द्वितीयमाह्नि
कम् ॥ २ ॥ कारके ॥ किमिदं कारक इति संज्ञा
निर्देशः किं वक्तव्यमेतत् न हि कथमनुच्यमा
नं गंस्यते इह हि व्याकरणे ये वा लोके प्रती
तपदार्थकाः शब्दाः तैर्निर्देशाः क्रियन्ते याव
ताः कृत्रिमाः टिघुभसंज्ञाः न चायं लोके प्रती
तपदार्थकः शब्दो न च लक्षणकृत्रिमा संज्ञा अधिका
रस्तत्र किमन्यच्च वक्तव्यं विज्ञातमन्यतः

संज्ञायाः कारक इति संज्ञानिर्देशश्चेत्संज्ञिनो
ऽपि निर्देशः कारक इति संज्ञानिर्देशश्चेत्संज्ञि
नोपि निर्देशः कर्तव्यः इतरथा ह्यनिष्टप्रसं
गो ग्रामस्य समीपादागच्छतीत्यकारस्य इत
रथा ह्यनिर्दिष्टप्रसंगेन अकारकस्याप्यपा
दानसंज्ञाप्रसंगेन कुग्रामस्य समीपादाग
च्छतीति नैष दोषः नात्र ग्रामोपाययुक्तः किं
तर्हि समीपं यदा च ग्रामोपाययुक्तो भवति
तदापादानसंज्ञा तद्यथा ग्रामादागच्छतीति
कर्मसंज्ञाप्रसंगोकथितस्य ब्राह्मणस्य पंथा
नं पृच्छतीति कर्मसंज्ञा च प्राप्नोति अकथित
स्य ब्राह्मणस्य पुत्रं पंथानं पृच्छतीति नैष दो
षः अप्रकथितश्चायं अल्पत्ववाचं कीर्तने
वर्तते तद्यथा कश्चित्कश्चित्स्वल्पाह अप्र
वचाकथितः अस्माद्ग्रामे कीर्तित इति अल्प
प्रधाने वर्तते तद्यथा अकथितग्रामे अक
थितो सौ नगरे इत्युच्यते योयात्राप्रधाने भ
वति तद्यथा प्राधान्ये अकथितश्चात्रोवर्तते
तदेष दोषः ॥ अपादानं हस्तस्य पर्णं पतती
ति अपादानसंज्ञा प्राप्नोति कस्य हस्तस्य प
र्णं पततीति कुड्यस्यापि एडः पततीति तदा
पायस्याविवक्षितत्वात् नैव दोषः किं कार
णम् अपायस्याविवक्षितत्वात् नात्रापायो

श्री·
क· भा·
२२८

विवक्षितः कस्तर्हि सम्बन्धः यदा चापायो विव
क्षितो भवति तदापादानसंज्ञा तद्यथा हस्तात्प
र्णं पततीति सम्बन्धस्तत्रदा विवक्षितो भवति न
ज्ञायते के कस्य वा कुड्यस्येति अर्थे नहि दोषः
कर्मसंज्ञाप्रसंगो कथितस्य ब्राह्मणस्य पुत्रं पंथा
नं पृच्छतीति नैष दोषः कारक इति महती संज्ञा
क्रियते संज्ञा च नाम न लघीयः कुतः एतत्त ल
घ्वर्थं हि संज्ञाकरणम् तत्र महत्याः संज्ञायाः क
रणे एतत्प्रयोजनम् अन्वर्थसंज्ञा यथा विज्ञा
येत करोतीति कारकमिति अन्वर्थमिति विट
क्रतेनि कल्पेशाद्वानोपपद्यते करणं कारकं अ
धिकरणं कारकमिति ॥ सिद्धं तु प्रतिकारकं
क्रियाभेदात्पचादीनां करणाधिकरणयोः क
र्तृभावः सिद्धः करणाधिकरणयोः कर्तृभावः
कुतः प्रतिकारकं क्रियाभिद्यते किमिदं प्रति
कारकमिति कारकं कारकं प्रतिकारकं ।
को सौ प्रतिकारकं क्रियाभेदः पचादीनाम् ।
अधिश्रयणोदकासेचनतण्डुलावपनैधो
पकर्षणक्रियाः कुर्वन्देवदत्तः पचतीत्युच्य
ते सर्वत्र तदापवि वर्तते एष प्रधानकर्तुः पा
कः एतत्प्रधानकर्तुः पाकः अधिश्रयणो
णोदकासेचनतण्डुलावप) तं द्रोणं पच

ति ग्राफकं पचतीति संभवनक्रियांधारणक्रियां
च कुर्वतीस्थालीपचतीत्युच्यते अत्रतदापविवे
तेने पक्तोधिकरणस्यपाकः नतुधिकरणस्यक
र्तृत्वम् एधाः पचत्यन्याविक्लप्तेन्नवलिपचतीतिज्व
लनक्रियांकुर्वतिकाष्ठानिपचंतीत्युच्यते अत्रत
दापविवेतेनेपधकरणस्यपाकः एतत्करणस्य
कर्तृत्वम् ॥ उद्यमननिपातानिकर्तृस्थितिक्रिया
उद्यमननिपातानि कुर्वन्देवदत्तश्छिनत्तीत्युच्यते
अत्रतदाच्छिदिर्वर्ततेते एधप्राधानकर्तृस्थेदः एत
त्प्रधानकर्तुः कर्तृत्वम् यत्रत्वरणेनतस्यपरशो
श्छेदनं यत्नत्समानेउद्यमनेनिपातनेनैवपुरुषेणा
छिद्यतेनत्वरणेनतस्यपरशोश्छेदनम् अवयवपवेन
द्वैवविज्ञेयंस्तत्तथाहि असित्वरणेयोश्छेदनेवि
शेषः स्यात् योहिमन्यते उद्यमननिपातनादेत
द्भवति छिन्नश्रीति असित्वरणेयोश्छेदनेअवि
शेषःस्यात् यथासिनाछिद्यतेनत्वरणेनापितच्छि
द्यते ॥ अपादानादीनांतत्प्रसिद्धिः अपादाना
दीनांतत्कर्तृत्वस्याप्रसिद्धिः तथाहिभवताक
रणाधिकरणयोः कर्तृत्वंनिदर्शितंतथापाद
नादीनांनिदर्श्यते नवास्वतंत्रपरतंत्रत्वान्नयोः
पर्यायेणवचनंवचनाश्रयावसंज्ञा नचैदोषः
किंकारणम् स्वतंत्रपरतंत्रत्वात् सर्वैवाश्रा

श्री॰
म॰ भा
२१५

स्वातंत्र्यपारतंत्र्येचविवक्षितेतयोः पर्यायेणवचन
म् तयोः स्वातंत्र्यपारतंत्र्ययोः पर्यायेणवचनेभ
विष्यति तद्यथा वलाहकाद्विद्योतते वलाह
कोविद्योततइति किंतत्सुच्युते अपादानादी
नांतत्प्रसिद्धिमितिनब्रूमः अपादानादीनांक
र्तृत्वस्याप्रसिद्धिरिति पर्यायेकरणाधिकरण
योः कर्तृत्वम् निदर्शितम् अपादानादीनांनि
दर्शनायपर्यायोस्येकः कुसूलकः स्थाल्यानिद
र्शनाय किंतर्हिसंज्ञायाअप्रसिद्धिः यावतास
र्वत्रवात्रस्वातंत्र्यपारतंत्र्यपरत्वात्कर्तृसंज्ञैव
वभवति अत्रापिनवास्वतंत्रपरतंत्रत्वान्नयोः
पर्यायेणवचनम् वचनाश्रयावसंज्ञेत्येवयथा
थापुनरिहं भवता स्थाल्याः कर्तृत्वंनिदर्शितं
संभवनक्रियांकुर्वतीस्थालीस्वतंत्रेति क्रोटा
नीपरतंत्रत्वाद्यत्रत्यतासन्नपरिवर्तनेनवानेवप
वमर्थेस्थाल्याःपारीयतेप्रत्यासन्नपरिवर्तनेनवक
रिष्यामीति किंतर्हिसंभवनक्रियांधारणक्रि
यांचकरिष्यामीति तत्रचस्थालीस्वतंत्रा क्रोटानी
परतंत्राएवं नहिस्थालीस्थीयते कथ्यमाने
स्थालीसंभवनक्रियांधारणक्रियांचकरोति
तत्रचासौस्वतंत्राक्रोटानीपरतंत्राएवंनहिप्रधा
नेनपारतंत्र्यमसमवायेस्थालीपारतंत्र्यम् वा

वायेत्वात्तत्रम् किं पुनः प्रधानं कर्ता कथं पुन
र्ज्ञायते कर्ता प्रधानमिति यत्सर्वेषु प्रधानेषु
सन्निहितेषु कर्ता प्रवर्तयिता भवति ननु च भोः
प्रधानमिति समवाये अयमेकोर्थः करणं का
रकमधिकरणं कारकमिति नायमेकोर्थः न
हि कारकमित्यनेनाधिकरणत्वमुक्तम् अधि
करणमिति कारकत्वम् न यथा गार्ग्यो देवद
त्त इति नत्र गार्ग्य इत्यनेन देवदत्तत्वमुक्तं देवद
त्त इति गार्ग्यत्वम् उभौ वान्योन्यविशेषकौ भव
तः एकद्रव्यसमवायित्वात् एवं तर्हि सामान्य
भूता क्रिया प्रवर्तते तस्या निर्वर्तकं कारकं अथ
वा यावद् ब्रूयात् क्रियायां साधकं कारकमिति एवं च
कृत्वा निर्देश उपपन्नो भवति कारक इति इतर।
था हि कारके इति ब्रूयात् ध्रुवमपायेऽपादानम्
ध्रुवमिति किमर्थं ग्रामादागच्छति शकटेन
नैतदस्ति प्रयोजनम् कारकोत्तरत्राधिका
भविष्यति इदं तर्हि वृक्षस्य पर्णं पततीति कुड्यस्य
पिण्डः पततीति जुगुप्साविरामप्रमादार्थाना
मुपसंख्यानं कर्तव्यं अधर्माज्जुगुप्सते अधर्मा
द्बीभत्सते जुगुप्सा विराम धर्माद्विरमति धर्मा
न्निवर्तते विराम प्रमाद धर्मात्प्रमाद्यति धर्मा
न्मुह्यति इह चोपसंख्यानं कर्तव्यम् सांकाश्य

श्री०
म भा०
२८

केभ्यः पाटलिपुत्रका अभिरूपतरा इति तत्रेदं
दं वक्तव्यम् न वक्तव्यम् ध्रुवमपायेऽपादा
नमित्यपादानमेव सिद्धम् इह तावत् अधर्मा
ज्जुगुप्सते अधर्माद्बीभत्सत इति य एष मनु
ष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखोऽधर्मः
कर्तव्यं नानेन कृत्यमस्तीति स बुद्ध्या संप्राप्य नि
वर्तते तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्
इह धर्माद्विरमति निवर्तते प्रमाद्यति मुह्यती
ति य एष मनुष्यः संभिन्नबुद्धिर्भवति स पश्यति
नेदं किंचिद्धर्मो नाम नैनं करिष्यामीति
स बुद्ध्या संप्राप्य विरमति निवर्तते प्रमा
द्यति मुह्यति तत्र ध्रुवमपायेऽपादानमित्येव
सिद्धम् इह च सांकाश्यकेभ्यः पाटलिपुत्रका
अभिरूपतरा इति ये तैः साम्यं गतवन्तो भवन्ति
स प्रकर्षमवाप्य बुद्ध्या संप्राप्यान्या।
न्निवर्तते सामान्यात्तत्र ध्रुवमपाय इत्येव सिद्धम्
गतियुक्ते अपादानसंज्ञा नोपपद्यते ध्रुवत्वात्
गतियुक्ते अपादानसंज्ञा नोपपद्यते अध्रुवत्वा।
स्तात्पतितः रथात्प्रवीतात्पतितः सार्थाद्ग
च्छतो हीन इति किं कारणम् अध्रुवत्वात् ध्रौव्य
स्याविवक्षितत्वात् नैष दोषः किं कारणम्
अध्रौव्यस्याविवक्षितत्वात् नात्राध्रौव्यं विवक्षितं

किंतर्हि ध्रौव्यम् इहतावदश्वाद्ध्रस्तात्पतितइति
यदश्वेत्वसमाश्रुगामित्वं तद्ध्रुवं तस्यविवक्षित
म् रथात्प्रवीतात्पतितइति यत्तद्रथस्यरथत्वेस्मिने
तस्मिन्नपिसतितद्ध्रुवं तस्यविवक्षितं यद्यपितावद्
दैवेनशुकात्तेवक्तुम् यद्देवेनुन्नंतंगतिर्युक्ता
लेषुकथंयावतः पतितः ईयमानात्पतितइ
ति अत्रापितथौव्यस्याविवक्षितत्वादित्येवक्।
र्यंपुनः सतोधर्मा विवक्ष्यास्यात् सतोप्यवि
वक्षाभवति तद्यथा अलोमिकापत्तका अनु
दराकन्यति असतश्चविवक्षाभवति समुद्रः
कुण्डिकाविंध्योवर्द्धितमभवति ॥ भीत्रार्था
नाम् ॥ अयंयोगःशक्योवक्तुम् कथंवृकेभ्यो
बिभेति चौरेभ्योबिभेतिदस्युभ्योबिभेतिद।
स्युभ्यस्त्रायतेइति इहतावत् वृकेभ्योबिभेति
दस्युभ्योबिभेतीति यदायंमनुष्यः प्रेक्षापू
र्वकारीभवति सपश्यतियदिमांवृकाःपश्यं
तिध्रुवोमेमृत्युरितिसबुद्ध्यासंप्राप्यनिवर्तते
तत्रध्रुवमपायेऽपादानमित्येवसिद्धम् चौरे
भ्यस्त्रायतेइहयोयस्यसुहृद्भवतिसपश्यतिय
दीमंचौराःपश्यंतिध्रुवोऽस्यवधबंधनपरि
क्लेशाइतिसबुद्ध्यासंप्राप्यनिवर्तयतितत्रध्रु
वमपायेऽपादानमित्येवसिद्धम् ॥ पराजे

श्री
म॰ भा॰
२८१

रसोढः ॥ अयमपियोगःशक्योवक्तुम् कथम
ध्ययनात्पराजयते पश्यत्ययंदुःखमध्यय
नंदुर्धरंचगुरवश्चदुरुपचाराइतिसबुद्ध्यासंप्रा
प्यनिवर्ततेतत्रध्रुवमपायेऽपादानमित्येवसिद्ध
म् ॥ वारणार्थानामीप्सितः ॥ किमुदाहरणम्
माषेभ्योगावारयतीति भवेद्यस्यमाषानगावः
तस्यमाषाईप्सिताःस्युः यस्यतुखलुगावोन।
माषाःकथंतस्यमाषाईप्सिताः तस्यापिमाषा
एवेप्सिताः पश्यत्ययंयदिगावोमाषान्भक्षयेयुः
तदहममाधर्मेवराजभयंचेति अतस्तेप्सिताय
हेभ्योगावारयति इहकूपादंधंवारयतीति
कूपेऽपादानसंज्ञानप्राप्नोतिनह्यत्रस्यकूप
ईप्सिताःकस्तर्हियः तस्यापिकूपएवेप्सितः
पश्यत्ययमेषःकूपेमापप्तदिति ॥ अथवा
यथैवास्यान्यत्रापिपश्यतः ईप्सायवकूपेइ
ति इहाग्नेर्माणवकंवारयतीति माणव
केऽपादानसंज्ञाप्राप्नोति कर्मसंज्ञात्रबाधि
काभविष्यति अग्नावपितर्हिबाधिकास्या
त् तस्मात्कर्तुःकर्मणायदीप्सितमितिवा
वारणार्थेषुकर्मग्रहणानर्थकम् किंका
रणम् कर्तुरीप्सिततमंकर्मेतिवचनात्
वारणार्थेषुकर्मग्रहणमनर्थकंकिंकार

णे कर्तुरीप्सिततमं कर्मेति कर्मेति वचनात्
कर्तुरीप्सिततमं कर्मेत्येव सिद्धम् अयमपि
योगः शक्योऽवक्तुम् कथं माषेभ्यो गां वारयती
ति पश्यत्ययं यदीमास्तत्र गच्छन्ति ध्रुवः सस्यवि
नाशः सस्यविनाशेऽधर्मोऽविनाशकस्यैव नाश
भयं चेति स बुद्ध्या संप्राप्य निवर्तयति तत्र ध्रुव
मपायेऽपादानमित्येव सिद्धम् ॥ अन्तर्धौ येनाद
र्शनमिच्छतीति ॥ अयमपि योगः शक्योऽवक्तुम्
कथमुपाध्यायादंतर्धत्ते इति पश्यत्ययं यदि
मामुपाध्यायः पश्यति ध्रुवं मे प्रेषणमुपाल
म्भ इति स बुद्ध्या संप्राप्य निवर्तते तत्र ध्रुवमपा
येऽपादानमित्येव सिद्धम् न चेद्वोक्तमाख्याता
उपयोगे कारकमिति चेत्कथितत्वात्कर्म
संज्ञाप्रसंग इति नैष दोषः परिगणनं क्रि
यते दुहियाचिरुधिप्रच्छिभिक्षिचिञामिति
अयमपि योगः शक्योऽवक्तुम् कथमुपाध्या
यादधीते इति अपक्रामति तत्तस्मादध्ययनं
यद्यपक्रामति किं नात्यन्तायापक्रामति संत
तत्वात् अथवा ज्योतिर्वज्ज्ञानानि भवन्तीति ॥
जनिकर्तुः प्रकृतिः ॥ अयमपि योगः श
क्योऽवक्तुम् कथं गोलोमाविलोमभ्यो दूर्वा
जायंत इति अपक्रामन्ति तेभ्यस्ताः यद्यपक्रा

श्री
म. भा
२८२

मंति किं नात्यंतायापक्रामंति संततत्वात् अथ
वान्यास्त्वन्यास्त्वप्रादुर्भवन्तीति ॥ भुवः प्रभवः ॥
अयमपि योगः शक्योऽवक्तुम् ॥ कथं हिमवतो
गंगा प्रभवतीति अपक्रामति तस्मादापः यद्य
पक्रामति किं नात्यन्तायापक्रामंति संततत्वात्
अथवान्यास्त्वन्यास्त्वप्रादुर्भवन्तीति ॥ कर्मणायं ॥
कर्मग्रहणं किमर्थं यमभिप्रैति संप्रदानमितीय
त्युच्यमाने कर्मण एव संप्रदानसंज्ञा प्रसज्येत ।
येन ग्रहणे पुनः क्रियमाणे न दोषो भवति ये
न ग्रहणादभिप्रयतः संप्रदानसंज्ञा निर्भज्यते ॥
अथाभिप्रग्रहणं किमर्थं कर्मणा यमेति ॥
कर्मग्रहणे पुनः क्रियमाणे न दोषो भवति क
र्मनिमित्तत्वेनोपादीयते अथ यत्संप्रग्रहणं कि
मर्थं कर्मणाभिप्रैति संप्रदानमित्युच्यमाने ।
अभिप्रायस्यैव संप्रदानसंज्ञा प्रसज्येत ॥ स
संप्रदानमितीयत्युच्यमाने यमेव संप्रैती
ति तस्यैव स्यात् उपाध्यायाय गां ददातीत्यत्र न
स्यात् उपाध्यायाय गामदात् उपाध्यायाय गां
दास्यतीति अभिप्रग्रहणे पुनः क्रियमाणे न दो
षो भवति अभिराभिमुख्ये वर्तते प्रशब्द आदिक
र्माणि तेन यं वाभिप्रैति यं वाभिप्रैष्यति यं वा
भिप्रायात् तत्र तत्राभिमुख्यमात्रे सिद्धं भवति

क्रियाग्रहणमपि कर्त्तव्यं इहापि यथा स्यात्
श्राद्धाय निगल्हते युद्धाय सन्नह्यतीति पत्ये
शेत इति तत्तर्हि कर्त्तव्यं न कर्त्तव्यं कर्मणा यम
भिप्रैत्येत्येव सिद्धम् कथं क्रिया लोके कर्मे
त्युपचर्यते तद्यथा कां क्रियां करिष्यति किं कर्म
करिष्यामीति एवमपि वक्तव्यम् कृत्रिमाकृ
त्रिमयोः कृत्रिमे संप्रत्ययो भवति क्रियाकृत्रि
मं कर्म न सिध्यति कर्तुरीप्सिततमं कर्मेत्युच्य
माने कथं नाम क्रिया क्रियया ईप्सिततमा स्या
त् क्रियापि क्रियया ईप्सिततमा भवति क
या क्रियया संपश्यति क्रियया प्रार्थयति क्रिय
या अध्यवस्यति क्रियया क्रियया ‥‥‥ ‥
मनुष्यः प्रेक्षापूर्वकारी सन्बुद्ध्या तावत्कंचिद
र्थं संपश्यति संदृष्टे प्रार्थना प्रार्थनया अध्यव
सायः अध्यवसाये आरम्भः आरम्भो निर्वृत्तिः
निर्वृत्तौ फलावाप्तिः एवं क्रियापि कृत्रिमं क
र्मैवमपि कर्त्तव्यम् ॥ कर्मणः करणसंज्ञा
संप्रदानस्य च कर्मसंज्ञा पशुना रुद्रं यजते प
शुं रुद्राय ददाति अर्थो वा किल पशुः संदिश्य
ते स रुद्राय उपाक्रियत इति ॥ क्रुधद्रुह ॥
किमिमे एकार्थाः कथंरूपिता षाकाते ।
विशेषयितव्यम् नानार्थाः कथं तेषां रूपो ।

श्री
म. भा.
२८१

सामान्यमस्ति आहोस्विन्नानार्थाः किंचातः यद्येका
र्थाः किमर्थं प्रत्येकं निर्दिश्यन्ते अथ नानार्थाः ॥
तेषां कथं रूपो सामान्यमस्ति न यत्रूपितः क्रु
ध्यतिना वा रूपितः द्रुह्यतिना वा रूपित ईर्ष्यति
ना वा रूपितासूयति ॥ साधकतमं करणं ॥
तमग्रहणं किमर्थं न साधकं करणमित्येवो
च्यते साधकं करणमितीयत्युच्यमाने सर्वेषा
मेव कारकाणां करणसंज्ञा प्रसज्येत सर्वाणि
कारकाणि साधकानि तमग्रहणे पुनः क्रिय
माणे न दोषो भवति नैतदस्ति प्रयोजनम् पूर्वो
त्तरावत्संज्ञा अपवादत्वाद्बाधिका भविष्यतीति ।
अपाय एव कृत्वा अपादानसंज्ञा प्राप्नोति सा
धकं करणमितीयत्युच्यमाने सति च करणसं
ज्ञा न तमग्रहणे पुनः क्रियमाणे न दोषो भवति
एवं तर्हि लोकत एव सिद्धम् तद्यथा अभिरूपायो
दकमानेयम् अभिरूपतमायेति च गम्यते ए
वमिहापि साधकं करणमित्युच्यमाने सर्वाणि
च कारकाणि साधकानि तत्र साधके प्रवृत्ते
सति तत्र साधकतममिति विज्ञास्यते एवं त
र्हि सिद्धे सति यत्तमग्रहणं करोति तज्ज्ञापयत्या
चार्यः कारकसंज्ञायां तरतमयोगो न भवती
ति किमेतस्य ज्ञापने प्रयोजनम् आधारमाधा
यः किं न्याय्यं मन्यते यत्र संप्राप्य निर्वृत्तिरिति

हैवस्मात् ग्रामादागच्छति नगरादागच्छतीति सां
काश्यकेभ्यः पाटलिपुत्रकाअभिरूपतराइत्यत्र
तस्मात् कारकसंज्ञायां तरबतमयोगो न भवती
त्यत्रापि सिद्धं भवति ॥ आधारोधिकरणं ॥ कत्याधे
मन्यते यत्रापेयः कृत्स्नमाधारे ······ गंगा
यांगावः कूपेगर्गकुलमित्यत्र न स्यात् कारक
संज्ञायां तरबतमयोगो न भवतीत्यत्रापि सिद्धं भ
वति ॥ उपान्वध्या··ङ्वसः ॥ वसेरश्यर्थस्य प्रति
षेधः वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः ग्रामे उ
पवसतीति सत्यं हि वक्तव्यो न वक्तव्यः नात्राप
पूर्वस्य वसेर्ग्रामोधिकरणं किं तर्हि उपपूर्वस्य
ग्रामे सोव्वसंस्त्रिरात्रमुपवसतीति ॥ कर्तुरी
प्सिततमं कर्म ॥ तमब्ग्रहणं किमर्थम् कर्तु
रीप्सितं कर्मेतीयत्युच्यमाने अग्नेर्माणवकं
वारयतीति माणवकेपादानसंज्ञा प्राप्नोति नै
षदोषः कर्मसंज्ञा तद्बाधिका भविष्यति अ
ग्नावपि तर्हि बाधिका प्राप्नोति कृते पुनस्तम
ब्ग्रहणे तदुपपन्नं भवति यदुक्तं वारणार्थेषु क
र्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति व
चनादिति इहाप्यते ओदनं पचतीति यदि वा
ह्ययः पयसौदन इत्यंतरमभिनिर्वर्तते नैष दोषः
तादर्थ्यात्ताच्छब्द्यं भविष्यति ओदनार्थास्तण्डु
लाओदन इति अथेदं कथं भवितव्यं तण्डुला

श्री॰
म॰ भा॰
२८५

नोदनं पचतीति आहोस्वित्तण्डुलानामोदनं
पचतीति उभयथापि भवितव्यम् कथमिह
तण्डुलानोदनं पचतीति द्व्यर्थः पचिस्तण्डुला
न् पचन्नोदनं निर्वर्तयतीति इह कश्चित्कंचि
दामंत्रयते सिद्धं भक्ष्यतां आमंत्र्यमाण आह
प्रभक्तं भक्तवानस्मीति आमंत्र्यमाण आ
ह दधिवल्लभं भविष्यतीति आमंत्र्यमाण आह
दभावल्लभं जीयपयसावल्लभं जीयेति
तत्र कर्मसंज्ञा प्राप्नोति तडिनस्येप्सिततमं
भवति तस्माप्योरनु पचेप्सितः तत्रगुणप्र
स्यात् रोयस्त्वयथा भंजीयामिहोदनं यदि
मे दुर्विशाहः स्यादिति एवमिद्धापि दधिगु
णमोदनं भंजीयेति ईप्सितस्य कर्मसंज्ञा
यानिहन्नस्य कारकत्वे कर्मसंज्ञाप्रसंगः क्रि
येप्सितत्वात् ईप्सितस्य कर्मसंज्ञायां निह
न्नेस्य कारकत्वे कर्मसंज्ञा न प्राप्नोति गुडं भक्ष
यतीति किंकारणं उभयोप्सितत्वात् उभ
येन स्येप्सितं अतश्चोभयं यस्माद्धि गुडभक्ष
णे बुद्धिः प्रसक्ता भवति नासौ लोहोभक्षयि
त्वा कृती भवति यथापि तावदस्त्रेण श्रुकानेव
श्रम येत्वेते राजा कर्मिणो मनुष्यास्तेषां क
स्मिंश्चिदाहकटं ··· ··· हतमाह

नाहं कटं करिष्यामीति निवृत्तो मया कृतमिति
तस्य क्रियामात्रमीप्सितम् नै ....
.... यस्याविभक्त
एं स्यापायो मन्यते यस्तदिह ....
.... किं पुनस्तत् ग्रामान्तरमयेगच्छ
न्नहिलब्धयति चौरांपश्यति ....
..... ईप्सितस्यापि कर्मसंज्ञा भवति अनी
प्सितस्यापि यथादिदानीं नैवेप्सितं नाप्यनी
प्सितं तत्र ग्रामान्तरमयेगच्छ कुप्यकुलान्यु
पसर्पति हत्तम्लान्युपसर्पतीति अत्रा
पि सिद्धम् अनीप्सितमिति नायं प्रसज्यप्रति
षेधः ईप्सितं नीति किं तर्हि पर्युदासोयम् ।
यदन्यदीप्सितादनीप्सितमिति अन्यच्चैव
तदीप्सितान्नैवेप्सितं नाप्यनीप्सितमिति
अकथितं च केनाकथितं अपादानादि
विशेषकाभिः किमुदाहरणम् दुहिया
चिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमि
त्तमपूर्वविधौ ब्रुविशासिगुणेन च यत्सचे
त तदकीर्तितमाचरितं कविना इहि गांदो
ग्धि पयः नैतदस्ति कथितात्र पूर्वापादान
संज्ञा दुहियाचि इदं तर्हि पौरवं गां याचते
कथितात्रापि पूर्वापादानसंज्ञा न यावता

देवापायो भवति यावितो सौ यदि ददाति
ततोपायेन युज्यते याविरुवि अवकणादि
गांव्रजम् नैतदस्ति कथितात्र पूर्वेणास्य।
दानसंज्ञा .. न प्रश्नादेवापायो भवति पृष्टोसौ
यदा चेष्टतेतोपायेन युज्यते प्रच्छिभिक्षिपौ
रवं गां भिक्षते नैतदस्ति कथितात्र पूर्वोपाद
नसंज्ञा न भिक्षणादेवापायो भवति भिक्षि
तो सौ यदि ददाति ततोपायेन युज्यते भिक्षि
चिञ् वृक्षमवचिनोति फलानि नैतदस्ति
कथितात्र पूर्वोपादानसंज्ञा ब्रुविशासिगु
णेन च यत्सचते तदकीर्तितमाचरितं कवि
ना ब्रुविगुणेन शासिगुणेन च यत्सचते त
स्याचरणं किं पुनस्तत् पुत्रं ब्रूते धर्मं पु
त्रमनुशास्ति धर्ममिति नैतदस्ति कथिता
त्र पूर्वा संप्रदानसंज्ञा न स्माजीण्येवोदाहृ
रणानि पौरवं गां याचते माणवकं पन्थानं
पृच्छति पौरवं गां भिक्षते इति अथ ये धा
तूनां द्विकर्मकाः किं तेषां कथितेलादयो
भवति ....

पौरवस्य कम्बलमिति अकारकं यत्कथितं
अकारकं येन तद्भवति किंकारणमकथितत्वा
त् कारकं चेन्नाकथा अथ कारकमकथित
त्वात् कारकामतिकाकतेज्या कारकं चेद्वि
ज्ञानीयात् यांयोमन्यत साभवेत् कारकं चे
द्विज्ञानीयात् याया प्राप्नोति सास्मा कतेज्या।
दुःहते गोपयः याचते पौरवान् कम्बलमिति
कथिते अभिहिते त्व विधिस्त्वमतिर्गुणकर्मणि
लादिविधिः सपरे ॥ कथिते अभिहिते त्व वि
धिरेष भवति किमिदं त्वविधिरिति त्व वि
धिस्त्वविधिः त्वमतिः किमिदं त्वमतिरिति
त्वमतिः नैवमन्ये मन्यन्ते .... गुण
कर्मणि लादिः विधिः सपरे ॥ गुणकर्मणि
लादयो भवन्ति सह परेण योगेनयाति वुद्धि
भक्ष्यवसानार्थशब्दकर्माकर्मणामणिक
र्त्ता सणाविति द्विविधं हितं शक्तिश्च चाप्य।
णिपरंतत्र त्वमनेवं वचनं स्मरन्त्र द्विविध शक्ति।
शुद्धे चा शुक्तिश्च अगुणे कर्मणि लादयो भ
वन्तीति यत तदनत्यमनते नोमाचार्यस्य वच
नेस्मर्यंतेनाम अपरस्त्वाह प्रधानकर्मण्या
ख्येये तां लादयोभवन्तीति वक्तव्यम् दु
ह्यते गौः पयः ॥ एवंते कत्वे स्वकर्मणः लाद

श्री:
म· ह्ला·
२०६

योभवतीति वक्तव्यम् गम्यते ग्रामं देवदत्तो
यज्ञदत्तेन केपुनर्धात्वोर्द्धिकर्मकाः नीवो
ह्यहृते स्त्रापि गत्यर्थाः तेष्वेव चाहिकर्मके अप्र
ग्रहणं द्रष्टव्यमिति निश्चयः अजां नयति ग्रामम
सिद्धं वाप्यन्यकर्मणः सिद्धं वा पुनरेतद्भवति
कुतः भारं वहति ग्रामम् गत्यर्थो नाम गमयति
देवदत्तं ग्रामम् यापयति देवदत्तं ग्रामम् कुतो
न्यकर्मणः अन्यस्याजाजाकर्मान्यस्य ग्रामः अ
जामसौ गृहीत्वा ग्रामं नयति अन्यकर्मेति चे
द्व्यात् लादीनामविधिर्भवति अन्यकर्मेति
चेद्व्यात् लादीनामविधिरयंभवति अजानी
यते ग्राममिति परस्मायनउत्पद्यमाने नलेशा
त्वाया अभिधानं प्राप्नोति ॥ कालभावाध्वगन्त
व्याः कर्मसंज्ञा अकर्मणां कालभावाध्वगन्त
व्या अकर्मणां धातूनां कर्मसंज्ञा भवतीति वक्त
व्यम् कालस्ताममासं भावगोदोहमास्ते गो
दोहं स्वपिति गोदोहं शेते अध्वगन्ते क्रोशमास्ते
क्रोशं स्वपिति ॥ देशश्चाकर्मकाणां कर्मसं
ज्ञो भवतीति वक्तव्यम् कुरून् स्वपिति पंचालान्
स्वपितीति वक्तव्यम् विपरीतं तु कल्पकर्म।
कल्म ॥ अपरिसमाप्तकर्मकल्मकवर्षोवि
दुः किमिदं कल्मेति अपरिसमाप्तकर्म कल्मे

अपरिसमाप्तं कर्म नन्वास्मिन्सर्वाणि कर्मका
र्याणि क्रियन्ते द्वितीयैव यस्मिन्कर्मण्युत्पद्य
ते न्यदान्वर्थयोगापि वयन्नु ब्रूमो नत्कर्मक
ल्मेति च कल्पनाक्रियो न हि ह्येतन्निर्वलत्वोना
स्ति ॥ एतेन कर्मसंज्ञा सर्वसिद्धा भवत्यकथिते
न तच्चेप्सितस्य किं स्यात्पयो नन्न कर्मसंज्ञायाः
यन्नकथितेन प्रत्तादीप्सितपक्षे च लत्र सिद्ध्यर्थ
म् ईप्सितमेव तु यत्स्यात्तत्स्य भाविष्यत्यकथिते
न ॥ अथेह कथं भवितव्यम् नेताश्वस्य स्रुघ्न।
मिति आहोस्वित्नेता अश्वस्येति उभयथा गो
णिकापुत्रः ॥ गतिबुद्धिप्रत्यव ॥ शाब्दकर्मेति
कथमिदं विज्ञायते शाब्दो येषां क्रिये ते आहो
स्वित् शब्दो येषां कर्मेति किं चात्र विशेषः शाब्दक
र्मनिर्देशे शब्दक्रियाणामिति ह्वयत्यादीनां
प्रतिषेधः शब्दकर्मनिर्देशे शब्दक्रियाणामिति
चेत् ह्वयत्यादीनां प्रतिषेधो वक्तव्यः केपुन
ह्वयत्यादयः ह्वयति क्रन्दति शब्दायते ह्वय
ति देवदत्तः ह्वाययति देवदत्तेन क्रन्दति देव
दत्तः क्रन्दयति देवदत्तेन शब्दायते देवदत्तः
शब्दाययति देवदत्तेन ॥ शृणोत्यादीनां चोप
संख्यानम् अशब्दक्रियत्वात् शृणोत्यादी
नां चोपसंख्यानं कर्तव्यम् के पुनः शृणोत्या

दयः शृणोति विजानाति उपलभ्यते शृणोति दे
वदत्तः श्रावयति देवदत्तम् विज्ञापयति देवदत्त
म् उपलभते देवदत्तः उपलम्भयति देवदत्तम्
किं पुनः कारणं न सिद्ध्यति अशब्दक्रियात्वात्
श्रुत्तनहि शब्दो येषां शब्दो हि कर्मेति शब्दकर्म
णः इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम् शा
ब्दकर्मणः इति चेज्जल्पतिप्रभृतीनामुपसंख्यान
म्कर्तव्यम् केपुनर्जल्पतिप्रभृतयः जल्पति
विलपति आभाषते जल्पति देवदत्तः विला
पयति देवदत्तम् आभाषते देवदत्तः आभा
षयते देवदत्तम् ॥ दृशेः सर्वत्रोपसंख्यानक
र्तव्यम् ॥ पश्यति रूपतर्कः कार्षापणं दर्शय
ति रूपतर्कं कार्षापणम् ॥ आदिखादिनीवही
नां प्रतिषेधः ॥ आदिखादिनीवहीनां प्रतिषे
धो वक्तव्यः अत्ति देवदत्तः आदयते देवदत्तेन
अपर आह सर्वमेतत्प्रत्यवसानकार्यं चेत्तद्भव
ति इति वक्तव्यम् परस्मैपदमपीदमेकामि
ष्यते कोऽधिकरणे च ध्रौव्यार्थेति प्रत्यवसानार्थे
भ्यः इदमेषां जग्धम् अत्ति खादति खादति देवद
त्तः खादयति देवदत्तेन खादनीनयति देवद
त्तः नाययति देवदत्तेन वहति नियन्ता कर्षक
र्षति वहति भारं देवदत्तेन अनियन्तृकर्तृ

कस्येतिकिमर्थं वहंतिवलीवर्दायवान् वाह
यतिवलीवर्दायवान् भक्षेरहिंसार्थस्येतिवक्त
व्यम् भक्षयतिपिंडींदेवदत्तः भक्षयतिपिंडीं
देवदत्तेन अहिंसार्थस्येतिकिमर्थम् भक्षय।
तियवान्वलीवर्दाः भक्षयंतियवान्वलीवर्दान्
अकर्मकग्रहणेकालकर्मग्रहणाणां कारणमुपसं।
ख्यानंकर्तव्यम् मासमास्तेदेवदत्तः मासमासय
तिदेवदत्तम् ॥ सिद्धंतुकालकर्मणामकर्मव
द्वचनात् ॥ सिद्धमेतत्कथं कालकर्मकाअकर्म
वद्भवंतीतिवक्तव्यम् तत्रहिवक्तव्यम् नवक्तव्य
म् अकर्मकाणामित्युच्यते नचकेचित्कालभा
वाध्वभिरकर्मकाः तएवंविज्ञास्यामः क्वचिद
कर्मकाइति अथवायेनकर्मणासकर्मकाश्चा
कर्मकाश्चभवंति तेनाकर्मकाणांनचैतेनक
र्मणाकश्चिदप्यकर्मकः अथवायत्कर्मभवतिनच
भवतितेनाकर्मणांनचैतेनकर्मक्वचिदपिनभवति
हृक्रोरन्यतरस्याम् ॥ हृक्रोर्वावचनेभिवादि
दृशोरात्मनेपदेउपसंख्यानम् हृक्रोर्वा
वचनेभिवादिदृशोरात्मनेपदे उपसंख्यानं
कर्तव्यम् अभिवदतिगुरुंदेवदत्तः ॥ ।
अभिवादयतेगुरुंदेवदत्तंयज्ञवंधुः ॥ अ
भिवादयतेगुरुंदेवदत्तेनयज्ञवंधुः अभिवादयते

श्री·
म· भा·
२८८

गुरुंदेवदत्तंयज्ञवंधुः अभिवादयतेगुरुमदेव
दत्तेनयज्ञवंधुः पश्यंतिभृत्याराजानम् दर्शय
तेभृत्यानराजा दर्शयतेभृत्यैराजा कथंवात्मने
पदम् पकस्यापिवश्चेति अपरस्याणेर्णाविति
अपरस्याणिचश्चेति ॥ स्वतंत्रःकर्ता ॥ किंयस्य
स्वतंत्रःसस्वतंत्रः किंचातः तंत्रवायप्राप्नोति नै
षदोषः अयंतंत्रशब्दोस्त्येवविताने वर्ततेतद्यथा
आस्तीर्णतंत्रम् प्रोतंतंत्रमिति अस्तिप्रधानेवर्त
ते तद्यथास्वतंत्रोऽयंब्राह्मणइत्युच्यतेस्वप्रधानइति
गम्यते तद्यःप्राधान्येवर्ततेतंत्रशब्दस्तस्येदंग्र
हणम् स्वतंत्रस्यकर्तृसंज्ञायांहेतुमित्युपसं
ख्यानम् अस्वतंत्रत्वात् स्वतंत्रस्यकर्तृसंज्ञायांहे
तुमत्युपसंख्यानंकर्तव्यम् पाचयत्योदनंदेव
दत्तोयज्ञदत्तेनेति किंपुनःकारणंनसिध्यति
अस्वतंत्रत्वात् नवास्वातंत्र्यादितरथाह्यकुर्व
त्यपिकारयतीतिस्यात् नवाकर्तव्यं किंकार।
णम् स्वातंत्र्यम् स्वतंत्रोऽसौभवति इतरथाह्य
कुर्वत्यपिकारयतीतिस्यात् नाकुर्वतीतिचे
त्स्वतंत्रः अकुर्वत्यपितस्मिकारयतीतिस्यात्
योहिमन्येनकुर्वन्स्वतंत्रः अकुर्वन्नसौस्वतंत्रः
नचेत्कुर्वंति नतस्मिंकारयतीत्येतद्भवति स्व
तंत्रोऽसौभवतीति ॥ तत्प्रयोजकोहेतुश्च
॥ प्रैषोस्वतंत्रप्रयोजकस्तत्संज्ञाप्रसिद्धिः

प्रेषे स्वतंत्रप्रयोजकत्वाद्धेतुसंज्ञयाप्रसिद्धिः स्व
तंत्रप्रयोजको हेतुसंज्ञो भवतीत्युच्यते न चासौ
स्वतंत्रं प्रयोजयति स्वतंत्रत्वात्सिद्धम् स्वतंत्रत्वा
त्सिद्धमेतत् स्वतंत्रमसौ प्रयोजयति स्वतंत्रत्वात्सि
द्धम् स्वतंत्रत्वात्सिद्धमिति चेत्स्वतंत्रपरतंत्रत्वं विप्र
तिषिद्धम् यदि स्वतंत्रो न प्रयोज्यः अथ प्रयोज्यो न
स्वतंत्रः प्रयोज्यः स्वतंत्रश्चेति विप्रतिषिद्धम् उ
क्तं वा ॥ किमुक्तम् एकं तावदुक्तं न वा स्वतंत्रत्वादि
तरथा ह्यकुर्वन्त्यपि कारयतीति स्यादिति अपरउ
क्तं न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टम्
स्वतंत्रप्रयोजकत्वात् प्रयोजक इति चेत्तक्तं सश
येन तुल्यम् ॥ इति श्रीमहाभाष्ये प्रथमाध्याय
स्य चतुर्थे पादे तृतीयमाह्निकम् ॥ ३ ॥ प्राग्री
श्वरान्निपाताः ॥ किमर्थं रेफोधिक ईश्वरश
ब्दो गृह्यते रीश्वराद्धीश्वरान्माभूत् रीश्वरादिति
च्यमाने वीश्वरो माभूत् शाकिणमुल्कमलोवी
श्वरे तोसुंकसुनाविति नैतदस्ति प्रयोजनम्
आचार्यप्रवृत्तिर्ज्ञापयति अनंतरो य ईश्वरश
ब्दस्तस्य ग्रहणमिति यदयं कृन्मेजंत इति कृन्मे
जंतस्यैजंतस्य चाव्ययसंज्ञां शास्ति कृन्मेजंत
परोपि सः परोप्येतस्मात् कृन्मेजंतः शास्ति तद
र्थमेतत्स्यात् यत्रसंख्याव्ययीभावस्याव्ययसंज्ञां
शास्ति तज्ज्ञापयत्याचार्यः अनंतरो य ईश्वर

शब्दस्तस्य ग्रहणमिति यदयं कृन्मेजंत इ
ति कृन्मेजंतस्यैजंतस्य चाव्ययसंज्ञां शास्ति
कृन्मेजंतः परोपि सः परोप्येतस्मात्कृन्मेजंतः
शास्ति तदर्थमेतत्स्यात् यत्रसंख्याव्ययीभावस्या
व्ययसंज्ञां शास्ति तज्ज्ञापयत्याचार्यः अनंतरो ईश्वर
शब्दस्तस्य ग्रहणमिति समासेष्वव्ययीभावः
समासेष्वेव ज्ञापकं स्यात् अव्ययीभाव एव
समासोऽव्ययसंज्ञो भवति नान्य इति एवं तर्हि
लोकत एतत्सिद्धम् तद्यथा लोके आवनीता
त् प्रियं प्रोथमनुव्रजेत् इति य एव प्रथमोव
नीतः उदकांतस्थाततो उव्रजति लौकिकं
चानिवर्तते द्वितीयेन्त्वलीयं वनांतमुदकांतं
चानुव्रजति तस्माद्रेफादिक ईश्वरशब्दो ग्रही
तव्यः ॥ अथ प्राग्वचनं किमर्थम् प्राग्वचनं
क्रियते निपातसंज्ञायामनिवृत्तिर्यथा स्यात्
अनुच्यमाने हि प्राग्वचने नवकाशा गत्युप
सर्गकर्मप्रवचनीयसंज्ञा निपातसंज्ञां बा
धेरन् तां माबाधिषतेति प्राग्वचनं क्रियते
क्रियमाणेपि प्राग्वचने तावत् नावकाशा
एताः संज्ञाः कस्मादेव न बाधन्ते क्रियमाणे
प्राग्वचने स्यां निपातसंज्ञायाम् एतेश्च
अवयवसंज्ञाः तत्र वचनात्समावेशो भवति

ति ॥ चादयोऽसत्त्वे ॥ अयं सत्त्वशब्दोऽस्त्येव द्रव्य
पदार्थकः तद्यथा सत्त्वमयं ब्राह्मणः सत्त्वमियं
ब्राह्मणीति अस्ति क्रियापदार्थकः सद्भावः सत्त्व
मिति कस्येदं ग्रहणम् द्रव्यपदार्थकस्य ग्रहणम्
कुत एतत् एवं हि कृत्वा विधिरप्यसिद्धो भवति प्र
तिषेधश्च किं पुनरयं पर्युदासो यदन्यत्सत्त्वव
नादिति आहोस्वित्प्रसज्यायं प्रतिषेधः सत्त्वव
नेति किं चातः यदि पर्युदासः विप्रश्च प्रा
प्नोति द्रव्याद्द्रव्यवचनोऽयं संज्ञातः द्रव्यादन्यस्य
च विधिराश्रीयते अस्ति च प्रादिभिः सामान्यमि
ति कृत्वा तदेतद्वचनाद्विधिना निपातसंज्ञा प्रा
प्नोति अथ प्रसज्यप्रतिषेधः न दोषो भवति यथा
न दोषस्तथास्तु प्रादय उपसर्गाः क्रियायोगे प्रा
दय इति योगविभागो निपातसंज्ञार्थः प्रादय
इति योगविभागः कर्तव्यः प्रादयोऽसत्त्ववचना नि
पातसंज्ञा भवन्तीति तत उपसर्गाः क्रियायोगे इति
किमर्थो योगविभागः निपातसंज्ञार्थः निपात
संज्ञार्थः निपातसंज्ञा यथा स्यात् एकयोगे हि नि
पातसंज्ञाभावः एकयोगे हि निपातसंज्ञाभावः
स्यात् यस्मिन्नेव विशेषे गत्युपसर्गकर्मप्रवच
नीयसंज्ञास्तस्मिन्नेव विशेषे निपातसंज्ञा स्यात्
मरुच्छब्दस्योपसंख्यानम् मरुच्छब्दस्योपसंख्या

श्री॰
म॰ भा॰
२५॰

नं कर्तव्यम् मरुद्दत्तः मरुत्तः अच उपसर्गादिति
तत्वं यथा स्यात् श्रच्छब्दस्योपसंख्यानम् श्रच्छब्द
स्योपसंख्यानं कर्तव्यम् श्रद्धा ॥ गतिश्च ॥ कारिका
शब्दस्योपसंख्यानं कर्तव्यं कारिकाकृत्य पुन
श्चनसौ छन्दसि गतिसंज्ञे भवत इति वक्तव्यम्
पुनरुत्स्यूतं वासो देयं पुनर्निष्कृतो रथः उशान्
नश्चो न दहतः ॥ गत्युपसर्गसंज्ञाः क्रियायोगे
यत्क्रियायुक्तास्तं प्रतीति वचनम् गत्युपसर्गसं
ज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रति गत्युपस
र्गसंज्ञा भवन्तीति वक्तव्यम् किं प्रयोजनम् प्र
योजनं षत्वणत्वे षत्वम् विगताः सेचकाः । अ
स्माद्ग्रामाद्विसेचको ग्रामः उपसर्गात्सुनोती
ति षत्वं माभूत् णत्वम् प्रगता नायका अस्मा
द्ग्रामात्प्रनायको ग्रामः उपसर्गादिति णत्वं
माभूत् ॥ वृद्धि वृद्धौ च धातुग्रहणमनर्थकम् ॥
वृद्धि वृद्धौ च धातुग्रहणमनर्थकम् उपसर्गा
दृति धातावितिधातुग्रहणं तत्प्रयोजनम्
इह माभूत् प्रर्षभं वनमिति क्रियामात्रे चापि
धातुग्रहणे प्रर्च्छकस्यात्रैप्राप्नोति यत्क्रियायु
क्तास्तं प्रतीति वचनान्न भवति तद्विधिर्न भा
वाधीनः सांगादिस्वरणत्वेषु दोषो भवति ॥
तद्विधिः यत्र हतो नियतो यानि भस्मात् ॥ न

द्विधा। नम्भावः प्रणमेत्स्तवम् उन्नमेत्स्तवम् नु
भाव अधीव यत् रेयम् नीयम् समीपम् अधीव
स्वांगादिस्वर प्रस्फिक प्रोदरः स्वांगादिस्वरणात्व
प्रणः छुदः प्रैण आर्यः प्रणोनाशाहुब्रह्म उप
सर्गादित्येते विषयेन प्राप्नुवंति तद्विधिनम्भावा
धीत्व स्वांगादिस्वरणात्वे अवचनप्रामाण्यात्किइम
अनवकाशापतेविषयः तेवचनप्रामाण्याद्भवि
ष्यति ॥ सङ्गोः प्रतिषेधेत्रैविधितत्रषत्वणत्वे
ष्वंवक्तव्यः। सङ्गोः प्रतिषेधेत्रैविधितत्वषत्व
णत्वेष्ववक्तव्यः ॥ त्रैविधि स्तलमङ्गलमम्।
उपसर्गादितित्रुमाभूदिति नस्सदर्थोत्रुमित्ये
तद्वक्तव्यम्भवति नेतदस्तिप्रयोजनम् क्रियं
तेन्यासएवत्रैविधि तत्र स्तदत्रः अत्र उपसर्गा
दिति तत्वंमाभूतनत्व षत्व सस्क्रियदषा
तेनस्तस्तंतेलोकषातेन उपसर्गादितिषत्वं।
माभूदिति स्वः पूजायामित्येत न वक्तव्यम भ
वति नेतदस्तिप्रयोजनम् क्रियतेन्यासएव।
षत्व णत्व इत्येयः इत्येतमिति उपसर्गादि।
तिणत्वंमाभूदिति ॥ उपर्यादिष्विनावस्त्र ॥
कृतास्त्रियोगइतिवक्तव्यम् इदेवयथास्या
त उरीकृत्य उरीकृत्य इदमाभूत उरीप
क्तेति तत्रहिवक्तव्यं नवक्तव्यम् क्रियायोग

श्री॰
म॰ भा॰
२५१

इतिवर्तनेनचान्यथाक्रियायतिग्रादिष्वितोवा
येगोस्ति ॥ अनुकरणंचानितिपरम् ॥ क
थमिदंविज्ञायते इतेः परमितिपरम् नइतिप
रमिति आहोस्वित् इतिः परोयस्मात्तदिदमि
तिपरंनेतिपरमनितिपरम् इति खाटितिकृत्वा
निरष्ठीवत् अतिप्रतिषेधो न प्राप्नोति अथवि
ज्ञायते इतिः परोयस्मात्तदिदमितिपरंन इति
परमनितिपरमिति श्रौषट्वौषडितिकृत्वा
निरष्ठीवत् अत्र च प्राप्नोति अस्तनावत् इतिः
परोयस्मात्तदिदमितिपरंन इति परमनिति
परमितिन तु चोक्तम् श्रौषट् वौषडितिकृत्वा
निरष्ठीवत् अत्र न प्राप्नोति नैष दोषः इदं तावद
यं प्रष्टव्यः अथेह कस्मान्न भवति खाटितिकथंगानिमा
त्रस्य एवं प्रयोगो भवतीति उपाड्वहतीति इति
गत्वा कृत्रिमं दृश्यते इहापि तस्य अनुकरणं निर्दि
श्यते किमर्थं पुनरिदमुच्यते अनुकरणस्यानि
करणपरप्रतिषेधो निष्टाभूतनिवृत्त्यर्थम् अ
नुकरणस्येतिकरणप्रतिषेध उच्यते किंप्रयो
जनम् अनिष्टाभ्रूतनिवृत्त्यर्थम् अनिष्टश्रु
तामाभूत् इदं विचारयिष्यति तेषामाख्यातव
चनं प्रयोगानियमार्थं वास्यात् संज्ञानियमा
र्थंवेति तत्रहि प्रयोगानियमार्थमनिष्टभ्रू

इनिवृत्त्यर्थम् अनिष्टशब्दतामाभूदिति ॥
छन्दसि परव्यवहितवचनम् ॥ छन्दसि परे
व्यवहिताश्चेति वक्तव्यम् ॥ संज्ञानियमः सि
द्धम् संज्ञानियमे सति सिद्धं भवति अस्तु त
र्हि संज्ञानियमः ॥ उभयोरनर्थकं वचनमनि
ष्टदर्शनात् ॥ उभयोरपि पक्षयोर्वचनमनर्थ
कम् किं कारणम् अनिष्टदर्शनात् नहि किं
चिदनिष्टं दृश्यते नहि कश्चिदपचतीति प्रयो
क्तव्ये पचति प्रेति प्रयुंक्त इति यदि चानिष्टं दृ
श्यते ततो यत्नार्हः स्यात् उपसर्जनसन्निपाते त
एवं परव्यवस्थार्थमिदं वक्तव्यम् ऋषभं कु
लमइजम् ऋषभं कुलमद्रहम् अत्र चैते प्रा
ग्धातोः प्रयोगो यथा स्यात् यद्युपसर्जनं नि
ते एवं परव्यवस्थार्थमिदमुच्यते सकण्टकारा
णि वीरणानि दुष्कण्टकराणि वीरणानि अत्रा
ते प्राग्धातोः प्रयोगः प्राप्नोति आचार्यप्रवृत्ति
र्ज्ञापयति नात्र गतेः प्राग्धातोः प्रयोगो भवतीति
यदयमीषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खलिति
खकारमनुबन्धं करोति कथं कृत्वा ज्ञापकम् खि
त्करणमेतस्य प्रयोजनम् खित्यनीति मुम्यथा स्यात् य
दि चात्र गतेः प्राग्धातोः प्रयोगः स्यात् खित्करणम
नर्थकं स्यात् अस्त्वत्र मुम् ॥ अनव्ययस्येति।

श्री॰
म॰ भा॰
१४१

प्रतिषेधो भविष्यति यद्यपि तावदाचार्यः नात्र ग
तेः प्राग्धातोः प्रयोगो भवतीति ततः खकार
मनुबन्धं करोतीति नैतदस्ति ज्ञापकम् य
द्यपि हि गतेः प्राग्धातोः प्रयोगः स्यादेवात्र
मुमागमः कथं कृद्ग्रहणानि कारकएवं
स्यापि ग्रहणं भवतीति तस्मान्नार्थ एवमर्थे
न प्राग्धातुवचनेन कथं ऋषभं कुलमइजं
ऋषभं कुलमद्रहम् नैतत्पपदं किं तर्हि
विशेषणम् कृतिवेशोः उदर्वाभ्यां कृजि
वद्विमाकुलउपपदमिति ॥ कर्मप्रवच
नीयाः ॥ किमर्थमहती संज्ञा क्रियते अ
न्वर्थसंज्ञा क्रियते यथा विज्ञायते कर्म प्रो
क्तवन्तः कर्मप्रवचनीया इति के पुनः कर्म।
प्रोक्तवन्तः ये संप्रति क्रियामाहुः ये अप्रयु
ज्यमानस्य क्रियामाहुः ॥ अनुर्लक्षणे ॥ किं
मर्थं पुनरिदमुच्यते कर्मप्रवचनीयसं।
ज्ञा यथा स्यात् गत्युपसर्गसंज्ञे माभूतामि
ति किं च स्यात् शाकल्यस्य संहितामनुप्रा
वर्षत् गतिर्गताविति निघातः प्रसज्येत।
यद्येवं वीप्सि कर्मप्रवचनीयसंज्ञा वक्त
व्या वपिनिद्योतते च्यते प्राटेशं प्राटेशं।
विपरिलिखतीति अस्त्वत्र विशेषः नात्र

वेलिं विंप्रतिक्रियायोगः किन्तर्हि प्रयोजन
म् प्रयुज्यमाने प्रादेशमसौ विमाय प्रविलि
खतीति यद्येवमनोरपि नार्थः कर्मप्रवच
नीयसंज्ञायाः अनोरपि नह्येषं प्रतिक्रियायो
गः किं तर्ह्यप्रयुज्यमाने शाकल्येन सुकृतां
संहितामनुनिशम्य देवः प्रावर्षत् इदं तर्हि
प्रयोजनं द्वितीया यथा स्यात् कर्मप्रवचनी
ययुक्ते द्वितीयेति अत उत्तरं पठतीति अनो
र्लक्षणवचनानर्थक्यम् सामान्यकृतत्वात्
अनोर्लक्षणे इति वचनानर्थक्यम् सामान्य
कृतत्वात् सामान्येनैवात्र कर्मप्रवचनीय
संज्ञा भविष्यति लक्षणेत्थंभूताख्यानभा
गवीप्सासु प्रतिपर्यनव इति हेत्वर्थं तर्हि वचन
म् हेत्वर्थोयं विदं वक्तव्यम् हेतुः शाकल्यस्य
संहितावर्षस्य न लक्षणं किं वक्तव्यमेतत्
न हि कथमनुच्यमानं गंस्यते लक्षणं हि
नाम भवति येन पुनः पुनर्लक्ष्यते स कश्च
शाकल्यस्य संहितामनुनिशम्य देवः प्रावर्ष
त् सतर्हि तथा निर्देशः कर्तव्योऽनुहेताविति
अथेदानीं लक्षणाभिन्नार्थः प्राप्तानार्थेन
न लक्षणेत्थंभूतेत्येव सिध्यति नैतदेवं लक्ष
णं भवति तद्यथा गोकमण्डलुपाणिश्छात्रो

दृष्टः कमण्डलुरनेन लक्षणं भवति तदेवं तर्हि प्र
योजनम् द्वितीया यथा स्यात् कर्मप्रवचनी
ययुक्ते द्वितीयेति किं पुनः कारणं न सिध्यति
कर्मप्रवचनीययुक्ते द्वितीयेत्येवान सिध्यति
परत्वाद्धेत्वर्थान्तृतीया प्राप्नोतीति ॥ आङ् मर्या
दावचने ॥ आङ्मर्यादाभिविध्योरिति वक्तव्यम्
इहापि यथा स्यात् आकुमारेभ्यो यशः पाणि
नेः तत्तर्हि वक्तव्यं न वक्तव्यं मर्यादावचनमि
त्येव सिद्धम् प्रकाशस्य यशोऽसमर्यादा ॥ लक्ष
णेत्थंभूताख्यान ॥ कस्य लक्षणादयोऽर्थाः प्र
त्यादीनाम् किमर्थं पुनरिदमुच्यते कर्मप्रव
चनीयसंज्ञा यथा स्यात् गत्युपसर्गसंज्ञे माभू
तामिति नैतदस्ति प्रयोजनम् याक्रियायुक्ता
स्तं प्रति गत्युपसर्गसंज्ञे भवतः न चात्र विद्योतना
दिक्रियायुक्ताः अन्यार्थः प्रयोजनम् द्वितीया
यथा स्यात् कर्मप्रवचनीययुक्ते द्वितीयेति वृक्षं
प्रति विद्योतते वृक्षमनु विद्योतते इति ॥ अधि
परी अनर्थकौ ॥ किमर्थं पुनरनर्थकयोरधिप
र्योरिह कर्मप्रवचनीयसंज्ञा उच्यते कर्मप्रव
चनीयसंज्ञा यथा स्यात् गत्युपसर्गसंज्ञे माभू
तामिति नैतदस्ति प्रयोजनम् याक्रियायुक्ता
स्तं प्रति गत्युपसर्गसंज्ञे भवतः न चानर्थक

योः क्रियायोगः प्रयोजनं पंचमी यथा स्यात् पं
चम्यपाङ्परिभिरिति कुतोऽध्यागतः कुतः पर्यागत
म्यत इति सिद्धात्र पंचमी अपादान इत्येव अन
र्थापादाने सिद्धा यत्राप्यधिशब्देन योगे पंचमी न
विधीयते तत्रापि मा भूयते कुतोऽध्यागत इति प
र्वतं हि सिद्धे सति यदनर्थकयोरुपसर्गसंज्ञा
बाधिकां कर्मप्रवचनीयसंज्ञां शास्ति तज्ज्ञापयत्य
वार्थः अनर्थकानामप्येतेषां भवत्यर्थवत्कृत
मिति किमेतस्य ज्ञापने प्रयोजनम् निपातस्या
नर्थकस्य प्रातिपदिकत्वं चोदितं तन्न वक्तव्यं भ
वति अथवा नमामनर्थकौ किं तस्यानर्थकाः
स्युच्यते धातुनोक्तां क्रियामाहतुः तद्विशिष्टं
भवति यथा शीतेः प्रयः यथैवं धातुनैवोक्तत्वा
त्तस्यार्थस्य उपसर्गस्य प्रयोगो न प्राप्नोतीति उक्ता
र्थानामप्रयोग इति उक्तार्थानामपि प्रयोगो दृश्य
ते तद्यथापूपौ द्वावानयेति ॥ अपिपदार्थसं
भावना ॥ इह कस्मान्न भवति सर्पिषोपि स्यात् ।
मधुनोपि स्यात् गोमूत्रस्यापि स्यात् किंचस्या
त् द्वितीया प्रसज्येत कर्मप्रवचनीययुक्ते द्विती
येति नैष दोषः नेमे अर्था निर्दिश्यन्ते किं तर्हि
यः पदार्थ इमेह दृश्यन्ते यत्तेष्वर्थेषु यत्पदं वर्तते त
तत्स्यति अपिः कर्मप्रवचनीयसंज्ञो न टः पष्ठी ।

श्री॰
म॰ भा॰
२५५

न्येन किं पुनस्तत् विंदुः विंदो तर्हि कस्मान्न भवति
उपपदविभक्तेः कारकविभक्तिर्बलीयसी भवति
इति प्रथमा भविष्यति ॥ अधिरीश्वरवचन उक्तम्
किमुक्तं यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेद
वचनात्सिद्धम् प्रथमानुपपत्तिस्तु स्ववचनात्सि
द्धमिति अधिः स्वप्रति कर्मप्रवचनीयसंज्ञो भवती
ति वक्तव्यमिति ॥ लः परस्मैपदम् ॥ लादेशेषु प
रस्मैपदवचनम् पुरुषबाधित्वात् लादेशे पर
स्मैपदग्रहणं पुरुषबाधितत्वात् इहवचने हि
संज्ञाबाधनम् इह हि क्रियमाणे अनवकाशा पु
रुषसंज्ञा परस्मैपदसंज्ञां बाधेत परस्मैपदसंज्ञा
प्यनवकाशा सा वचनाद्भविष्यति सावकाशा प
रस्मैपदसंज्ञा कोऽवकाशः शत्रुक्वसू अवकाशः
शिचि दृष्टौ परस्मैपदम् ग्रहणं ज्ञापकं पुरुषबा ।
धकत्वस्य यदयं शिति परस्मैपदेष्विति परस्मै
पदग्रहणं करोति तज्ज्ञापयत्याचार्यः न पुरुषसं
ज्ञा परस्मैपदसंज्ञां बाधत इति ॥ तिङस्त्रीणि त्री
णि ॥ प्रथममध्यमोत्तमसंज्ञाया मात्मनेपदग्र
हणं ॥ प्रथममध्यमोत्तमसंज्ञायामात्मनेपद
ग्रहणं कर्तव्यम् आत्मनेपदानां प्रथममध्यम
उत्तमत्वेताः संज्ञा भवंतीति वक्तव्यम् किं प्र
योजनम् ममसंख्यार्थम् संख्यातानुदेशो यथा

ष्यास्यात् अक्रियमाणे ह्यात्मनेपदग्रहणे अत्रप्र
र्थवचनेन च अन्तरेणैव वचनेन च कर्तव्यम् अक्रियमा
णे हि कस्यचिद्वत्रिकस्य प्रथमसंज्ञा स्यात् कस्य
चिद्व मध्यमसंज्ञा कस्यचिदेवोत्तमसंज्ञा स्यात् न
वक्तव्यम् संज्ञा अपि हि षडेव निर्दिश्यन्ते कथम्।
एकशेषनिर्देशोऽयम् अथैतस्मिन्नेकशेषनिर्देशे
सति किमयं कृतैकशेषाणां द्वन्द्वः प्रथमश्च प्रथम
श्च प्रथमौ मध्यमश्च मध्यमश्च मध्यमौ उत्तमश्चो
त्तमश्चोत्तमौ प्रथमौ च मध्यमौ चोत्तमौ च प्रथममध्य
मोत्तमा इति आहोस्वित्कृतद्वन्द्वानामेकशेषः प्र
थमश्च मध्यमश्चोत्तमश्च प्रथममध्यमोत्तमाश्च
प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमा इति।
किं चातः यदि कृतैकशेषाणां द्वन्द्वः प्रथममध्य
मयोः प्रथमसंज्ञा प्राप्नोति उत्तमप्रथमयोर्म
ध्यमसंज्ञा प्राप्नोति मध्यमोत्तमयोरुत्तमसंज्ञा प्रा
प्नोति अथ कृतद्वन्द्वानामेकशेषे न दोषो भवति।
यथा न दोषस्तथास्तु किं पुनरत्र न्याय्यम् उभ
यमन्यथमित्याह उभयं हि दृश्यते बहुशाकि
किटिकम् बहूनि शाकिकिटिकानि बहु
स्थालीपिठरम् बहूनि स्थालीपिठराणी
ति यदप्युच्यते क्रियमाणे ह्यात्मनेपदग्रह
णे अन्तरेणैव ग्रहणं कर्तव्यमिति न कर्तव्यम् ॥

श्री॰
म॰ भा॰
२५६

लोके न पुनरस्तीदम् तद्यथा लोके हि द्व्यस्य द्वाभ्यां
द्वाभ्यामभिरूपस्येय इति न चोच्यते अन्तरेणैवेणा इ
ति प्राणपूर्वेण चोपस्थीयते इति ॥ किमक्तिश्च
त्रीणित्रीणि निवर्तते ॥ उताहो न किं चातः यद्यनु
वर्तते अहून आविभक्ताविति आत्वं न प्राप्नोति अ
थ निवृत्तं प्रथमयोः पूर्वसवर्ण इति प्रत्यययोरेव ग्र
हणं प्राप्नोति यथेच्छसि तथास्तु अस्तु तावदनुव
र्तते इति ननु चोक्तम् अहून आविभक्ताविति आत्वं न
प्राप्नोतीति वचनाद्भविष्यति अथ वा पुनरस्तु निवृ
त्ते ननु चोक्तं प्रथमयोः पूर्वसवर्ण इति प्रत्यययोरे
व ग्रहणं प्राप्नोतीति नैष दोषः अवीत्येतदनुवर्तते
न चाजादी प्रथमौ प्रत्ययौ स्तः ननु चैवं ज्ञायते न अ
जादेर्यौ प्रथमौ अजादीनां वा यौ प्रत्ययौ प्रथमा
विति यत्तर्हि तस्माच्छसो नः पुंसीति अनुक्रान्तं पू
र्वसवर्णं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यः विभ
क्त्योर्ग्रहणमिति अथवा वचनग्रहणमेव कुर्यात
औजसोविति ॥ युष्मद्युपपदे समानाधिकरणे स्था
निन्यपि मध्यमः अस्मद्युत्तमः शेषे प्रथमः किम
र्थमिदमुच्यते युष्मदस्मच्छेषवचनं नियमा
र्थम् नियमार्थोयमारम्भः अथैतस्मिन्नियमार्थे
सति किमयमुपपदनियमः युष्मद्येव मध्यमा
एव अस्मद्युत्तम एव आहोस्वित्पुरुषनियमः

अस्मद्युत्तमः किंचातः यदि युष्मदनियमः शेषग्रह
णं कर्तव्यं शेषेपि प्रथम इति किंच कारणं मध्यमो।
त्तमौ नियतौ युष्मदस्मदोरनियते अत्र प्रथमोपि प्रा
प्नोति अत्र शेषग्रहणं कर्तव्यम् प्रथमनियमार्थम्
शेष एव प्रथमो भवति नान्यत्रेति अथाप्युपपदनि
यमः एवमपि शेषग्रहणं कर्तव्यम् शेषे प्रथम इ
ति किं कारणम् युष्मदस्मदी नियते मध्यमोत्तमा
व नियतौ शेषे प्राप्नुतः तत्र शेषग्रहणं कर्तव्यम् शेष
नियमार्थम् शेषे प्रथम एव नान्य इति उपपदनि
यमे शेषग्रहणं शक्यमकर्तुम् कथं युष्मदस्मदी
नियते मध्यमोत्तमावनियतौ तौ शेषेपि प्राप्नुतः
ततो वक्ष्यामि प्रथमं भवति तन्नियमार्थं भविष्य
ति यत्र प्रथमस्यान्यस्य प्राप्नोति तत्र प्रथम एव भ।
वतीति तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शे
षत्वात् तत्र युष्मदस्मदन्येषु प्रथमस्य प्रतिषेधो।
वक्तव्यः त्वं च देवदत्तश्च पचथः अहं च देवदत्तश्च
पचावः किं कारणं शेषत्वात् शेषे प्रथमः प्राप्नोति
सिद्धं युष्मदस्मदोः प्रतिषेधात् सिद्धमेतत् कथं यु
ष्मदस्मदोः प्रतिषेधात् शेषे प्रथमः युष्मदस्म।
दोर्नेति वक्तव्यम् युष्मदि मध्यमादस्मद्युत्तमो।
विप्रतिषेधेन युष्मदि मध्यमादस्मद्युत्तम इत्ये।
तद्भवति विप्रतिषेधेन युष्मदि मध्यम इत्यस्याव:

श्री॰
म भा
२५७

इत्येतद्भवति विप्रतिषेधेन युष्मदि मध्यम इत्यस्या
वकाशः अहं पचामि इहोभयं प्राप्नोति त्वं चाहं च प
चाव अस्मद्युत्तम इत्येतद्भवति विप्रतिषेधेन स तर्हि
विप्रतिषेधो वक्तव्यः न वक्तव्यः त्यदादीनां यद्यदुत्त
रं तत्तच्छिष्यत इत्येवमस्मदेकशेषो भविष्यति तत्रास्म
द्युत्तम इत्येव सिद्धम् अनेकशेषभावार्थं तु स विप्रति
षेधो वक्तव्यः ॥ यदैकशेषो नैकशेषो न सह विव
क्षायामेकशेषः यदा न सह विवक्षा तदैकशेषो न।
भवति न वा युष्मदस्मदोरनेकशेषभावात्तदधिक
रणानामनेकशेषभावात् अभिप्रतिषेधः ॥ न वा
र्थो विप्रतिषेधेन किं कारणम् युष्मदस्मदोरनेक
।शेषभावात् तदधिकरणानामेकशेषेण भवित
।व्यम् तत्र भवितव्यम् त्वं चाहं च पचसि पचामि चे
ति क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानम
न्यत्रानेकशेषभावस्य क्रियापृथक्त्वे द्रव्यपृथ।
क्त्वे हृष्यनेन यथा पचसि पचामि च त्वं चाहं चेति
तदनुमानमन्यत्रापि क्रिययोरेकशेषो न भवती
ति एवं कृत्वा मध्यमो भवति यदप्युक्तं तत्र यु
ष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वादिति तत्रा
पि भवितव्यम् त्वं च देवदत्तश्च पचसि च पचति च
अहं च देवदत्तश्च पचामि च पचति चेति यत्राव।
च्यते युष्मदस्मदोरनेकशेषभावात्तदधिकरणा

नामप्यनेकशेषभावाद्विप्रतिषेध इति इदमेतेन
हि युष्मदस्मदोरनेकशेषः नत्वधिकरणानां चैक
शेषता तद्यथा त्वं चाहं च वृत्रहन् उभौ संप्रयुज्याव
है इति यदप्युच्यते क्रियापृथक्त्वे च द्रव्यपृथक्त्वद
र्शनमनुमानमुत्तरत्रानेकशेषाभावस्येति क्रिया
पृथक्त्वे खल्वपि द्रव्यैकशेषो दृश्यते तद्यथा श्रृताः
भक्ष्यन्तां हूयन्तां भक्ष्यन्तामिति एवं चेत्सोऽपि दोषो भव
ति यदुक्तं युष्मदस्मदन्यत्र प्रथमप्रतिषेधः शेष
त्वादिति नैष दोषः परिहृतमेतत् सिद्धं तु युष्मद
स्मदोः प्रतिषेधादिति सत्यं हि प्रतिषेधो वक्तव्यो न
वक्तव्यः शेषे प्रथमो विधीयते न च शेषस्त्वान्यस्य
शेषग्रहणेन गृह्यते भवेत्प्रथमेन स्यात् मध्यमो
त्तमावपि न प्राप्नुतः किं कारणम् युष्मदस्मदोरुप
पदयोर्मध्यमोत्तमावुच्येते न च युष्मदस्मदी अन्य
स्य युष्मदस्मद्ग्रहणेन गृह्येते तत्र युष्मत् यस्मात्
तदाश्रयौ मध्यमोत्तमौ भविष्यतः यद्येवं तर्हि यद
त्र युष्मत् यस्मात् तदाश्रयौ मध्यमोत्तमौ भविष्य
तः एवं यत्र शेषः तदाश्रयः प्रथमः प्राप्नोति एवं
तर्हि शेषे उपपदे विधीयते उपोच्चारि च पदमुपप
दं यच्चात्रोपोच्चारि न स शेषः न तदुपोच्चारि भवेत्प्रथ
मेन स्यात् मध्यमोत्तमावपि न प्राप्नुतः किं कारणं
युष्मदस्मदोर्मध्यमोत्तमावुच्येते उपोच्चारि च पदमु

श्री॰
म॰ भा॰
२५८

पपदं यच्चात्रोपोच्चारि न ते युष्मदस्मदी ये च यु
ष्मदस्मदी न तदुपोच्चारि एवं तर्हि शेषसामाना
धिकरण्ये प्रथमो विधीयते न चात्र शेषेण सा
मानाधिकरण्ये भवेत्प्रथमेन स्यात् मध्यमोत्त
मावपि न प्राप्नुतः किं कारणं युष्मदस्मदोर्या सा
मानाधिकरण्ये मध्यमोत्तमावुच्येते न चात्र युष्म
दस्मद्भ्यामेव सामानाधिकरण्यं एवं तर्हि त्यदा
दीनि सर्वैर्नित्यमित्येवमत्र युष्मदस्मदोः शेषो
भविष्यति तत्र युष्मदि मध्यमः अस्मद्युत्तम इ
त्येव सिद्धम् न सिध्यति स्यान्नित्यमिति प्रथमः
प्राप्नोति त्यदादीनां खल्वपि यद्यत्परं तत्तच्छि
ष्यत इति यदा भवतः शेषस्तदा प्रथमः प्राप्नो
ति युष्मदि मध्यमः अस्मद्युत्तम इत्येतावदुच्यते
तावहं न प्राप्नुतः परमत्वं पचसि परमाहं प
चामीति तदंतविधिना भविष्यतः इहापि तर्हि
तदंतविधिना प्राप्नुतः अत्यत्वं पचति अत्यहं
पचतीति ये चाप्येते सामानाधिकरणावृत्तय
स्तद्धितास्तत्र मध्यमोत्तमौ न प्राप्नुतः त्वद्रूपः पच
सि मद्रूपः पचामि त्वत्कल्पः पचसि मत्कल्पः
पचामि एवं तर्हि युष्मद्वति अस्मद्वति भविष्य
ति इहापि तर्हि प्राप्नोति अत्यत्वं पचति अत्यहं
पचतीति एवं तर्हि युष्मदि समानाधिकरण इत्येवं भवि

ष्यति एवं च कृत्वा सोप्यदोषो भविष्यति तत्र युष्मद
स्मदन्येषु प्रथमप्रतिषेधः शेषत्वात् अथवा प्रथ
म उत्सर्गः करिष्यते तस्य युष्मदस्मदोरुपपदयोर्म
ध्यमोत्तमावपवादौ भविष्यतः तत्र युष्मद्युपपदे स्थानी
ति कृत्वा मध्यमोत्तमौ भविष्यतः अथेह कथं भवति ।
यं अत्वं संपद्यते त्वद्भवति मद्भवतीति अथाहो ।
स्वित्वद्भवसि मद्भवामीति त्वद्भवति मद्भवती
ति भवितव्यम् मध्यमोत्तमा कस्मान्न भवतः गौ
णमुख्ययोर्मुख्ये संप्रत्ययः तद्यथा गौरनुबन्ध्यो
यात्री सोमीय इति न वाहीको बध्यते कथं तर्हि
वाहीको वृद्धाद्धे भवतः गौस्तिष्ठति गामानय
ति अर्थाश्रये चैतदेवं भवति यद्धि शब्दाश्रयं श
ब्दमात्रेण तद्भवति शब्दाश्रये च वृद्धाद्धे इति ॥ परः
सन्निकर्षः संहिता ॥ परः सन्निकर्षः संहिता चेद्
द्रुतायाममसंहितम् परः सन्निकर्षः संहिता चेद्
द्रुतायां वृत्तौ संहितासंज्ञां प्राप्नोति द्रुतायामे ।
व हि परः सन्निकर्षः वर्णानां द्रुतायां तुल्यः सन्नि
कर्षः तुल्यो हि सन्निकर्षो वर्णानां द्रुतमध्यम
विलम्बितासु वृत्तिषु किं कृतस्तर्हि वृत्तिविशे
षः वर्णकालभूयस्त्वं तत्र वर्णानां कालभूय
स्त्वं तद्यथा हस्तिमशकयोस्तुल्यः सन्निकर्षः
प्राणभूयस्त्वं तद्वदेवं द्रुतायां तु परकरणे

श्री · २५५ प्र · भा ·

मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यम्
किं कारणं कालभेदात् यो हि द्रुतायां वृत्तौ
वर्णस्त्रिभागाधिकास्ते मध्यमायां हि तेनाव
इह तत्पुरुषः तीर्थकाकान्निरस्याता भवं
ति एवं पात्रेसमितकुलालादि गन्वान विवेतिष्ठ
ति सउच्यते तीर्थकाक इति कृत्ये कृत्ये
नियम इति वक्तव्यं इहापि यथा स्यात् पू
र्वाह्णे गेयं साम प्रातरध्येयो वाक इति न
तर्हि वक्तव्यं न वक्तव्यं सप्तमीत्येव सिद्धम
यमनियोगतः कथं ऋणे तस्मात् भवति
तत्र करणं इत्येव सिद्धं पक्षहणं च कर्तव्यं
इहमा भूत् सर्वाह्णे दानं व्याभिचेति तत्र
किमुदाहरणं अवतप्तेनकुलस्थितं प
तत्तत्पुरुषे च्यते करकृतेपः अवतप्तेन

कुलाचिरंस्थानो भवंति एवं योऽर्थानारभ्यन
विरंतीत्यनिमउच्यते अवनमेनकुलस्थिता
तन् लोपसमस्यतेकोतेनसमस्यतइत्युच्य
ते नत्रेहसमाप्तिकेनसनकुलेनसमासोन।
प्राप्नोतिलोपगातिकारकउर्वउक्तं किंतर्ह्
कुलहर्तिनगतिकारकउपर्वसमासोपीति पात्रे
से किमर्थश्चकारः एवकारार्थश्चकारः
पात्रेसमितादय एव क्रमाभूत परमेपा
त्रेसंमिताइति एवं इहकस्मादव्ययीभावो।
नभवति एकनदी नदीभिःसंख्येतिप्राप्नो
ति इहकश्चित्समासः पूर्वपदार्थप्रधानः
पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थ
प्रधानोऽव्ययीभावः अन्यपदार्थप्रधानोबहु
व्रीहिः उभयपदार्थप्रधानोद्वंद्वः नचात्रपू
र्वपदार्थप्राधान्यंगम्यते अथवाव्ययीभा।
वः क्रियतांतत्पुरुषः तत्पुरुषोभविष्यति वि
प्रतिषेधेनभवेदेकसंज्ञाधिकारेसिद्धम प
रंकार्यत्वेनसिध्यति आरंभसामर्थ्याद्वाव्य।
यीभावः परकार्यत्वाच्चतत्पुरुषः प्राप्नोति प
रकार्यत्वेनदोषः कथं नदीभिःसमाहारे
ऽव्ययीभावोवक्तव्यः सर्वमेकनदीतीरं
।। इतिश्रीमद्भगवत्पतंजलिमुनिविरचि

श्री
महा
भा

तेव्याकरणमहाभाष्ये द्वितीयस्याध्याय
स्यप्रथमपादेद्वितीयमाह्निकं तद्धिता
समाहारइतिकोयंशब्दः समाकस्वा
हरतेःकर्मसाधनोघञ् समाह्रियते
समाहारः यदिकर्मसाधनःपंचकुमा
र्यः समाहृताः पंचकुमारिदशकुमारि
णीत्यपोकपमजेतस्यातिकिमभिधीय
ते एतदेवानरायेषु कः पुनः गरासमा
हारः एतस्सेनैकीकरणंभिन्नानामपह
रणंवा यद्येवंवितिमेभवन्नुलेषु गोत्र
वरंतोपुनसिध्यति एवंतर्हिसमभ्या
सीकरणंसमाहारः एवमपियंचत्वाणि
घसागरी विप्रतीतिनसिध्यति किंका
रणं समाकृष्टवाचीनाम्याभिसंबध्यते
ते इहतिर्देशान्तरप्रापणे नावश्यहसति
देशांतरप्रापणप्रवर्तते किंतर्हिसाह
र्यमपिवर्तते तद्यथा मातृहरतिपितृहृ
रतीति अथवायंचग्रामीवगनगरीति
वेदमिपदेवावतिष्ठते अथवएमसोत
नः किंचिदाकांक्षतीति कियन्तांवा य
दाकांक्षतितदेके सचसमाहारः अथ
तर्हिभावसाधनेसतिदोषः यंचकुलीग्रा

नीयमानामिति भावनयनेनोदितेनद्व्या
नयनेनप्राप्नोति नैषदोषः इहतावद्द्वे
प्रश्व्यः अर्थेद्विगोरनुप्येष्योज्ञेत्रीषो
मीय इति कथमाक्षेपचोदितापाद
श्वारंभणालभनप्रोक्षणविशसनादी
निक्रियन्त इति अत्रैभवाद्राह्मनावार
भणादीनामेभवोनास्तीतिकृत्वा आ
क्रतिसहचरितेद्व्योश्चारंभणालंभन
प्रोक्षणविशसनादीनिक्रियन्ते इहमध्ये
वैजातीयमेव अत्रैभवाङ्गावानयसाद
व्यानयनेभविष्यति अथवाव्यतिरेका
त् किंचनद्विगुसंज्ञाप्रत्ययोत्तरपदयो
भवति एकंभवितुमर्हति द्विगुसंज्ञा
प्रत्ययोत्तरपदयोश्चेत् इतरेतराश्रयत्वा
दप्रसिद्धिः केनेतरेतराश्रयताद्विगुनिमि
त्तप्रत्ययोत्तरनिमित्ताच द्विगुसंज्ञाभवती
तरेतराश्रयंभवति इतरेतराश्रयाणिका
र्याणिचनप्रकल्पन्ते एवंतर्ह्यर्थे इतिव
क्ष्यामि अर्थेचतद्धितासंभवतिबहुव्री
हिवत् अर्थवत् तद्धितासंभवतिनप्रा
प्नोति द्वैमातुरःपंचानामिति किंकार
णं द्विगुनोक्तत्वात् बहुव्रीहिवत् तद्यथा

बहुव्रीहिर्गोणोकत्वान्नस्त्रीयोनभवति
चित्रगुःशबलगुरिति एवंतद्धिसमासत
द्धितविधाविति वक्ष्यामि समासतद्धित
विधाविति चेदन्यत्रसमाससंज्ञाभावस्स
मासतद्धितविधिविधाविति चेत् अन्यत्रस
माससंज्ञानप्राप्नोति कान्यत्र स्वरे पंचा
रत्निः दशारत्निः इगन्तेद्विगौ विप्रषत्व
रो नप्राप्नोति सिद्धंतु प्रत्ययोत्तरपदयो
श्चेतिवचनात् सिद्धमेतत्कथंप्रत्ययोत्त
रपदयोश्चेतिवचनात् प्रत्ययोत्तरपदयोः
द्विगुर्भवतीतिवक्तव्यं नचोक्तं द्विगुसं
ज्ञाप्रत्ययोत्तरपदयोश्चेतिदितरेतराश्रय
त्वादप्रसिद्धिरिति नैषदोषः इतरेतरा
श्रयमात्रमेतच्चोदितं सर्वाणिचेतरेत
राश्रयाण्येकत्वेन परिहृतानि सिद्धंतु
नित्यशब्दत्वात् नैकश्चित्तन्तुवायमाह
अस्यसूत्रस्यशाटकंवयेति सपश्यति
यदिशाटकोनवातव्यः शाटकोवातन
व्यश्चेति तद्विप्रतिषिद्धं भाविनीखलु
स्यसंज्ञाभिप्रेतासमान्येवातव्यः य
स्मिन्नूतेशाटकइत्येतद्भवति एवमिहा
पितस्मिन्द्विगुर्भविष्यति यस्मिन्निति

वृत्तस्य प्रत्ययः उत्तरपदमित्येतेन पदसंज्ञाभे।
विष्यतः अथवा पुनरस्तु प्रत्ययार्थ इति ननु।
चोक्तमर्थे चेन्न द्विगावुपपत्तिर्बहुव्रीहिवा।
दिति नैष दोषः नावश्यमर्थग्रहणेऽभिधे
यमेव वर्तते किं तर्हि स्याद्यर्थेऽपि वर्तते न
च्छयादायार्थमित्वामेह दाशानः स्नः जन
नस्येति एवमिहापि तद्धितार्थे द्विगुर्भ
वति न द्विगुः स्यादिति न द्विगावेतस्य वच
नेनापकेन द्विगोर्लुगनपत्ये प्रत्ययापदे द्विगोः
लुगनपत्ये इति द्विगोर्लुग्भवति तस्य लुकश्चा
स्तिनवकाशत्वादयमाचार्यः इत्ययं द्विगोर्लु
क्तिन इति समाहारसमूहयोरविशेषा
त्समाहारग्रहणमनर्थकं तद्धितार्थेन कृ
तत्वात् समाहारः समूह इत्यविशेषाद
र्थौ समाहारसमूहयोरविशेषात् समा
हारग्रहणमनर्थकं किं कारणं तद्धिता
र्थेन कृतत्वात् तद्धितार्थे द्विगुरुत्सेवं भ
विष्यति न तर्हि तद्धितार्थ इत्येव सद्विगुर्भ
वति न द्विगोनामानि प्राप्नोति उभयतो
त्वमभेदे भविष्यति लुक्कृतानि प्राप्नुवन्ति का
निपत्रमलो‥‥मूलो यत्परिमाणात्पिबता
निनकवलभ्योगोरतद्धितलुकीति प्रतिषेधः

श्री
महा
भा
३२२

प्राप्नोति यच्चम‥‥दशगवे गोरतद्धि
तलुकीति टच् न प्राप्नोति नैष दोषः प्र
विशेषणं द्विगोः टीग्भवत्यन्ते प्र
परिमाणाद्विस्तादिति केवलेभ्यः समाहा
रेऽपि वक्ष्यामि तद्विग्रमार्थे भविष्यति
समाहार एवेनाप्नुवति गोरकारात् द्विगोः
समाहारे प्रविशेषणं गोः टच् भवतीत्य
क्तो द्विगोः समाहारग्रहणं वक्तव्यं स
माहारेणापि यथा न प्राप्नोति तद्धिता
र्थेन माभूदिति किं च स्यात् तद्धितार्थे
निरूपणे लुम्भविष्यति लुक्कृतानि
प्राप्नुवन्ति सर्वाणि परिहृतानि न सर्वा
णि परिहृतानि पञ्चकुमारि लुक्कृतद्धि
तलुकीति ङीप्लुक् प्रसज्येत इह तस्य
कष्योत्तरपदे नित्यसमासवचनं ह
इत्तसकष्योत्तरपदे नित्यसमासोऽव।
क्तव्यः पञ्चनावप्रियः दशनावप्रि।
यः पञ्चगवप्रियः दशगवप्रियः किंप्र।
योजनं समुदायप्रमाणावयवानां माभूदा।
विद्रुतिर्माभूदिति न तर्हि वक्तव्यं न वक्त
व्यम् इह कस्मान्न भवति पञ्चहृतिप
दोषाति पदाहतिः नदोऽसर्वेषां हतिः प
दात्तहतिलदासर्वेषामहतिः उत्तरपदे

नपरिमाणिना द्विगोः समासवचने
उत्तरपदेन परिमाणिना द्विगोः समासो
वक्तव्यः द्विमासजातः किं पुनः कार
णं न सिध्यति सुप्सुपेति वर्त्तते एवं
तर्हीदं स्यात् द्वौ समासौ द्विसमासौ द्वि
मासजातस्येति नैवं शक्यं स्वरे हि दोषः
स्यात् द्विमासजात इति एवं स्वरः प्रसज्येत
द्विमासजात इति चेष्यते द्व्यहजातस्व
नसिध्यति द्व्यहजात इति आप्नोति न
चैवं भवितव्यं भवितव्यं च द्व्यह्नजात
स्वं न सिध्यति किमुच्यते परिमाणिने
ति न पुनरन्यत्रापि अनावयवसमुदायवा
च्येभ्यो द्विगावुत्तरपदप्रसिद्धिः अन्याव
समुदायो वाच्यो द्विगोरितेतः अन्यावसमु
दायवाच्यो द्विगोरुत्तरपदप्रसिद्धिः
उत्तरपद इति गम्भविष्यति सर्वत्रमनर्थे
प्रतिषेधः सर्वेषुपदेषुमनर्थे प्रतिषेधो
वक्तव्यः किं प्रयोजनं पञ्चत्वहृदयावद्वि
द्विगोरिति कार्यो नाभूदिति पञ्चाहः दशा
हः गोरतद्धितलुकीति टच्मा भूदिति ते
त्वासूर्वा किमनन्तरयोगोयं ते त्वासूर्वेः
भूद्विगुसंज्ञः आहोस्वित्पूर्वमात्रमप्नोति
किं चानन्तर्ये योगे एकशाटी द्वि

गोरिति ङीकारोन प्राप्नोति प्रत्ययपूर्वमात्रेप
काभिधा प्रत्यापि प्राप्नोति प्रत्ययेनेतरेक
पञ्चैकशाटीति ईकारान्तेन समासो भवि
ष्यति एकाशीरोपकशाटी इह तर्हि प
काष्टपी द्विगोरिति ङीकारोन प्राप्नोति प्र
त्ययपूर्वमात्रे कथमेकभिक्षामवेतेन
मासो भविष्यति एकाभिक्षा एकभि
क्षा इह तर्हि समर्थः इतोने द्विगोरितिप
हस्वरः प्राप्नोति प्रत्ययेनेतरे कथमेकापू
पी समाहारश्चेप्ववसिद्धं कः पुनः समा
हारः यत्तदानं संभ्रमो वा इह तर्हि पञ्च
होतारो दशहोतार इति इतोने द्विगोवि
त्येषुस्वरः प्राप्नोति प्रत्ययेनेतरे हिपूर्वमात्रे
कथं समर्थः प्रत्याहानप्रकरणाविच
कारौ नोक्षरसमेवमभिन्नमिद्धं प्रत्यवाप
नरस्वेनेतरे कथं पञ्चहोतारो दशहोतारः
प्राग्दानप्रकरणाद्विचकारौ नोक्षरसो
मेवमभिन्नमिद्धं प्रत्यवाप्नरस्वेनेतरे कथं
पञ्चहोतारो दशहोतारः प्राग्दानप्रक
रणाद्विवादामादीनां क्षेत्रसमेवमभिन्नमि
द्धमिति कुन्ति किमुदाहरणं वैयाक
रणादवसूचीकिंव्याकरणां कुन्नमितने

ग्राहोस्विद्वैयाकरणः वैयाकरणः कु
त्सितः तस्मिन्कुत्सितेतत्स्यमपि कु
त्सितेभवतीति उपमानाउपमानानि
सच्याते कानुपमानानि किंयदेवोप
मानंतदेवोपमेयं ग्राहोस्विदन्यदुपमा
नं अन्यदुपमेयं किंचातः यदियदेवो
पमानंतदेवोपमेयं कइहोपमार्थः गौ
रिवगौरिति अथान्यत्वमेव कइहोप
मार्थः गौरिवाश्वइति एवंतर्हि यत्क
ञ्चित्सामान्यंकश्चिद्विशेषस्तस्योपमा
नोपमेयेभवतः किंवक्तव्यमेतत् नहि
कथमनुच्यमानंगंस्यते मानंहिनामा
निर्ज्ञातज्ञानार्थमुपादीयते अनिर्ज्ञात
मर्थंज्ञास्यामीति तत्समीपेयन्नात्यंता
यमिमीतेतदुपमानं गौर्निर्ज्ञातः गव
यः अनिर्ज्ञातः कामंतर्ह्यनेनदृष्टत्वाप
स्यगवयोनिर्ज्ञातोगौस्त्वनिर्ज्ञातः कृते
वैस्यात् गवयवद्गौरिति बाढंकर्तव्यं
किंपुनरिहोदाहरणं शस्त्रीश्यामाक
थंनत्वयंश्यामाशब्दोवर्तते शस्त्र्यामित्या
ह केनतर्हीदानींदेवदत्ताभिधीयते स
मासेनयथैवशस्त्रीश्यामादेवदत्तेति

श्री
महा
भा
३३४

सिध्यति उपसर्जनस्येतिह्रस्वत्वंभवति
यदितर्ह्युपसर्जनानामप्येवंजातीयकानि
भवंति तितिरिकल्माषी कुंभकपाल
लोहिनी अनुपसर्जनलक्षणईकारो
नप्राप्नोति एवंतर्हिशस्त्र्यामेवशस्त्रीश
ब्दोवर्तते देवदत्तायांश्यामाशब्दः एवम
पिगुणाअनिर्दिष्टोभवति वहुवश्रा।
स्याणुणाः स्तनमानीलास्थ्ययुरिति अ
निर्दिष्टउपमानस्यापिगुणस्यभवति लो
केसंप्रत्ययः तद्यथाचैवमाद्योदेवदत्ते
ति बहुवश्च्येद्गुणाः याचामोऽप्रियदर्शी
तम्भासागम्यते एवमपिसमानाधिक
रणेनतिवर्तते व्यधिकरणानामसमासो
नप्राप्नोति किंहिवचनान्नभवति य
थपितावद्वचनात्समासः स्यात् इहत
विलसगीवचपलासमानाधिकरणाल
क्षणः प्रवन्नावोनप्राप्नोति एवंतर्हि
तस्यामेवाभिधेयंवर्तते एतस्याप्युक्तम
तस्यामेवाभिधेयंवर्तते इतरथाहिबहु
पदेस्यात् यदितावदेवंविग्रहः क्रियते
शस्त्रीवदेवदत्तेति शस्त्र्युपमानमेत
दपेक्षंस्यात् अथाप्येवंविग्रहः क्रियते

यथा शस्त्री श्यामा तद्वदियं देवदत्तेति
एवमपि देवदत्तायाश्यामेयत्तत श्रुपे
दंशस्यान एवमपि गुणो निर्दिष्टो भव
ति बहवश्च शस्त्र्यां गुणाः स्तुत्वानीता
ष्ट्यकरीति श्रुतिर्दिश्यमानस्यापि गुणा
स्य भवति लोके संप्रत्ययः तद्यथा चंद्रमु
खी देवदत्तेति बहवश्चंद्रे गुणाः याभ्या
प्रियदर्शनत्वमागमाने उपमानस
मासे गुणवचनस्य विशेषभावात्सा
मान्यवचनत्वस्याप्रसिद्धिः शस्त्रीश्या
माश्यामाशब्दायशस्त्रीशब्देनाभिसंब
ध्यमानो विशेषवचनः संपद्यते तत्र सा
मान्यवचनैरिति समासो न प्राप्नोति न
वा श्यामत्वस्योभयत्र भावात्तद्वाचकत्वा
च्च शब्दस्य सामान्यवचनत्वप्रसिद्धिः
न वा एष दोषः किं कारणं श्यामत्व
स्योभयत्र भावात् उभयत्रैव श्यामत्व
मस्ति शस्त्र्यां देवदत्तायां च तद्वाचक
त्वाच्च शब्दस्य च तद्वाचकस्यैव श्यामा
शब्दः प्रयुज्यते किं वाचकः उभयवाच
कः श्यामत्वस्योभयत्र भावात् तद्वाचक
त्वाच्च शब्दस्य सामान्यवचनत्वप्रसिद्धेः प्र

सिद्धेः सामान्यवचनैरिति समासो भवि।
ष्यति न चावश्यमेव सामान्यवचनेनाया
वहूनां सामान्यमाह द्वयोरपि यः सामान्य
माह सोपि सामान्यवचनः अथवा सामा
न्यवचनैरित्युच्यते सर्वश्च शब्दोन्येन शब्देन
संबध्यमानो विशेषवचनः संपद्यते त
एवं विज्ञास्यामः प्रागभिसंबधाद्यः सामा
न्यवचन इति उपमित सामान्याप्रयोग
इति किमर्थमिदमाह पुरुषोयं व्या
घ्र इव शूरः पुरुषोयं व्याघ्र इव बलवान्
शूरसामर्थ्यात् कथमसामर्थ्यात् सापे
क्षमसमर्थं भवतीति एवं तर्हि सिद्धे स
ति यत्सामान्याप्रयोग इत्याह तज्ज्ञाप।
यत्याचार्यः भवति प्रधानस्य सापेक्षस्या
पि समासः किमेतस्य ज्ञापने प्रयोजनं
राजपुरुषोभिरूपः राजपुरुषो दर्शनीयः
शुब्रहादिः सिद्धा भवति विशेषणवि
शेष्ययोरुभयविशेषणत्वात् उभयो
श्च विशेषणत्वात् उपसर्जनस्याप्रसिद्धिः
कृष्णतिला इति कृष्णशब्दस्तिलेनाभिसं
बध्यमानः विशेषवचनः संपद्यते तथा
तिलशब्दः कृष्णशब्देनाभिसंबध्यमानो

यि विशेषवचनः संपद्यते तत्रोभयं विशेष
णं भवति उभयं च विशेष्यं विशेषणं वि
शेष्यश्चोभयविशेषणत्वादुभययोःप्रा
विशेष्यत्वाच्चापरस्योपसर्जनत्वस्याप्रसि
द्धिः तत्रान्यतरस्यप्रधानाभावात्द्विशे
षकत्वाच्चापरस्योपसर्जनत्वस्याप्रसिद्धिः
नैष दोषः किंकारणं अन्यतरदत्र प्रधा
नभूतं तद्विशेषकं चापरं अन्यतरस्य प्रधा
नभावात्तद्विशेषकत्वाच्चापरस्योपसर्ज
नसंज्ञा भविष्यति यदास्यातिवर्हितिलाश्च
तिलाविशेषणत्वेनतेननकर्तव्यातिलका।
स्याइतिनकर्तव्या तत्पुरुषः तिलाश्चक्र
स्याश्चेति स्वल्पपिष्टसमासः तिलानाक
स्याइति किंतर्हि प्रधानशब्दौ एकस्मिन्न
र्थेयुगपद्वर्तेते नत्वयोः प्रधानशा
ब्दयोरेकस्मिन्नर्थेयुगपद्वर्तमानयोः
किंचिदपिप्रयोजनमस्ति तत्रप्रयोगार्थ
तत्कर्तव्यं नूनमन्यतरत्प्रधानं नाहि।
शेषणंचापरमिति तत्रतेनवान्सन्देहः
किंप्रयोजनं किंविशेषणमिति सचा
पिकसन्देहः यदाभोग्यताशब्दौ कुठेस्वजः
स्वजकुठइति यत्रान्यतरद्वयपद्वं।

श्री
महा
भा
३२५

तत्प्रधानं तद्यथाशुक्लमारभेतकृष्ण
मालभेतेति तत्पिष्टपिंडीमालभ्यकृ
तीभवति अवश्यंतत्कृष्णद्रव्यमाकांक्ष
ति कथंतर्हि द्वौप्रधानशब्दावेकस्मि
न्नर्थेयुगपदवरुध्येते तत्कः विशे
षेति तेनयोगावयवकः समावेशान
त्तद्धितः विशेषास्ति अथ किमर्थमे
वादनक्रमणं क्रियते नविशेषणवि
शेष्येण बहुलमित्येव सिद्धं बहुलव
चनस्याकृतत्वमाउतरत्रानुक्रमणमास
र्थं शुक्लत्वं बहुलवचने यद्यकृतत्वे
यदनेन कृतं न मकृतं तेन तत् एवंतर्हि तद्
मः शुक्लत्वमितिकर्तव्यचकारकस्मा
यकं च निवर्तकं च यद्यनेन अकृतं त
त् किमर्थंतर्हिएवमादनक्रमणं क्रिय
ते उदाहरणभूयस्त्वात् एतावत्यपि
विषयः सुपरिगृहीता भवति येषुल
क्षणंप्रपंचश्च केवलं लक्षणं केवलः
प्रपंचो वा तत्रयाकारकं भवति सु
वशंपाठत्वस्माभिरिदं वक्तव्यं बहुल।
मन्यतरस्याबोभयथा एकेषामिति।
सर्ववेदपार्षदंहीदंशास्त्रं तत्रनैकःप

ध्याः शक्यत्वाच्छ्रूयते श्रेण्यादयः श्रेण्या
दयः पठ्यन्ते कृतादिराकृतिगणः श्रेण्या
दिषु च्व्यर्थवचनं श्रेण्यादिषु च्व्यर्थग्रह
णं कर्तव्यं अश्रेणयः श्रेणयः कृताः श्र
ष्यात् इह श्रेणय एव किंचित् क्रियते तदा मा
भूदिति अत्र च्व्यर्थग्रहणाश्चन
ञ्प्रतिषेधमाह तदिहैन तथा श्रुनात्र
पूर्वं च्व्यन्तकार्यं परं च्व्यर्थकार्यं इह पुनः
पूर्वं च्व्यर्थकार्यं परं कार्यं च्व्यन्तमिति के
न नञ्विशिष्टेन समानप्रकृतिवचने
नञ्विशिष्टेन समानप्रकृतिग्रहणं क
र्तव्यं इह मा भूत् सिद्धं चाभुक्तं चेति
अनजिति च प्रतिषेधो वक्तव्यः इह मा
भूत् कर्तव्यमकृतमिति नुडिडति व
डिडधिकेन समासो वक्तव्यः इहापि स्
यथा स्यात् अशितानशितेन जीवति ।
क्लिष्टाक्लिष्टेन जीवति किमर्थं च ते
समानप्रकृतिग्रहणं कर्तव्यं यतिय ।
दानञ्विशिष्टेनेत्युच्यते न चात्र नञ् ।
कृत एव विशेषः अपि तु विशिष्टशब्दोऽस्मि
न्व्यापारे वर्तते तद्यथा देवदत्तयज्ञ
दत्तावावासाविति रूपोपपन्नौ देवद

श्री
महा
भा
३२०

त्तयज्ञदत्तावन्याध्यायेन विशिष्टः स्वा
ध्यायेनैव तिगम्यते अत्येशताः समा भवे
ति एकस्याधिको वर्तते तद्यथा देवदत्तय
ज्ञदत्तावासाविति रूपेण स्वेनोपपन्नव
न्तौ देवदत्तयज्ञदत्तावन्याध्यायेन वि
शिष्टः स्वाध्यायेनाधिक इति गम्यते इह
ये गुणाश्च विवक्षितो भवति तद्यथा ता
वदेव यारणो विशिष्टशब्दः न त्वनेनार्थः
समानप्रकृतिग्रहणेन नेह भविष्यति
सिद्धं चाभुक्तं चेति नाप्यनजिति प्रतिषे
धेनेह भविष्यति कर्तव्यमकृतमिति
नुडिडधिकेन समासो न प्राप्नोति यदा
धिको विशिष्टशब्दस्तदाधिकोऽविशिष्ट
शब्दस्तदा समानप्रकृतिग्रहणं कर्तव्य
मिति मा भूत् सिद्धं चाभुक्तं चेति अनजि
ति च प्रतिषेधो वक्तव्यः इह मा भूत् क
र्तव्यमकृतमिति नुडिडधिकेनापि त
दा समासः सिद्धो भवति तत्राधिको
विशिष्टशब्दस्समानात्समानप्रकृतिग्रह
णं चोद्यते अव्यापारेणानञ्चेन्नुडिडि
शिष्टेन तु प्रकल्प्येन अपवचेदधिक वि
वक्षावाच्यत्वात् प्रकृतिरिति कृताप

कृतादीनां चोपसंख्यं कृतापकृतादीनां
चोपसंख्यानं कर्तव्यं कृतापकृतं भुक्ता
विभुक्तं पीतविपीतं सिद्धं कोनेन विसमा
मावतञ्च सिद्धमेतत्तकथं कोनेन विस
मासो ग्रुनञ्क्तेन समस्यत इति वक्तव्यं
गतप्रत्यागतादीनां चोपसंख्यानं कर्तव्यं
गतप्रत्यागतं यातानुयातं क्रयाक्रयिका
पुटापुटिका फलाफलिका मानोन्मा
निका एवा पूर्वकोयं निर्देशः समानाधि
करणेनैव वर्तमानेकाः प्रसंगः यद्यधिक
रणानां समासः स्यात् एवं तर्हि एतज्ज्ञाप
यत्याचार्यः यथा जातीयम् तत्परेण तथा
जातीयकेन स्वपदेन समस्यते तथाजा
तीयके स्वपदे तथाजातीयकेनोत्तरपदे
न समस्यत इति किमेतस्य ज्ञापने प्रयोज
नं प्रातिपदिकग्रहणे लिंगविशिष्टस्या
पि ग्रहणं भवतीत्येषा परिभाषा न कर्तव्या
भवति वर्णो वर्णैर्विचार्य वर्णान्तरेणापि
समासो वा स्यात् कृष्णसारंगः कृष्णसा
रंगः कृष्णसारंगः इति समानाधिकरणे
ह्याकृष्णः सारंगः कृष्णसारंगः इति समाना
धिकरणानां कृष्णः सारंगः कृष्णसारंगः

तिकस्मान्न विशेषः वर्णोनन्तरेणापि समा
सप्रतिषेधे वर्णग्रहणं वर्णान्तरेणा
पि समासप्रतिषेधे वर्णग्रहणं च क
र्तव्यं तृतीयान्तस्य पूर्वपदप्रकृतिस्वरं भव
ति श्वेतेन वर्णेन इति वक्तव्यं प्रथमद्वितीय
वर्णग्रहणेपि न विशेषणानार्थः वाट
मर्थः यद्यवर्णेपि न शब्दोस्ति नन्वा
यमस्ति श्वेतः एतः इति नद्रिता
र्थः एवमर्थेन वर्णग्रहणेन यदि तावद
दयं कर्मधारयः तृतीयाकर्मणीत्येते
न स्वरेण भवितव्यं अथ कर्तरि परत्वा
त्कृत्स्वरेण भवितव्यं अथ समानाधिक
रणः समानाधिकरणे द्विवर्णग्रहणं
यदि समानाधिकरणे द्विवर्णग्रहणं।
कर्तव्यं वर्णो वर्णेनेन इति वक्तव्यं प्र
थमे वर्णग्रहणाद्दृष्टमाभूत् परमकृष्णः
द्वितीयवर्णग्रहणाद्दृष्टमाभूत् कृष्णति
लाइतिपूर्वकं वर्णग्रहणमनर्थकं प्रथ
मस्य कस्मान्न भवति लक्षणाप्रतिपदो
क्तयोः प्रतिपदोक्तस्यैवेति तथा सति
तानेनानियोगे वर्णग्रहणानि भवति
समासविधौ द्रव्यविधावेकस्यापि

कुमारीणांचोपसंख्यं कुमारपकुमारीणां
चोपसंख्यानंकर्तव्यं कुमारपकृतभक्ता।
विभ्रके पीतविषते सिद्धकोनेनविसमा
मावतज्ज सिद्धमेतनकथं कोलेनविस
मासे सुननक्कोनेसमस्यतेइतिवक्तव्यं
गतश्रमणागतादीनांचोपसंख्यानंकर्तव्यं
गतश्रमणागते यातायाते कुयाकुपिका
हरीतकिका फलाफलिका मानोन्मा
निका एवं युक्तोयंनिर्देशः समानाधि
करणेनैवर्तमानेकाप्रसंगः यद्याधिक
रणेनासमासःस्यात एवंतर्हिपतञ्ज्ञाप
यत्याचार्यः यथाजातीयमतत्परेतथा
जातीयकेनसर्वपरेनसमस्यते तथाजा
तीयकेसर्वपरेतथाजातीयकेनोत्तरपदे
नसमस्यतेइति किमेतस्यज्ञापनेप्रयोज
ने प्रातिपदिकग्रहणेलिंगविशिष्टस्या।
पिग्रहणंभवतीत्येषापरिभाषानकर्तव्या
भवति वर्णोहेविचार्यवर्णान्तरेणापा
समासोवास्यात कृष्णसारंगः कृष्णसा
रंगः कृष्णसारंगः इतिसमानाधिकरणे
वाकृष्णःसरंगः कृष्णसारंगः इतिसमाना
धिकरणेनेव कृष्णःसारंगः कृष्णसारंगः

श्री
महा
भा
३३८

निकस्यात्रविशेषः वर्णान्तरेणापासमा
सप्रतिषेधेवर्णग्रहणं वर्णेनान्तरेणो
पासमासप्रतिषेधेवर्णग्रहणंचक
र्तव्यं तृतीयांतेसर्वपरप्रकृति रेभव
ति श्वेतेनवर्णेनइतिवक्तव्यं अथहितीय
वर्णग्रहणोपरतिविशेषणानार्थः वाट
मर्थ्यः यद्यवर्णप्रतशब्दोस्ति नत्वचा
यमस्ति श्वेतःप्रतःश्वेतेनइतिना
र्थः एवमर्थेनवर्णग्रहणेनयदितावद
दंयकर्मपिकः तृतीयाकर्मणोन्येने
नस्वरेणाभवितव्यं अथकर्तरिपरत्वा
त्कृत्स्नेनभवितव्यं अथसमानाधिक
रणाः समानाधिकरणाद्विवर्णग्रहणं
यदिसमानाधिकरणाद्विवर्णग्रहणं।
कर्तव्यं वर्णोवर्णश्वेतेनइतिवक्तव्यं प्र
थमवर्णग्रहणमस्माभूत परमकृष्णः
द्वितीयवर्णग्रहणमस्माभूत कृष्णेन
लाइतिएकवर्णग्रहणमनर्थकं अथ
तरकस्मान्नभवति लक्षणप्रतिपदो
क्तयोःप्रतिपदोक्तस्यैवेति तथासति
नानेनानिर्योगितिवर्णग्रहणानिभवंति
समासविधौह्रस्वविधावेकस्यापिरे

नीयासमासः तस्मादपि शौणिववर्णग्रह
णानिभवंति समासविधौ हेत्वरविधा
वेकं सामान्येन तृतीयासमासो भविष्य
ति तृतीयान्तकृतार्थेन गुणवचनेनेति
श्रवणं वर्णानां प्रतिपदं वा। समासो वक्त
व्यः यत्रेतेन न सिध्यति तदर्थं क्वचितेन
न सिध्यति तदर्थं क्वचित्तेन न सिध्यति
शकलखण्डः हरितनखभक्षीति तथासति
नान्येव शौणिवर्णग्रहणानिभवंति स
मासविधौ हेत्वरविधावेकं पृथग्यदानी
समानाधिकरणः सामान्येन सिद्धः स्या।
त् वाढं सिद्धः कथमपि विशेषणं बहुल
मिति एवमपि वर्णग्रहणं कर्तव्यं।
स्वरविधावेव प्रतिपदोक्तस्य तृतीया
समासस्याभावात् तस्मात् समानाधि
करणे एव पदोपादानात् समानाधिक
रणाधिकारः प्रधानोपसर्जनानां परस्परं
विप्रतिषेधेन समानाधिकरणाधिका
रे प्रधानोपसर्जनानां परस्परं भवति विप्र
तिषेधेन प्रधानानां प्रधानं उपसर्जना
नामुपसर्जनं हेदारकनागकुञ्जरैः पू
ज्यमानमित्यस्यावकाशः गोहेदारकः पु

श्री
महा
भा
३३९

षंहेदारकः गोदापुवतीत्यस्यावकाशः
इभ्ययुवतिः श्रोत्रिययुवतिः इहोभयं प्राप्नो
ति नागयुवतिः प्रधानानां प्रधानं भवति
विप्रतिषेधेन समानाधिकरणसमासः।
स्यावकाशः उपसर्जनानामुपसर्जनं स
ह्हनरमानमोक्षणः तल्पश्चेतः तल्प
महत् इहोभयं प्राप्नोति तत्समत् उप
सर्जनानामुपसर्जनं भवति विप्रतिषेधे
न समानाधिकरणबहुव्रीहिः समाना
धिकरणसमासाद्वा बहुव्रीहिर्भवति वि
प्रतिषेधेन कदाचित्कर्मधारयः सर्वधना
द्यर्थः कदाचित्कर्मधारयो भवति किंप्र
योजनं सर्वधनाद्यर्थः किमच्यते कदा
चित्कर्मधारय इति कर्मधारयकृतिमि
मत्वर्थीयेरभिधानं यथा स्यात् किंचका
रणं स्यात् बहुव्रीहिनोक्तत्वात् मत्वर्थस्य
यदुक्तं वेदः कर्मधारयेण त्वनुक्तत्वात्
प्राप्नोति नावल्यपि सत्ताप्यग मत्वर्थीयः
किं तर्हि प्रयोजनं सर्वधनी बहुव्रीहिणा
ऽनुक्तत्वान्न भवति एवं कर्मधारयेणाप्युक्त
त्वान्न प्राप्नोति एवं तर्हीदं स्यात् सर्व।
णादिनाम्यसमेतीति सर्वधनीति नैवं

कोनिग्रमेवं सजिकर्मधारयः स्यात् प्र
के ननु कदाचित्कर्मधारय इष्यते दृष्टके
एवं तर्हि किं विदाचार्यैः कार्यं बहुव्रीहिक
त्वापद इति कार्याः शङ्का इति तद्विद्वपठि
ते समानाधिकरणसमासाद्बहुव्रीहिः
कर्तव्यः कदाचित्कर्मधारयः सर्वधनाद्य
र्थ इति नैष दोषः विप्रतिषेधः अन्तरङ्गः
कर्मधारयः कोन्तरङ्गः स्वपदार्थे कर्म
धारयः अन्यपदार्थे बहुव्रीहिः अस्तु वि
भाषः कर्मधारयः यदा न कर्मधारयस्त
दा बहुव्रीहिर्भविष्यति एवमपि यद्य
कदाचित्कर्मधारयो भवति कर्मधारय
प्रकृतिभिर्मत्वर्थीयैरभिधानं स्यात् इति
एवं तर्हि नेदं तस्य योगस्योदाहरणं विप्रति
षेधे परमिति किं तर्हि इष्टिरियं पठितव्या स
मानाधिकरणसमासाद्बहुव्रीहिरिष्टः क
दाचित्कर्मधारयः सर्वधनाद्यर्थ इति परि
ष्टः पठितो नार्थो नेन इहापि सर्वमनुष्याः
अल्पेनाल्पेन यत्नेन महता महतार्थेना
कान्तं तिष्ठेकेन माषेण समासाद्बहुव्रीहि
रिष्टः एकेन कुद्दालपदेन वारीशानस्य
स्तं ननु कर्मधारयप्रकृतिभिर्मत्वर्थीयैर

श्री
महा
भा
३८०

भिधानमस्तु बहुव्रीहिणोति बहुव्रीहि
णाभविष्यति लघुत्वात् कथं सर्वधनी
सर्वबीजी सर्वकेशी नटः सर्वो दीनिव।
ह्यामि सर्वावयवकत्वात् यनोनायता।
यौ कथं गौरखरवदरण्यं गौरखरवद
रण्यं कृष्णसर्पवान्वल्मीकः लोहितशा
लिमान्ग्राम इति प्रत्यत्र विशेषः जा
त्याभिसंबन्धः क्रियते कृष्णसर्पाणाम
जातिः सास्मिन्वल्मीकेस्ति यदा त्वेते
णाज्जातिनरुद्धाभिसंबन्धः क्रियते सर्वप
दातिशयस्त्वातिशायिका बहुव्रीहिः स
र्वावयवनाय्यर्थः सर्वपदातिशायेत्या
तिशायिका बहुव्रीहिर्भवति विप्रतिष
धेन किं प्रयोजनं सर्वावयवनाध्यर्थः
आतिशायकस्यावकाशः पटुतरः पटु
तमः बहुव्रीहेरवकाशः चित्रगुः शबल
गुः इहोभयं प्राप्नोति सर्वमनुष्यकरःतो
त्याप्यगतः बहुव्रीहिर्भवति विप्रति
षेधेन नैष दोषः विप्रतिषेधः विप्रति
षेधे परमित्युच्यते सर्वेषु बहुव्रीहिः प
रत्वातिशायकः इहवाचोपरशब्दः विप्र
तिषेधे परं यदिष्टं तद्भवति एवमप्यप्र।

न्कृष्टान्तरंगत्वातिशायिकः कोन्तरेगता
प्रशमातिपदिकादातिशायिकः सर्वेता
वोबहुव्रीहिः आतिशायिकोपि नान्तरंगः
कथंसमर्थात्तद्धितउत्पद्यते सामर्थ्यं च
सर्वेनन एवष्यन्तरंगः कथं स्वपरार्थे
आतिशायिकः अन्यपदार्थे बहुव्रीहिः प
वमपि नान्तरंगः कथं स्वार्थायामातिशा।
यिको विधीयते न चान्तरेणाप्रतियोगि
नं स्वार्थो भवति नैव चात्रातिशायः स्यान्नो
ति किं कारणं असामर्थ्यात् कथमसाम
र्थ्यात् सापेक्षमसमर्थं भवति यावता
वस्मातंतमपेक्षते नेह नचापेक्षवसा
णांवसुत्वापन्नस्वार्थो भवति ननुचा
यमातिशायिकएवमात्मकः अन्यविप
त्वायांविधीयते सत्यमेवमात्मकः या
वन्नान्तरेणाव्यपेक्षामातिशायिकस्य प्रह
ति स्वसामर्थ्याभवितव्यं कांचनान्तरेणा
व्यपेक्षामातिशायिकस्य प्रहतिः याप्रति
योगिनं प्रत्यवेक्षाहितं हेतं प्रति स्वस्या
सन्याभवितव्यं बहुव्रीहिरपितर्हिन्नप्रा
मोति किं कारणं असामर्थ्याम् कथमसा
मर्थ्यं सापेक्षमसमर्थं भवतीति यावता

वस्माणिवसुत्वनराणापेक्षते नेहनाचा
भिसंबंध एवं तर्हीमं दतस्ययोगस्योदा
हरणं विप्रतिषेधपरमिति किं तर्हि द्वि
त्रिपदिना सर्वपदातिशायश्रातिशाय
काद्बहुव्रीहिः सूक्ष्मवस्त्रतराय यथेति
पदोपरि त्रिपदिना नार्थोनेन कथं यथे
पाप्रकृतिरुक्तावसूनामवसंबंधापन्नस्य
र्थो नेहनाभिसंबंधः क्रियते निष्ठति
ह्रेद्धस्वदा बहुव्रीहिः बहुव्रीहेरेवाति
शायिकः नहीदानीमिदं भवति सूक्ष्म
तरवस्त्रमिति वस्त्रभवति यदाप्रतरेणान्तःस्ते
वस्त्राणामेवसंबंधापन्नः स्वार्थो कथं प्र
नेरनाम्यप्रकर्षोनामप्रकर्षः स्यात् न
वान्याप्रकर्षेणाप्रकर्षेणाभवितु
वो यथैवायं द्रव्यप्रयत्नते सूक्ष्माणि स
स्त्रीति एवं गुणेष्वपि यत्नते सूक्ष्मत
राणिमस्त्रीति नात्रापिशायिकः प्रा
मोति किं कारणं गुणवचनादित्युच्य
ते न समासो गुणवचनः समासोपि
गुणवचनः कथं प्रजरत्सार्थीहतिः
प्रथाजरत्सार्थीहतिः प्रथाजरत्सा
र्थीयादोषएव जरत्सार्थीयाचन।

दोषो भवति बहुव्रीहौ तद्गुणसंविज्ञान
मपि तद्यथा शुक्लवाससमानय लो
हितोष्णीषाः प्रचरन्तीति तद्गुणस्यानी
यते तद्गुणाश्च प्रचरन्ति उत्तरपदातिश
यश्चातिशायिको बहुव्रीहिः बह्वाढ्य
तरार्थः बह्वाढ्यतरः बहुसुकुमारतरः
किं पुनरत्र विशेषः बहुव्रीहिर्वातिशायि
कः स्यात् अतिशायिकेन वा बहुव्रीहिः
स्वरकृतो विशेषः यद्यत्र बहुव्रीहिः स्याति
शायिकः स्यात् बह्वाढ्यतर इति एवं स्व
रः प्रसज्येत बह्वाढ्यतर इति चेष्यते स
मानाधिकरणाधिकारे शाकपार्थिवा
दीनामुपसंख्यानमुत्तरपदलोपश्च स
मानाधिकरणाधिकारे शाकपार्थिवादी
नामुपसंख्यानं कर्तव्यं उत्तरपदस्य लो
पो वक्तव्यः शाकभोजी पार्थिवः शाक
पार्थिवः कुतपवासाः सौश्रुतः कुतप
सौश्रुतः अजापण्यः तौल्वलिः अजा
तौल्वलिः यष्टिप्रधानो मौद्गल्यो यष्टि
मौद्गल्यः चकारादीनामभिधेय जातथा
जातिविनिवृत्त्यर्थं इह मा भूत् काला
दीनामभिधानं मयूरव्यंसकादयश्च किम

श्री
महा
भा
३४२

र्थश्चकारः एवकारार्थः मयूरव्यंसका
दय एव क्व मा भूत् परमो मयूरव्यंसक
इति ॥ ॥ इति श्रीमद्भगवत्पत
ञ्जलिमुनिविरचिते व्याकरणमहाभा
ष्ये द्वितीयाध्यायस्य प्रथमपादे तृतीय
माह्निकं ॥ ॥ ॥ अर्धं नपुंसकम्
इह कस्मान्न भवति ग्रामार्धं नगरार्धं
इति अर्धशब्दोऽयं पुंनपुंसकलिङ्गस्तद्य
हेतद्ग्रहणं पुंलिङ्गश्चायं क्लीबे नपुंस
कलिङ्गः समप्रविभागे नपुंसकलि
ङ्गः अवयववाची पुंलिङ्गः इह कस्मा
न्न भवति अर्धपिप्पलीनामिति नवा
भवत्यर्धपिप्पल्यादि इति भवति यद्येवं
इष्टमत्रयः अर्धपिप्पली च अर्धपिप्प
ली च अर्धपिप्पली इति यदा तदा न
भवति अर्धपिप्पलीनामिति तदा न भ
वितव्यं तदा कस्मान्न भवति एकाधि
करणे इति वर्तते नैतदस्ति नामिदं भ
वति अर्धराशिरिति भवति च एकम्
तदधिकरणं योऽसौ राशिर्नाम द्वितीय
अस्मात् तस्माद्ग्रहणं किमर्थं अन्यतरस्यां
समासो यथा स्यात् समासेन मुक्ते वाक्य

मपियथास्यात् द्वितीयंभिक्षायाइति
नैतदस्तिप्रयोजनं प्रकृतामहाविभा
षा तयावाक्यमपिभविष्यति इदंतर्हि
प्रयोजनं एकदेशिसमासेनमुक्तेषष्ठी
समासोपियथास्यात् भिक्षाद्वितीयइ
ति एतदपिनास्तिप्रयोजनं पूर्वमपि
विभाषाषष्ठीसमासोपिनान्भावचना
द्भविष्यतः पूर्वउत्तरपदइति द्वितीया
दीनांविभाषाप्रकरणेविभाषावचने
ज्ञापकमवयवविधानेसामान्यवि
धानाभावस्यद्वितीयादीनांविभाषाग्र
कारेणाविभावचनंक्रियते किमर्थं
ज्ञापकार्थं किंज्ञाप्यं एतज्ज्ञापयत्या
चार्यः अवयवविधौसामान्यविधिर्नभ
वतीति किमेतस्यज्ञापनेप्रयोजनं मि
नति क्विवतीति अभिकृतेशपनभ
वति नैतदस्तिप्रयोजनं शावादेशाःप
त्यादयःकरिष्यते नतर्हिदेशग्रहणं।
कर्तव्यं नकर्तव्यं प्रकृतमनुवर्तते क
प्रकृते कर्तरिशवितिनैदंप्रथमानिर्दि
ष्टं षष्ठीनिर्दिष्टेनचेहार्थः कर्त्रादिभ्यइति
पंचमीशवितिप्रथमाषाः षष्ठीप्रकल्पयि

श्री
महा
भा

ष्यति तस्मादित्युत्तरस्येतिप्रत्ययविधि
रयं नचप्रत्ययविधौपंचम्यः प्रविकल्पि
काभवति नायंप्रत्ययविधिः विहितः
प्रत्ययः प्रकृतेश्चानुवर्तते एवंतर्हि
ज्ञापयत्याचार्यः यदोन्तर्गणापवादंविधा
षा तत्रापवादेनमुक्तेउपसर्गोनभवती
ति किमेतस्यज्ञापनेप्रयोजनं इकस
वर्णदानंडोशम प्राङ्कावो प्राङ्कावाथ
मङ्कावो प्रत्यङ्कावाडीपामकेडोः प्र
भवति नैतदस्तिप्रयोजनं वक्ष्यत्येतत्
इकस्सर्वप्रदेशेषोनदातनंडोवियाने
दान्यजापिडोशडोविषयान्उडोश्यसंग
इति इदंतर्हिप्रयोजनं पूर्वोपिप्यलीश
र्धकोशातकीएकादेशिसमासेनमुक्ते
षष्ठीसमासेनभवति उत्तरगंयो नोहि
नगोगम अव्ययीभावेनमुक्तेबहुव्रीहि
र्नभवति द्वाहिः लाहिः इजामुक्तेश्च
णाभवति यद्यतज्ज्ञापयतेउपागोरपत्य
मौपगवः उपगवप्रत्यमितिनसिध्यति
प्रत्ययविशेषः हेत्वविभाषेद्वृपमि
येगवहृतिसात्मप्रिकेविहितव्यानाते
रस्यामिति समर्थानांप्रथमाद्वेतिव नैव

कथाहमिति विभाषया प्रथयाहमिति विभा
षया विभाषेयवादः किमयमाणोपि वेप्र
मानरस्याग्रहणाषष्ठीसमासोनयाभ्यामिति
किंकारणं पूरणेनेति प्रतिषेधात् नेत
त्पूरणान्तमनेनत्पर्यवपन्ने एतद्दपिपू
रणेनेकथंपूरणानामार्थः तमर्थमाह
नेयशाब्दः पूरणमासोभवति पूरणेना
न्यार्थभागेपूरणएवंतर्हिमानरस्याग्रह
णासमर्थ्यास्षष्ठीसमासोभविष्यति श्रा
मा किमर्थश्चकारः प्रवकर्षणार्थः प्र
मानरस्यामितेनतदनुकृष्यते किमर्थं प्र
मानरस्यासमासोयथास्यात् नैतदस्ति
प्रयोजने एकृतमहाविभाषातया
वाक्यमपिभविष्यति इदंतर्हिप्रयोज
नेद्वितीयासमासोपियथास्यात् जीवि
काप्राप्तइति एतदपिनास्तिप्रयोजनम
प्रथमप्युच्यते द्वितीयासमासोपितद्व
भेयवचनाद्भविष्यति एवंतर्हिनायम
नुकर्षणार्थश्चकारः किंतर्हिप्राप्तमने
नविधीयते प्राप्तापन्नेद्वितीयातेनसम
स्यतेप्रथयचभवति प्राप्तापन्नेयोविति श्रा
माजीविकांप्राप्तजीविका आपन्नाजी

विका आपन्नजीविका कालाः किंप्र
धानोयंसमासः उत्तरपदार्थप्रधानः
कथमुत्तरपदार्थप्रधानः सप्तमणात्तेना
मैकृतत्तरपदार्थप्रधानेभविनव्यं पूर्व
पूर्वोत्तरपदार्थप्रधानेपूर्ववासाववर्ण
लिनीविभक्तिरस्याःसमासेपिप्रवर्णा
भवति तद्यथाराज्ञःपुरुषःराजपुरुषः
इति इदंपूर्वोवाकेषष्ठीसमासेप्रथमा
केवलंतदेवभवतियोसौ मासमभिजातस्यो
रभिसंबंधः समासेनिवर्तते अभिहि
तः सोर्थोन्तर्भूतः प्रातिपदिकार्थः संप
न्नः तत्रप्रातिपदिकार्थप्रथमेतिप्रथ
माभवति तत्रैदानीमिदंभवतिमा
सजातस्येति भवति यदावाक्यमर्थम
पेक्ष्यषष्ठी कालस्यचेनसमासस्तस्याप
रिमाणिनाविनिर्देशः कालस्ययेनस
मासः अपरिमाणीसमासस्तस्याः परि
माणिनावनिर्देशः अगमकोनिर्देशः
नहिजातस्यसमासः परिमाणी कस्य
तर्हिक्रियायास्तद्यथा द्रोणोवदरा।
णांदेवदत्तस्येतिनदेवदत्तस्यद्रोणः परि
माणं कस्यतर्हिवदराणां सिद्धनेकाल

परिमाणं यस्य स कालस्तेन सिद्धमेतत्।
कथमकालपरिमाणं यस्य स कालस्ते
न सह समस्यत इति वक्तव्यम् सिध्यति सू
त्रेण हि सिध्यते यथान्यासमेवास्तु ननु चो
क्तं कालस्य येन समासस्तस्याः परिमाणि
त्वादनिर्देश इति कथं पुनः कालमनाभ
वान्सह कालस्य येन समासस्तस्याः परि
माणित्वादनिर्देश इति येन मूर्तिमतामुप
चयापचयाश्च लक्ष्यन्ते तं कालमित्याहुः
तस्यैव तु हि कयाचित्क्रियया युक्तस्याहरि
ति भवति रात्रिरिति च कया क्रियया आ
दित्यगत्या तयैवासकृदावृत्तया मास इ
ति भवति संवत्सर इति च यद्येवं भवती
जातस्य समासः परिमाणं एकवचनं द्विगो
श्चोपसंख्यानं एकवचनेनानानामिति वा
कथं इह माभूत् मासो जातस्य मासजात
स्येति द्विगोश्चेति वक्तव्यं इहापि यथा
स्यात् द्विमासजातः त्रिमासजातः उक्ते
वा किमुक्तमेकवचनेनावक्तुकमनभिधा
नादिति द्विगोः किमुक्तम् उत्तरपदेन प
रिमाणिवा द्विगोः समासवचनमिति न
नु किं प्रधानोऽयं समास उत्तरपदार्थप्र

श्री॰
महा॰
भा॰
३८५

धानः यद्युत्तरपदार्थप्रधानः अयास्ता
णमानयेत्येकेनास्तरणमात्रस्यानयनं।
प्राप्नोति अन्यपदार्थप्रधानः न हि भवि
ष्यति यद्यन्यपदार्थप्रधानः अवर्णो हेम
न इति हेमन्तस्य यल्लिङ्गवचनं तत्समासस्या
पि प्राप्नोति सर्वपदार्थप्रधानः न हि भ
विष्यति यदि सर्वपदार्थप्रधानः अव्य
यं संज्ञा प्राप्नोति अव्ययं स्यादेवं पदमने
षेहाः पाठेनाव्ययसंज्ञा क्रियते न च न
समासस्तत्र पठ्यते पाठेनाप्यव्ययसंज्ञा
योऽसमासमभिधेयवल्लिङ्गवचनानि भव
न्तीति यस्य ह्यर्थोऽभिधीयते न तस्य लि
ङ्गसंख्याभ्यां योगोऽस्ति नैवं वाचनिकम
लिङ्गता असंख्यता वा किं तर्हि स्वाभा
विकमेतत् तद्यथा समानमीहमाना
नामधीयानानां च केचिदर्थैर्युज्यन्ते अ
परे न तद्वदिदानीं कश्चिदर्थवानिति कृत्वा
नः सर्वैरर्थवद्भिः शक्यं भवितुम् कश्चि
दानर्थक इति सर्वैरनर्थकैः न च किमस्मा
भिः शक्यं कर्तुम् यत्तु तत्प्राक्समासात्।
लिङ्गसंख्याभ्यां योगो नास्ति समासे च
भवति स्वाभाविकमेतत् अथवा आश्र

यतो लिंगवचनानि भविष्यन्ति गुणवच
नेभ्यो हि आश्रयतो लिंगवचनानि भ
वन्ति तद्यथा शुक्लं वस्त्रं शुक्ला शाटी शु
क्लः कंबल इति यदसौ द्रव्यं श्रितो भवति
समासस्यापि लिंगवचनानि समासस्या
पि भविष्यन्ति अथवा पुनरस्तूत्तरपदा
र्थप्रधानः ननु चोक्तमब्राह्मणमानयेत्यु
क्ते ब्राह्मणमात्रस्यानयनं प्राप्नोतीति नैष
दोषः इदं तावदयं प्रष्टव्यः अथेह राजपु
रुषमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं
कस्मान्न भवति अस्त्यत्र विशेषः राजा अ
विशेषकः प्रयुज्यते तेन राजविशिष्टस्या
नयनं भवति इहापि तर्हि नञ् विशेषकः
प्रयुज्यते तेन नञ् विशिष्टस्यानयनं भ
विष्यति कः पुनरसौ निवृत्तपदार्थकः
यदि पुनरस्य पदार्थो निवर्तते किं स्वाभा
विकी निवृत्तिराहोस्विद्वाचनिकी किं चा
तः यदि स्वाभाविकी किं नञ् प्रयुज्यमानः
करोति अथ वाचनिकी तद्वक्तव्यं नञ्
प्रयुज्यमानः पदार्थान्निवर्तयतीति स्वाभा
विकी निवृत्तिः ननु चोक्तं किं नञ् प्रयुज्यमा
नः करोतीति एवं तर्हि वाचनिकी भविष्य

श्री
महा
भा
३५६

ति नञ् प्रयुज्यमानः पदार्थं निवर्तयति कौ
लप्रतिकौलवत् तद्यथा कौलस्याहूयमानः
प्रतिकौले निवर्तते यथैवं नञो माहात्म्यं नञा
भविष्यज्ञानाहृत्स्यार्थे विस्पष्टः नैवं वृष्टः
एवं तर्हि स्वाभाविकी निवृत्तिः न त्वभिमता
नुपलब्धिः तद्यथा समयान्धकारे स्थितानां
भावानां वृक्षितानां प्रदीपनिमित्तं दर्शनं न
च तेषां प्रदीपो निवर्तको भवति यदि पुनर
यं निवृत्तपदार्थकः किमर्थं ब्राह्मणशब्दः
प्रयुज्यते एवं यथा विज्ञायते अस्य पदार्थो नि
वृत्त इति ते निःसंदेहः स्यात् कस्य पदा
र्थो निवृत्त इति तत्रासंदेहार्थं ब्राह्मणश
ब्दः प्रयुज्यते एवं चेत् अथवा सर्व एते श
ब्दा गुणसमुदायेषु वर्तन्ते ब्राह्मणः क्षत्रियो
वैश्यः शूद्र इति तपः श्रुतं च योनिश्चेत्येत
द्ब्राह्मणकारकं तपःश्रुताभ्यां यो हीनो
जातिब्राह्मण एव सः तथा गौरः शुच्या
चारः पिंगलः कपिलकेश इति एतान
प्यभ्यंतरान् ब्राह्मण्ये गुणान् कुर्वन्ति सम
दायेषु च वृत्ताः शब्दा अवयवेष्वपि वर्त
न्ते तद्यथा पूर्वे पांचालाः तैलं भुक्तं शुक्लो
नीलः कृष्ण इति एवमयं समुदाये ब्राह्मण

शब्दः प्रयुक्तो यदेषोपि वर्तते जातिहीने
गुणहीनेच गुणहीने तावत् अब्राह्मणोयं
यस्तिष्ठन् मूत्रयतीति अब्राह्मणोयं यो गच्छन्
भक्षयतीति जातिहीने संदेहाद्दुरुपदेशा
द्ब्राह्मणशब्दो वर्तते संदेहात्तावत् गौरं शु
च्याचारं पिंगलं कपिलकेशं दृष्ट्वाध्यवस्यति ब्रा
ह्मणोयमिति ततः पश्चादुपलभते ना
यं ब्राह्मणः अब्राह्मणोयमिति अत्र संदे
हाद्ब्राह्मणशब्दो वर्तते जातिकृतं चा
स्य निवृत्तिः दुरुपदेशात् दुरुपदिष्ट
मस्य भवति अमुष्मिन्नवकाशे ब्राह्मण
स्तमानयेति स तत्र गत्वा यं पश्यति तम
वस्यति ब्राह्मणोयमिति ततः पश्चादुप
लभते नायं ब्राह्मणः अब्राह्मणोयमिति
निर्ज्ञाते तस्य भवति तत्र दुरुपदेशाद्ब्रा
ह्मणशब्दो वर्तते जातिकृतं चार्थस्य निवृ
त्तिः अतस्संदेहाद्दुरुपदेशाद्वा तद्यथा का
लमाषवर्णं ब्राह्मणमासीनं दृष्ट्वाव
स्यति ब्राह्मणोयमिति निर्ज्ञाते तस्य भव
ति इदं खल्वपि भूयस्तत्परार्थ्यप्रायोग्य
स्मभिसंगृहीतं भवति किं पुनस्तमिति
किमत्र संगृहीतमेकवचनं कथं पुनरेक

स्य प्रतिषेधो बहूनां संप्रत्ययः स्यात् यस
न्नायं क्रियागुणौ ततः पश्चात्प्रतिहतिकरो
ति तद्यथा अब्राह्मणभोजनं यशोयपानकमि
ति यद्यपि तावदेतत्तत्कार्यं नैव कैवं कि
यागुणौ प्रसज्येते यत्र तु तावदप्रसज्येते
तत्र कस्मात् पुनरेकत्रिष्यतीति भवतीदं
जातीयकेषु एकस्य प्रतिषेधो बहूनां प्र
यः तद्यथा न तत्र एकं प्रियं न तत्र एकं स्यादे
मिति इह ब्राह्मणत्वमब्राह्मणत्वप्र
त्यान्ततो लोप्यमानः तत्र कोदोषः अदो
षः स्यात् अब्राह्मणान्मित्रेवं स्वरः प्रस
ज्येत अब्राह्मणानमिति चेष्यते तत्र स
मासभावस्तूक्तः किं तदुक्तं न जल्पतार्ह
जसमासः एवं विप्रतिषिद्धे तन्तोः स्वा
द्धार्थमिति ईषत्कृतादि षड् गुणवचनेनेति
षड्गुणवचनेनेति वक्तव्यं अकृतेति प्रचा
मात् ईषत्प्रसज्येत ईषद्गार्ग्य इति ईषद
तस्मात् ईषत्कडार इति षष्ठी कृत्ययोगाच
कृत्ययोगाच षष्ठी समस्यत इति वक्तव्यं इध्म
व्रजश्चनः किमर्थमिदमुच्यते प्रतिपद।
विधाना च षष्ठी न समस्यत इति वक्ष्यति त
स्यायं पुरस्तादपकर्षः कार्यः षष्ठी प्रतिप

दविधाना कृद्योगा सर्वा षष्ठी प्रतिप
दविधानाशेषलक्षणा च वर्ज्जयित्वा कर्त्तृक
र्मणोः कृति नित्यं या षष्ठी सा कृद्योगा तस्य
ग्रहणं तस्यैव ग्रहणं षष्ठी समस्यत इति
वक्तव्यं ह्रतस्य तीव्रः चेदनस्य मन्दरीति
किमर्थमिदमुच्यते गुणेन नि प्रतिषेधं व
क्ष्यति तस्मादेव न स्यादपकर्षः किमर्थं
पुनर्गुणेनेत्युच्यते न पुनर्गुणवचनेन ।
उच्यते नैवं शक्यं इह हि न स्यात्काकस्य
कार्ष्ण्यं कण्टकस्य तैक्ष्ण्यं बलाकायाः शौ
क्ल्यमिति एतदेवास्मिन्योग उदाहरणं य
दीदं ब्राह्मणस्य शुक्लाः वृषलस्य कृष्णा इ
सामर्थ्यान्न भविष्यति सापेक्षमसमर्थं भव
तीति इष्यमाणापेक्ष्यते इदं तः तस्माद्गुणेनेति
वक्तव्यं न निर्धारणे प्रतिपदविधाना प्रतिपद
विधाना च षष्ठी न समस्यत इति वक्तव्यं ३ ।
इहापि यथा स्यात् सर्पिषो ज्ञानं मधुनो ज्ञानं स्व
रयोः किमुदाहरणं ब्राह्मणस्य शुक्लाः
वृषलस्य कृष्णा इति नैतदस्ति असामर्थ्या
दत्र न भविष्यति कथमसामर्थ्यं सापेक्ष
मसमर्थं भवतीति इष्यमाणापेक्ष्यते इदं तः
इदं तर्हि काकस्य कार्ष्ण्यं कण्टकस्य तैक्ष्ण्यं ब

लाकायाः शौक्ल्यमिति इदं चाप्युदाहर
णं ब्राह्मणस्य शुक्लाः वृषलस्य कृष्ण इति
नैतदस्ति असामर्थ्यादत्र न भविष्यति क
थमसामर्थ्यं सापेक्षमसमर्थं भवतीति
इष्यमाणापेक्ष्यते इदं तः भवति ह्येकस्य चिद
र्थोपकरणाद्यपेक्षातिशयेन तदाहति
प्राप्नोति सति किमुदाहरणं ब्राह्मणस्य
पल्वलं ब्राह्मणस्य पक्ष्मणाः नैतदस्ति
प्रतिषिध्यते न षष्ठीलकारप्रयोगेनेति
याचक्ष्यते यथावान्तमर्थमपेक्ष्य भव
ति तथा सामर्थ्यान्न भविष्यति कथमसा
मर्थ्यं सापेक्षमसमर्थं भवतीतीष्यमा
णापेक्ष्यते इदं तः इदं तर्हि चोरस्य द्विषन्
न वचा चापि प्रतिषिध्यते वक्ष्यमाणनिर्दि
ष्टः चन वा वचनमिति प्रयोगे किमुदाह
रणं ब्राह्मणस्याश्वैः वृषलस्य नीचैः नैत
दस्ति असामर्थ्यादत्र न भविष्यति कथ
मसामर्थ्यं सापेक्षमसमर्थं भवतीतीद
ष्यमाणापेक्ष्यते श्वासक इदं तर्हि ब्राह्मण
स्य कृत्वा वृषलस्य हन्तेति एतदपि नानि
प्रतिषिध्यते न षष्ठी प्रयोगेनेति य
चक्ष्यते यथावान्तमर्थमपेक्ष्य भवति

तेषामसामर्थ्यान्न भविष्यति कथमसाम
र्थ्यं सापेक्षमसमर्थं भवतीति इयमपि
पेक्षते कः इदं तर्हि ग्रामस्यैषा देनोरा
धेयः न च चाप्यप्रतिषिध्यते षष्ठी व
दनेन तन अव्ययप्रतिषेधेनो स्वकस्तेनो
ऽप्रतिषेध इति समानाधिकरणं किमु
दाहरणं राज्ञः पाटलिपुत्रकस्याभ्रूक
समासाविदस्य पाणिनेः सूत्रकारस्य
नेतदस्ति असामर्थ्यादत्र न भविष्यति
कथमसामर्थ्यं समानाधिकरणमसम
र्थवद्भवतीति इदं तर्हि सर्पिषः पीयमा
नस्य यजुषः क्रियमाणस्य न च चाप्य
सामर्थ्यादत्र न भविष्यति कथमसा
मर्थ्यं समानाधिकरणमसमर्थवद्भव
तीति प्रधानमभिहितमित्येवं तत्र कर्म
णि च कथमिदं विज्ञायते कर्मणि या
षष्ठी सा न समस्यत इति आहोस्वित् कर्मणि
यः क्त इति कुतः सन्देहः उभयथा क्तेन त
त्रायानन्तरत्वात् विभाष्यते कश्चात्र वि
शेषः कर्मणीति षष्ठीनिर्देशश्चेत्स्कन्ते
षिता समासवचने कर्मणीति षष्ठीनि
र्देशश्चेत्क्तनिवृत्तानामसमासोवक्तव्यः

श्री
महा
भा
३५९

यमत्र भवतः नञ्काभ्यां चानर्थकप्रति
षेधः नञ्काभ्यां च प्रतिषेधोऽनर्थकः
अणोसहाकर्मणोरेव सिद्धं अक्तेन हि
कर्मणि यः क्त इति किमुदाहरणं शालि
णामस्भुक्तः हेपलस्य पीनः कनिर्देशो
समर्थत्वादप्रतिषेधः कनिर्देशासमर्थ
त्वात् अप्रतिषेधः अनर्थकः प्रतिषेधो
प्रतिषेधः समासः कस्मान्न भवति अ
सामर्थ्यात् कथमसामर्थ्यं सापेक्षम
समर्थं भवतीति इयमपेक्षापेक्षते इदन्तः
प्रतिषेधमिति चेत् कर्तर्यपि प्रतिषेधः अ
र्थं प्रतिषेधो वक्तव्य इति कर्तर्यपि प्र
तिषेधो वक्तव्यः स्यात् आलस्यगतः आ
लणस्ययानः इति पूजायां च प्रतिषेधा
नर्थक्यं पूजायां च प्रतिषेधोऽनर्थकः रा
ज्ञां पूजितः कर्मण्येव सिद्धं तस्मादु
भयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधः तस्मा
दुभयप्राप्तौ कर्मणीत्येवं या षष्ठी तस्याः।
प्रतिषेधो वक्तव्यः सतर्हि वक्तव्यः न वक्त
व्यः इत्यर्थे यच्च पठितः कर्मणि च कर्म
णीत्येवं या षष्ठीति नित्यो किमिह नित्य
ग्रहणेनाभिप्रेयं विधाने विधिः आहोस्वि

त्वनिषेधय इति विधिरित्याह कृतनयन
ने विधिर्हि विभाषानित्यप्रतिषेधप्रा
दिप्रसंगे कर्मप्रवचनीयानां प्रतिषेधः
प्रादिप्रसंगे कर्मप्रवचनीयानां प्रतिषे
धो वक्तव्यः वृक्षं प्रति विद्योतते साधुर्दे
वदत्तो मातरं प्रति वा चेन प्रतिषेधस्त्वा
वेनानां च प्रतिषेधो वक्तव्यः आमहौरि
हरिगिरियाहिमवत्सोमभिः सिद्धत
को३ स्वतिस्तेति वचनात् सिद्धमेतत्
कथं को३ स्वतिरुत्थापः समस्यत इति
वक्तव्यं कुकुब्राह्मणाः प्रब्राह्मणः स्व
स्वब्राह्मणाः प्रति प्रतिब्राह्मणाः उरुब्रा
ह्मणाः गतिप्रकारकः उपाधकः प्रसेच
कः प्रादयः क्तार्थे प्रादयः क्तार्थे समस्य
न्त इति वक्तव्यं प्रगत आचार्यः प्रान्तेवा
सी प्रपितामहः पतदेवमानिभिः विस्तर
केणापठितव्यं स्वतीरुजायां स्वतीरुजा
याभिति वक्तव्यं स्वराजा अतिराजा इति दा
या उतिराधाभिति वक्तव्यं इस्कले उ
गौः आङीषदर्थे आङीषदर्थे इति वक्तव्यं
आकडारः आपिंगलः कुः पापार्थे कुः पा
पार्थे इति वक्तव्यं कुब्राह्मणाः कुवृषलः अ

श्री
महा
भा
३५०

दयो गताद्यर्थे प्रथमया समस्यन्त इति
वक्तव्यं प्रगत आचार्यः प्राचार्यः प्रान्ते
वासी प्रपितामहः प्रन्तादयः क्रान्ताद्य
र्थे द्वितीयया समस्यन्त इति वक्तव्यं अ
वक्रुष्टः कोकिलया अवकोकिलः प
र्यादयो ग्लानाद्यर्थे चतुर्थ्या समस्यन्त इ
ति वक्तव्यं पर्यग्लानोऽध्ययनाय पर्यध्य
यनः निरादयः क्रान्ताद्यर्थे पञ्चम्या सम
स्यन्त इति वक्तव्यं निष्क्रान्तः कौशाम्ब्याः
निष्कौशाम्बिः निर्वाराणसिः अवाद्यप्र
हृष्टादिभिः समस्यन्त इति वक्तव्यं अनः
प्रकृष्टवहिर्भवति इवेन विभक्त्यलोपः
पूर्वपदप्रकृतिस्वरत्वं च वाससी इव के
न्येव उदात्तवता तिङा गतिमतां च स
मासो वक्तव्यः अनुव्यचलत् अनुप्राविश
त् यत्परिपतति उपपदमतिङ् तिङ्किमर्थं
कारको व्रजति हारको व्रजति अतिङीति
शाकमेव कं कस्मात् व्रजति कारको व्र
जति हारको व्रजति स्कपसपतिवर्तते अ
नन्तरं पठति उपपदमतिङ् तिनर्थोऽप्र
तिषेधः उपपदमतिङ् तिनर्थस्याप्र
तिषेधो वक्तव्यः कस्मातिङर्थस्यकाः प्र

नस्विद्रर्थः क्रियाक्रियाप्रतिषेधो वा प्र
थवा वाक्यमेव पठितव्यमुपपदमक्रिये
ति यथा क्रियेति किं प्रत्युदाह्रियते का
रको गतः कारको यातः नैतत्क्रियावा
चि किं तर्हि द्रव्यवाचि इदं तर्हि कारक
स्यागतिः कारकयुक्ता एतदपि द्रव्यवा
चि कथं कृदभिहितो भाववद्द्रव्यवद्भवतीति
एवं तर्हि सिद्धे सति यदतिङिति प्रतिषे
धं शास्ति तज्ज्ञापयत्याचार्यः अन्यत्रापि
गत्योर्निमित्तकरस्वरूपेति किमेतस्य ज्ञा
पने प्रयोजनं गतिकारकोपपदानां कृ
द्भिः सह समासो भवतीत्येषा परिभाषा न क
र्त्तव्या भवति एतज्ज्ञाप्यते केन इदानीं समा
सो भविष्यति समर्थेन यथैव तावदुपसर्गे
णापि समासः प्राप्नोति स्वैश्चात्तदुपसर्गे
णाप्रयुज्यमानेनाप्यनेन नैष दोषः स्वैश्च
तदुपसर्गेणाप्रयुज्यमानेन प्रत्यासन्नेन नै
ष दोषः स्वैश्चात्प्रत्ययेन प्रयुज्यते पश्चाद
पसर्गेण संज्ञायते क्रियां निवर्तयति नाप्यु
पसर्गो विशिनष्टि अभिनिर्वृत्तस्य चार्थस्यो
पसर्गेण विशेषः शक्योवक्तुं षष्ठीसमा।
सादुपपदसमासो विप्रतिषेधेन षष्ठीसमा

श्री
महाभा
३५१

सादुपपदसमासो भवति विप्रतिषेधेन
षष्ठीसमासस्यावकाशः राज्ञः पुरुषः
राजपुरुषः उपपदसमासस्यावकाशः
स्तम्बेरमः इहोभयं प्राप्नोति कुम्भकारः न
गरकारः उपपदसमासो भवति विप्रति
षेधेन नैषा षष्ठीसमासस्याभावादुपप
दसमासः नैषा प्रतिषेधेन प्रयोजने किं
कारणं षष्ठीसमासस्याभावात् उपपदस
मासो भविष्यति कथं गतिकारकोपपदा।
नां कृद्भिः सह समासवचनात् अथवा वि
भाषा षष्ठीसमासः यदा न षष्ठीसमासस्त
दोपपदसमासो भविष्यति एवं तर्हि यथा
स्यात्तेन मा भूदिति कस्मात्पुनर्विशेषः तेन
वा समर्थेन न वा स हि उपपदसमासो नित्य
समासः षष्ठीसमासः पुनर्विभाषा किं च
नित्यः समासो नित्यसमासो यस्य विग्रहो।
नास्ति नेत्याह नित्याधिकारेऽयं समासः
स नित्यसमासः नेत्याह अव्ययीभाव
स्याधिकारसमासता प्रसज्यते न तस्मान्नित्य
समासो नित्यसमासः यस्य विग्रहो नास्ती।
ति अथ मेवपदकारः किमर्थं नैतदस्ति
सिद्धे विधिनारभ्यमाणो नेणोवकारेति

यमार्थो भविष्यति इष्टतोवधारणार्थेन ल
ङ्सि भविष्यति पंचयथा विज्ञायेत अमे
वाव्ययेनेति मेव विज्ञायिष्यमाव्ययेने
वेति अस्ति वेदानीकश्चिदव्ययशब्दोय
दर्थोविधिः स्यात् अस्तीत्याह् त्वशब्दोऽ
लुगुकूलमिम नैतदस्ति प्रयोजने अन
दैशत्वादत्र समासो भविष्यति इदं तर्हि
प्रयोजनं अमैवयत्तल्पविधानमपय
दैनत्रयथा स्यात् मावान्येन च यत्तल्पवि
धानमपपदे तत्र मा भूदिति अप्रयोजनं
अप्रे भक्त्वा अग्रादिष्वप्रामविधेः समास
प्रतिषेधे चोदयिष्यति सनवक्तव्यो भव
ति शेषोवा शेषइत्युच्यते कः शेषः ये
षां पदानामनुक्तः समासः सशेषः शेष
वचनेपदतश्चैत्राभावात शेषवचनेपद
तश्चैतत्रकिंकारणाभावात नहि शेषेति
पदानि येषां पदानामनुक्तः समासः अथ
तर्हि शेषग्रहणाधिकृत्य अर्थेषु क्तः समा
सः सशेषः अर्थतश्चेदविशिष्ट अर्थतश्च
दविशिष्टमेतद्भवति ऊत्तः परतः नहि स
र्वोपेक्षार्थेषु नक्तः समासः त्रिकत्वर्हि
शेषग्रहणं यसाविकस्मान्नुक्तः समासः

श्री
महा
भा
३५२

सशेषः कस्य चानुक्तः प्रथमायाः ॥ ॥
इति श्रीमद्भगवत्पतंजलिमुनिविरचिते
व्याकरणमहाभाष्ये द्वितीयस्याध्याय
स्य द्वितीयपादे प्रथममाह्निकं ॥ ॥
अनेकमन्यपदार्थे पदग्रहणं किमर्थं
इहानेकमन्यार्थे इतीयत्युच्यमाने वाक्या
र्थेपि बहुव्रीहिः स्यात् यथा समानो न
ग्रामेपितस्मान्नभोइति पदग्रहणे
पुनः क्रियमाणे न दोषो भवति अथान्य
ग्रहणं किमर्थं अनेकं पदार्थे इतीयत्यु
च्यमाने स्वपदार्थेपि बहुव्रीहिः स्यात रा
जपुरुषः तत्पुरुषः इति नैतदस्ति प्रयो
जनं तत्पुरुषः स्वपदार्थे बाधको भविष्य
ति भवेदेकसंज्ञाधिकारे सिद्धं परं कार्यं
त्वेतन्नसिध्यति अथ समासयोग्यत्वात्पुरु
षः पूर्वकार्यत्वाद्बहुव्रीहिः प्राप्नोति पर
कार्यत्वेन च दोषः शेष इति वर्तते अशे
षत्वान्न भविष्यति शेषवचनउक्ते किम
क्तेनशेषवचनादोषः सांख्यातसमाना
धिकरणानञ्समासेषु बहुव्रीहिप्रति
षेध इति अथैकसंज्ञाधिकारेनार्थोन्य
ग्रहणेन एकसंज्ञाधिकारे च प्रक्रिय

मार्गेणान्यग्रहणे यथैव तत्र रूपः स्वपदा
र्थे बहुव्रीहिर्बाधते एवमन्यपदार्थेपि बा
धेत अथानेकग्रहणं किमर्थम् अन्यपदार्थे
इति युच्यमाने एकस्यापि पदस्य बहुव्री
हिः स्यात् सर्पिषोपि स्यात् मधुनोपि स्या
त् गोमात्रस्यापि स्यात् नैतदस्ति प्रयोजन
म् स्वपदार्थे पि वर्तते इदं तर्हि प्रयोजनम् बहू
नामपि समासो यथा स्यात् सुसूक्ष्मज
टकेशेन सुनताजिनवाससा इतरार्थे चा
नेकग्रहणं कर्तव्यम् चार्थे द्वन्द्वो नेकमितीहा
पि यथा स्यात् प्लक्षन्यग्रोधखदिरप
लाशा इति एतदपि नास्ति प्रयोजनम् आचा
र्यप्रवृत्तिर्ज्ञापयति बहूनामपि समासो भ
वतीति यदयमुत्तरपदे द्विगुं शास्ति तत्र
रूपापि बहूनां नहि ग्रामो निग्रहणेन तत्र
रूप उच्यते नेन बहूनां न भविष्यति तत्र
रूपापि बहूनां नहि वचनमुपसर्जनार्थ
म् अनेकग्रहणं क्रियते उपसर्जनसंज्ञा
र्थम् प्रथमानिर्दिष्टं समास उपसर्जन
मित्युपसर्जनसंज्ञा यथा स्यात् चित्रगुः श
बलगुरिति नैकविभक्तित्वात् न वैत
दपि प्रयोजनमस्ति किं कारणम् एक

श्री॰
महा॰
भा॰
३५३

विभक्तित्वात् एकविभक्ति चापूर्वनिपा
ते इत्युपसर्जनसंज्ञा भविष्यति चित्रगुः श
बलगुः चित्रा अस्य गावः चित्रगुस्तिष्ठति
चित्रा अस्य गावः चित्रगुं पश्य चित्रा अस्य
गावः चित्रगुना कृतम् चित्रा अस्य गावः
चित्रगवे देहि चित्रा अस्य गावः चित्रगोरा
नय चित्रा अस्य गावः चित्रगोः स्वम् चि
त्रा अस्य गावः चित्रगौ निधेहि चित्रा अ
स्य गावः चित्रगो यदि तर्हि यत्र कुतश्चिदे
व किंचिदस्यास्त्येव विभक्त्या योगः
क्रियते तदेकविभक्तियुक्तं भवति इ
हापि प्राप्नोति राजकुमारीत्यत्र कुमारीति
राज्ञो या कुमारी राजकुमारी तिष्ठते राज्ञो
या कुमारी राजकुमारीं पश्य एवं राजकुमा
र्या कृतं राजकुमार्यै देहि राजकुमार्या आ
नय राजकुमार्याः स्वं राजकुमार्यां निधे
हि राज्ञो या कुमारी राजकुमारीति एक
विभक्तियुक्तमेव यन्नियमः न चैतन्नियमे
कविभक्तियुक्तमेव राज्ञः कुमारीं पश्य रा
ज्ञः कुमार्यां पश्यतापि भवति किं वक्तव्य
मेतत् न हि कथमनुच्यमानं गम्यते एक
ग्रहणसामर्थ्यात् यदि हि यदेकविभक्ति

गुणं च यस्माद्विभक्तियुक्तमह एवं निपातः
स्व वक्तव्यात् पदार्थाभिधानेनुप्रयोगात्
उपपत्तिरभिहितत्वात् पदार्थाभिधाने
नुप्रयोगस्यानुपपत्तिरभिहितत्वात् पदा
र्थाभिधानेनुप्रयोगस्यानुपपत्तिः विग्र
हे देवदत्त इति किं कारणम् अभिहितत्वा
त् विग्रहवाक्येनाभिहितः सोर्थ इति कृत्वा
नुप्रयोगो न प्राप्नोति न चानभिहितत्वा
त् नैव दोषः किं कारणम् अनभिहि
तत्वात् विग्रहवाक्येनानभिहितः सोर्थ इ
ति कृत्वानुप्रयोगो भविष्यति कथमनभि
हितः यावेतदानीं प्रवाक्ये पदार्थाभिधा
नेनुप्रयोगानुपपत्तिरभिहितत्वादिति
सामान्याभिधाने हि विशेषानभिधानम्
सामान्येनाभिधीयमाने विशेषानभिहि
तो भवति तत्रावश्यं विशेषार्थिना विशे
षानुप्रयोक्तव्यः विग्रहः कः देवदत्त इति भ
वति सिद्धम् यदा सामान्ये वृत्ति यदा तु केवल
विशेषे वृत्तिस्तदा न सिध्यति विग्रहगावो
देवदत्तस्य तदपि सिद्धम् कथं येनेतरं भय
प्रवापद्वति वाक्यं च समासश्च यदा वाक्य
न तदा समासः यदा समासः सामान्येन त

श्री
महा
भा
३५४

दा वृत्तिः तत्रावश्यं विशेषार्थिना विशे
षोनुप्रयोक्तव्यः विग्रहः को देवदत्त इति
सामान्यस्यैव तर्ह्यनुप्रयोगो न प्राप्नोति
विग्रह विग्रह किं विग्रहस्यैवमिति सामा
न्यमपि यथा विशेषस्य हि विग्रह विग्रहको
संदेहः स्यात् सर्वथा विशेषे तत्रावश्यं
विशेषार्थिना विशेषानुप्रयोक्तव्यः अ
थवा विभक्त्यर्थाभिधीयते यत्तावदुच्य
ते यद्विभक्त्यर्थाभिधीयते अथ हि स
र्वेषामेव वृत्तेर्ने विभक्त्यर्थाभिधाने द
ष्टव्यलिंगसंख्योपचारानुपपत्तिः वि
भक्त्यर्थाभिधाने द्रव्यस्य लिंगसंख्याभ्या
मुपचारो नोपपद्यते बहुयवम् बहुयवः
बहुयवौ बहुयवा इति अपरस्याह विभ
क्त्यर्थाभिधाने द्रव्यस्य लिंगसंख्याभ्या
विभक्त्यर्थे उपचारोनुपपन्नः बहुयवं व
हुयवा बहुयवः बहुयवौ बहुयवा इति क
थं यत्र यस्य लिंगसंख्याभ्यामन्यस्योपचारः
स्यात् सिद्धं तु यथा गुणवचनेषु सिद्धम्
तत् कथं यथा गुणवचनेषु कथं गुणव
चनेषु के गुणवचनानां हि शब्दानामा
श्रयतो लिंगवचनानि भवन्तीति तद्यथा शु

केवलं शुक्ला शाटी शुक्लः कंवलश्च
कौ केवलौ शुक्लाः कंवला इति यदसौ
द्वन्द्वोश्रितो भवति तदा तस्य पुंलिंगव
चनेन चनपुंसकस्यापि भवति एवमिहा
पि यदसौ द्वन्द्वोश्रितो भवति विभक्त्यर्थे
तस्य पुंलिंगवचनेन चनत्समासस्यापि प
दितं हि विभक्त्यर्थोभिधीयते कृत्स्नः प
दार्थः कथमभिहितो भवति सङ्ख्यास
लिंगः समासश्च पूर्वार्थग्रहणमासमर्थ्यान
द्वन्द्वानेकमन्यपरइतीयतामिदं कथंच
नः परेवामहति स्यात् शाटे शेषः शाटे
भवा सर्वार्थकार्यविज्ञास्यते सोयमेवं सि
द्धे सति यस्त्थग्रहणं करोति तस्यैतत्प्रयो
जनं कृत्स्नः पदार्थोभिधीयते सङ्ख्यास
लिंगः संसमास्यश्चेति यदि तर्हि कृत्स्नः प
दार्थोभिधीयते लैंगाः सांख्याश्च विधयो
न सिध्यन्ति उक्तं वा किमुक्तं लैंगास्तावद्
उक्तं सिद्धास्त्वियः प्रातिपदिकविशेष
णत्वात् स्वार्थे टावादय इति सांख्यश्च
क्त कर्मादीनामनुक्तत्वादय इति
कृत्वा संख्याभविष्यति प्रथमा न हि न
प्राप्नोति समर्थानात् भविष्यति यदि साम

श्री
महा
भा
३५५

र्थिकीन्तनियोगतः प्रथमा कस्मान्न
भवति कर्मादीनामभावात् षष्ठी तर्हि
प्राप्नोति शेषलक्षणा षष्ठी अशेषत्वा
न्न भविष्यति एवमपि व्यतिकरः प्राप्नो
ति एकस्मिन्नपि द्विवचनबहुवचने प्रा
प्नुतः द्वयोरप्येकवचनबहुवचने बहु
ष्वपि द्विवचनैकवचने अर्थतो व्यवस्था
भविष्यति अथवा संख्यानामेयं परस
थानां संख्येयमनया विशेष्य यदि द्वा
बध्यमानस्यात् संख्येयमविशेषितं
स्यात् अथवावयवातिलचवचनग्रहणा
त्प्रयोजनं उक्तं एकत्वादिषु प्रथ
मा यथा स्यात् एवमपि षष्ठी प्राप्नोति किं
कारणं व्यभिचरत्येव हि लिंगसंख्येसमा
म षष्ठ्यर्थं यत् अभिचरति अभिहितः
सोर्थोन्तर्भूतः प्रातिपदिकार्थः संपन्नः
तत्र प्रातिपदिकार्थे प्रथमेति प्रथमा भ
विष्यति न तर्हीदानीमिदं भवति चित्र
गोर्देवदत्तस्येति भवति वाक्यमध्यमप
क्ष्य षष्ठी अभिगणानेकत्वेन बहुव्रीहिः स
मानाधिकरणानां समानाधिकरणाना
बहुव्रीहिर्वक्तव्यः किं प्रयोजनं व्यधिकर

णानां समानाधिकरणानां बहुव्रीहिर्व
क्तव्यः किंप्रयोजनं व्यधिकरणानां मा भू
दिति पंचभिर्भुक्तमस्येति अव्ययानां च
अव्ययानां च बहुव्रीहिर्वक्तव्यः उच्चैर्मुखः
नीचैर्मुखः सप्तम्युपमानपूर्वपदस्योत्तरपद
लोपश्च सप्तम्युपमानपूर्वस्य बहुव्रीहि
र्वक्तव्यः उत्तरपदस्य च लोपो वक्तव्यः कंठे
स्थः कालः अस्य कंठेकालः उष्ट्रमुखमिव
मुखमस्य उष्ट्रमुखः खरमुखः समुदाय
विकारषष्ठ्याश्च समुदायविकारषष्ठ्याश्च
बहुव्रीहिर्वक्तव्यः उत्तरपदस्य च लोपो व
क्तव्यः केशसंहारश्चूडास्य केशचूडः सु
वर्णविकारोलंकारोस्य सुवर्णालंकारः प्रा
दिभ्यो धातुजस्य वा प्रादिभ्यो धातुजस्य ब
हुव्रीहिर्वक्तव्यः उत्तरपदस्य च वा लोपो भवती
ति वक्तव्यं प्रपतितपर्णः प्रपर्णः प्रपतित
पलाशः प्रपलाशः नञोस्त्यर्थानां नञोस्त्य
र्थानां बहुव्रीहिर्वक्तव्यः उत्तरपदस्य च वा
लोपो वक्तव्यः अविद्यमानपुत्रः अपुत्रः अ
विद्यमानभार्यः अभार्यः तत्तर्हि वक्तव्यं
नवा अनभिधानादसमानाधिकरणेषु सं
भावः नवा वक्तव्यः समानाधिकरणानां

श्री
महा
भा
३५८

बहुव्रीहिः कस्माच्च भवति अनभिधाना
त् तद्वदयमनभिधाने भवितव्यं क्रिय
माणेपि परिगणने यत्रानभिधानं भवति
न तत्र बहुव्रीहिः तद्यथा पंचभुक्तमस्येति
अथ तस्मिन्सत्यनभिधाने यदिह तिपरिग
णनं क्रियते तद्धि परिगणनमपि कर्त्तव्यं
न कर्त्तव्यं अर्थनियमे मत्वर्थग्रहणं
कर्त्तव्यं मत्वर्थे यः स बहुव्रीहिरिति वक्त
व्यः तथा चानेकस्य वचनार्थः एव च कृतो
नेकस्य योगस्य वचनार्थ उपपन्नो भवति
केचित्तावदाहुः यद्गलिस्वरति संख्या
याव्ययासन्नादूराधिकसंख्याः संख्येय
इति अपर आहुः यद्धातिकरतिकर्म
प्रवचनेनाप्यसमाप्याः कर्मप्रवचनेना
प्यसमाप्या बहुव्रीहिर्वक्तव्यः ऊढरथो
येन ऊढरथोनड्वान् उपहृतः पशुः रु
द्राय उपहृतपशू रुद्रः उद्धृत ओदनो स्याः
स्थाल्याः उद्धृतोदना स्थाली यदि कर्मप्र
वचनेनेष्यते अथ कर्तृवचनेन कथं
प्राप्तमुदको ग्रामं प्राप्तोदको ग्रामः आग
ता अतिथयो ग्रामं आगतातिथिर्ग्रामः
कर्तृवचनेनापीति वक्तव्यं अप्रथमायां

इति किमर्थं हृष्टदेवगतः प्रथमाप्रथमा
याश्चप्रयमाने इत्येकस्मान्न भवति हृष्ट
देवगतनयश्यति वहिरंगाप्रथमा स्व
यिकारेति तीयाद्विवचने स्वयिकार
स्तितीयोरेत्युपसंख्यानकर्तव्य प्रतिती
याश्चात्मणौ ततहिवक्तव्य नवाव्ययत्वा
त् नवावक्तव्य किंकारणं अव्ययत्वान्न प्र
याये मेघात्तिशब्दः नेषात्लटकथम
व्ययत्वं उपसर्गविभक्तिस्वरप्रतिरूपका
श्चनिपाता भवन्तीति निपातसंज्ञा निपा
तो व्ययमित्यव्ययसंज्ञा किंसब्रह्मचारी
तिकोयंसमासः बहुव्रीहिरित्याह कोस्य
विग्रहः केसब्रह्मचारिणोस्येति यद्येवक
ट इति प्रतिवचनं नोपपद्यते नह्यन्यत्
पृष्टेनान्यदाख्येयं एवं तर्हि विग्रहः करि
ष्यते केषां सब्रह्मचारी किंसब्रह्मचारीति
प्रतिवचनं चैव हि नोपपद्यते स्वरेप्यदोषो
भवति किंसब्रह्मचारीति स्वरः प्रसज्येत
किंसब्रह्मचारीति चेष्यते एवं तर्हि एवं वि
ग्रहः करिष्यति कः सब्रह्मचारी किंसब्र
ह्मचारीति भवेत्प्रतिवचनं नासोपपन्नः स्वरे
वदोषो भवति एवं तर्ह्येवं विग्रहः करिष्य

श्री
महा
भा

३५०

ते कः सब्रह्मचारी तव किं किंसब्रह्मचारी
त्वमिति अथवा पुनरस्त्वयमेव विग्रहः
केसब्रह्मचारिणोस्येति ननु चोक्तं कठ
इति प्रतिवचनं नोपपद्यते इति नैष दोषः
अशोकवणिन्याय्येन भविष्यति तद्यथा क
श्चिदाह अशोकवाणीति एकश्चाह उ
विति कर्तव्यं तत्र तेकर्णाप्यन्तत्रानभव
ति कश्चिदाहाशोकविष्यत्रापर आह कि
नामेति कर्मणा तत्राते कर्ताप्यन्तत्रानभ
वति यदि वा कलापिके सब्रह्मचारिणोस्येति
कठस्यकेसब्रह्मचारिणे त्वयाते यमपिकठ
इति एवं कठस्य केसब्रह्मचारिण इत्याह तद्येषा
न्त्वेनेनापि कठ इति नाथत्वपि तेसमासेन
शक्यः प्रतिनिर्देष्टुं उपसर्जनेन हि न भव
ति अर्थत्तीया इति कोयं समासः बहुव्री
हिरित्याह कोस्य विग्रहः अर्धं तृतीयमेषा
मिति कः समासार्थः समासार्थो नोपपद्य
ते अन्यपदार्थो नाम भवति यद्यपरानो
समासः तेनान्यपदार्थः अन्यपदार्थः
एवं तर्ह्येवं विग्रहः करिष्यते अर्धं तृती
यमनयोरिति कः षष्ठ्यर्थः षष्ठ्यर्थो नोप
पद्यते किंचिदपायो भवति अर्धतृती

यमेव विग्रहः अर्धं तृतीयमेषामिति न
त्वचोक्तसमासार्थो नोपपद्यत इति नैष दो
षः अवयवेन विग्रहः समुदायः समासा
र्थः यद्यवयवेन विग्रहः समुदायः समासा
र्थः अर्धतृतीयान समासार्थः पाउस्वं सकर्ष
णा द्वितीयायामवलेक्तस्यावयवो द्वयो
द्विवचनमिति द्विवचनं प्राप्नोति अस्तु तर्हि
यमेव विग्रहः अर्धं तृतीयमनयोरिति न
त्वचोक्ते षष्ठ्यर्थो नोपपद्यत इति नैष दो
षः इदं तावदयं प्रष्टव्यः अथेह देवदत्त
स्य भ्रातेति कः षष्ठ्यर्थः न चैतस्यादेकस्मा
त्प्रादुर्भाव इति न च वाते नैषयासार्थिका
नामेकप्रतिश्रयउषितानां याम् तस्यापवि
प्रतिष्ठमानानामनेकश्चित्ररसत्वमभिस
म्बन्धो भवति एवं तावीयकश्चान्तवेनाम
अवयवेषु क्तः षष्ठ्यर्थो इदं तेद्धापित्थको
दृश्यते इह तर्हि अर्धतृतीया द्रुतीयेनामि
त्यर्थस्यानयनेन प्राप्नोति अस्तु तर्हि यमेव
विग्रहः अर्धं तृतीयमेषामिति न त्वचोक्त
मस्यावितीयानसमासार्थः पाउवस्कर्षणाद्वि
तीयमावलेक्तस्यावयवो इति द्वयोर्द्वि
वचनमिति द्विवचनं प्राप्नोति नैष दोषः

श्री
महा
भा
३५८

अर्धं तृतीयानः प्राप्नोत्येकवचनं अस्ति
सहायवाचीनयः सहायवाची तस्येदं
ग्रहणं अस्ति द्वितीयास्ति सहाय इति
गम्यते एवमप्येकवचनं प्राप्नोति एका
र्था हि समुदाया भवन्ति तद्यथा शतं यू
थं वनमिति अस्तु तर्हि यमेव विग्रहः अ
र्धं तृतीयमनयोरिति न त्वचोक्तमर्धतृ
तीया प्राप्नोतीयेनामित्यर्थस्यानयनेन प्रा
प्नोति नैष दोषः भवति वै बहुभ्योऽपि प्र
णस्य विज्ञानमपीति तद्यथा शक्लेवास
ससमानयः लोहितोष्णीषाः प्रचरन्तीति
तद्गुणाद्द्वितीयेन तद्गुणाः प्रचरन्ति अथ
वा उक्तं तर्हि यमेव विग्रहः अर्धं तृतीयमे
षामिति न त्वचोक्तमेकवचनं प्राप्नोति नैष
दोषः सर्वामामेयपरप्रधाना सर्वेऽयम
न्यो विशेष्यः यदि चात्रैकवचनं स्यात्तस्य
यमविशेषितं स्यात् इह तर्हि अर्धतृतीया
द्रोणा इति अवयवसमुदायप्रवृत्तः अवय
वेनोपपद्यते नैष दोषः समुदायेष्वपि हि
प्रवृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते तद्य
था पूर्वे पञ्चालाः उत्तरे पञ्चालाः तैलं भु
क्तं घृतं भुक्तं शुक्लो नीलः कृष्ण इति प

वमर्थं समस्यते शोणाशाः प्रवृत्तो वय्येव
पिवर्तते यथायमत्र समस्यते न व्यभि
चरति कथन्न व्यभिचरति अर्थग्रहणात्
णे अर्थात् के उत्तमभिचरति संख्येया
दिशाः दिच्चत्वार इति कोयं समासः बहुव्री
हिरित्याह कोस्य विग्रहः द्वौ वा त्रयो वेति
भवेयुर्बहूनामानयनेन तदा बहुवच
नमुपपन्नं यदा तु केवलौ द्वावानीयेते
तदा न सिध्यति तथापि सिद्धं कथम् केचि
त्तावदाहुः अविज्ञातत्वे बहुवचनं प्रयो
क्तव्यमिति तद्यथा कति भवन्तः अत्राः का
ति भवन्तो भावा इति अपरस्त्वाहुः द्वे वा
के त्रयो वेति गम्यते यथा त्वं के द्वौ वेति ग
म्यते सेषायं वापि शतावाचनत् तत्र उक्ते
बहुवचनं द्विदशाः त्रिदशा इति संख्या
समासस्य जनतना संख्याप्रसिद्धिः संख्यास
मासस्य जनतना संख्येयप्रसिद्धिः नहि स्व
जनासंख्यास्ति एवं तर्हि एवं विग्रहः कोऽय
ते द्वौ दशा त्रीन्द्विदशाः इति एवमप्युक्ता
र्तनता संख्येयप्रसिद्धिः तद्वकारणात्तास
ङ्ख्यास्ति प्रस्तत्र एवं विग्रहः द्विदशा
द्विदशा इति तर्हि के संख्या समासस्तेन

तन्नासंख्या प्रसिद्धिरिति नवा स्वजेन
त्वात् नैवयदोषः किंकारणं अस्वजे
नत्वात् स्वजे तेनोच्यते तेन चाय स्वयप
श्यामः किंपुनः कारणं अभिहितार्थ
त्वात् अभिहितः स्वजर्थः समासेनेति
कृत्वा समासे स्वजन्न भविष्यति किंच
भोः स्वजर्थ इति वा समास उच्यते तेन
केवल स्वजर्थ इति समसितुच्यते गम्य
ते स्वजर्थः कथं यावता संख्या संख्ये
याम संख्यायते सक्रियावाह्यर्थस्य च
उक्तः समासेनेति कृत्वा स्वजन्न भविष्यति
अधिकाः संख्या न्यपदः संख्येयवाभिधा
यित्वात् अधिकाः संख्यान्यपदार्थबहुव्री
हिः किंकारणं संख्येयवाभिधायित्वा
त् संख्येयवार्थस्याभिधीयते तथा स्वद
र्थ इत्येवं सिद्धं भवेत्सिद्धमपिविंशाः अ
धिकविंशा इति यत्र तद्विचार्यते विंशा
त्या दशा शात्यवास्य परिमाणं नेवेति
इदं तन्न सिध्यति अधिकदशा इति यत्र
निपातनः संख्या संख्येय पवर्तते उ
पदशा इति कोयं समासः बहुव्रीहिरि
त्याह कोस्य विग्रहः दशानां समीपे उप

दषाइति कस्य पुनः सामीप्यमर्थः तत्प
स्यापैवं तत्पदार्थो भवति तत्रप्रथ
मानिर्दिष्टसंख्योपग्रहणाशक्यमकर्तुं म
न्वर्थवार्थैव विधानात् अथवामन्वर्थग्र
वियोगः प्रमत्वार्थीयमारंभः कथमभावा
र्थेऽप्यथवाकस्माभूदिति दिङ्नामादिक्
समासग्रहणोपयोगोऽन्तरालप्रधानाभि
धानाभिधानात् दिक्समासस्योपयोग
योऽस्याशिष्यावद्बहुव्रीहिः कथं तत्र शाल
प्रधानाभिधानात् दिक्समासे महयो
गे चान्तराले प्रधानं चाभिधीयते तत्राम्य
पदार्थश्चैव सिद्धं यथैव दक्षिणश्चैवादि
क् समानाधिकरणलक्षणः पुंवद्भावेन
प्राप्नोति अथ पुनरियमेव दक्षिणामेव
स्यैवेति कृत्वा समानाधिकरणलक्षणः
पुंवद्भावः सिद्धो भवति तत्किं न्यायि भाषि
तपुंस्कस्य पुंवद्भावः नचैते भाषितपुंस्के
तत्वच योः दक्षिणाशब्दस्य स्त्रीशब्दस्य पुं
क्तिभाष्यते समानायामाकृतौ यद्भाषित
पुंस्कं प्राकृतं पुंस्तरे वैते भाषितपुंस्काद।
क्षिणा स्त्रैवेति दिक्शब्दो दक्षिणाः सर्वत्र।
तिवाव्यवस्याशब्दो यदि पुनरदिक्शब्दान्यपि

श्रीं
महा
भा
३५०

व्यवस्थाशब्दाः स्युः कथं यानि दिगुपदि
ष्टानि कार्याणि यदा दिशो व्यवस्थावद्वा
ति यदि दिग्ग्रहणं दिशि वर्तते समासदिक्
शब्दः रमणीयादिषु इति प्रसंगो भवति र
मणीयादिक् शोभनादिक् अथ मतमे
तत् दिशि दृष्टः दिग्दृष्टः दिग्दृष्टः शब्दो
दिक्शब्दः दिशा योऽन्यमिचरतीति रम
णीयादिषु इति प्रसंगो न भवतीति पुंव
द्भावस्तर्हि न प्राप्नोति एवं च कृत्वा दिक्स
मासग्रहणार्थोऽन्तरालप्रधानाभिधाना
दित्येव ननु चोक्तं दक्षिणश्चैवादिक् समा
नाधिकरणलक्षणः पुंवद्भावेन प्राप्नोती
तिनेष दोषः सर्वनाम्नो वृत्तिमात्रे पुंवद्भा
किं नु परिहृते अथवा मतमर्थे सर्वो योगः प्र
त्वार्थीयमारंभः कथमार्थेता अथवाकस्मा
न्माभूदिति तत्र तिनेऽन्तरालसमासे तेषु।
क्रियाभिधानात् तत्रोपासमासे तेषु वाधि
धावद्बहुव्रीहिः किंकारणं क्रियाभिधाना
त् क्रियाभिधीयते तत्राम्यपदार्थश्चेति।
सिद्धं नैवं कोऽपि प्रतिषिध्यार्थः तत्रापि
शिष्यः किंकारणं एकशेषप्रतिषिध्यार्थं
मिदं वक्तव्यं पूर्वदीर्घोत्त्वचपूर्वदीर्घोत्त्वे

देवदत्तस्यकेशाःकेशिस्यादेवदत्तप्रयोजनं
यस्ययस्यनियोगतोनेनैवदीर्घत्वे
स्यात् अथेदानीमनेषामपिदर्शयत्
इतिदीर्घत्वेनप्रयोजनंभवतिमत्वर्थी
वाद्देवोयोगःअमनार्थीयमारंभःकव
भावार्थेवा अथवाकस्मान्नभूदिति वा
र्येहेहःवार्थेर्थेस्मन्याने तत्राप्ययं न
चक्षुमासमत्वपराने पादेवाषष्ट्ययम
तायासमासाभिधेयबहुलिंगवचनानि
भवंतीति यत्तदिष्टार्थाभिधायेन ननम
लिंगसंख्याभ्यांयोगोस्ति नेदेवाचनिक
मलिंगमासंख्यतावाकिंतर्हिस्वाभाविक
मेतत् तद्यथा समानमीहमानानांचाधी
यमानानांचकेचिदर्थैर्युज्यन्तेपरेन न
चेदानींकश्चिदर्थवानितियत्नः सर्वैरर्थवद्भि
र्भाव्यंभवितव्यं कश्चिदानर्थकइति सर्वैर
नर्थकैः तत्रकिमस्माभिःशक्यंकर्तुं य
त्प्राक्समासाल्लिंगसंख्याभ्यांयोगोना
स्तिसमासश्चभवति स्वाभाविकमेतत्त प्र
चवाद्यपेतालिंगवचनानिभविष्यंति त
द्यथा शुक्लंवस्त्रं शुक्लाशाटी शुक्लः कं
बलः शुक्लौकंबलौ शुक्लाः कंबलाः इति

यच्छौरुक्ष्याश्रितोभवति गुणस्तस्यापि लिं
गवचनेचतत्समासस्यापिभविष्यति
अथेहकस्मान्नभवति याज्ञिकस्याय
वैयाकरणस्य कठस्याध्वर्यकवस्य उ।
क्थिकस्याध्येमीमांसकस्येतिशेषइतिव
र्तते अशेषत्वान्नभवति यदिशेषइतिनि
वर्तते अशेषत्वान्नभवति यदिशेषइ
तिवर्तते उपास्ताप्तेस्यलसिकंतत्रलो
मानांमहाहृदे द्रोणांचदशकांडानांमांसा
नामाहृत्वाकृतात्कृतेशेषत्वसिध्यति
नैषदोषः अभाद्रिकृतमनपदकृते वार्थेदं
हवचनेसमासेपिचार्थःसंपादनिरूप
सेगः चार्थेचसमासेहहवचनेचार्थेस
प्रत्यपादनिरूपोमोति अहहहनेयमा
नोगामश्वंपुरुषंपशुं देवदत्तोनह्यां।
तिस्थानयायावरसिद्धिः इत्याश्वावरुणाभ्यां
अग्नादिभ्यइति सिद्धेत्तगुणपदप्रधिकरणाव
चनेद्वंद्वोभवतीति वक्ष्ये तत्पुंवद्भाव
प्रतिषेधः तत्पुंवद्भावप्रतिषेधोवक्तव्यः
पचिसैघ्रोसमानाधिकरणलक्षणःपुंव
द्भावःप्राप्नोति प्रतिषिद्धेत्वचान्यपदार्थःवि
प्रतिषिद्धेचगुणपदप्रधिकरणतयाः न

पपत्तिः शीतोष्णे स्वर्वहूर्षेव नननमशो
किंकारणं स्वस्वप्रतिघातेन हि स्वःस्वेरुः
स्वप्रतिघातेन नवस्तावे यत्तावदुच्यते न
न्नवेव ज्ञापकप्रतिषेध इति इदं तावदयुक्तं
वः प्रयेह कस्मान्न भवति दर्शितोयाभा
ता प्रथमतमेतन्न सकलसमासायात्रासा
मानाधिकरणमिति नैषदोषो भवति य
दप्युच्यते विप्रतिषिद्धेषु चानुपपत्तिरिति
सर्वएव शब्दा विप्रतिषिद्धाः इहापि तर्हि न स्यात् ।
न्यग्रोधाविति प्लक्षशब्दः प्रयुज्यमानः प्ल
क्षार्थं संप्रत्याययति न्यग्रोधार्थं निवर्तय
ति न्यग्रोधशब्दः प्रयुज्यमानो न्यग्रोधार्थं
संप्रत्याययति प्लक्षार्थं निवर्तयति युग
पत्प्रयुक्ता युगपदधिकरणवचनता इष्यते
इहापि प्रयुक्ता इष्यते एवमपि शब्दपौर्वा
पर्यप्रयोगादर्थपौर्वापर्याभिधानं प्राप्नोति
अतः किम् युगपदधिकरणवचनतायाम
नुपपत्तिः प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा इति
यथैव हि शब्दानां पौर्वापर्येण हृदयस्थानामा
पि भवितव्यं शब्दपौर्वापर्यप्रयोगादर्थपौ
र्वापर्याभिधानमिति चेद् द्विवचनबहुवच
नयोरनुपपत्तिः प्लक्षन्यग्रोधौ प्लक्षन्यग्रोधा

श्री
महा
भा
३५२

इति प्लक्षशब्दः सार्थको निवृत्तः न्यग्रोध
शब्दोऽपि तः एकार्थवाच्यः तस्यैकार्थत्वादे
कवचनमेव प्राप्नोति विग्रहे च युगपद्व
चनाभावे युगपद्वचनस्याविवक्षापि युगप
दधिकरणवचनता दृश्यते द्यावा ह क्षामा
द्यावा चिदस्मै पृथिवी नमेते इति किमत्र
त युगपदधिकरणवचनताया उपोद्बल
के विग्रहे किल नाम युगपदधिकरणव
चनता स्यात् किं पुनः समासे समुदायान्निर्दि
ष्टे समुदाये अस्ति नेतत् अथ किं समुदाया
न्निर्दिष्टमिति द्विवचनबहुवचनप्रसिद्धिः
दिता तस्याः परिहारः समुदायान्निर्दिष्टमिति
चित्रे कार्यं तस्मात् समुदायस्य समुदायान्नि
र्दिष्टमिति चेत् तत्र किं कारणं एकार्थत्वा
त्समुदायस्य एकार्थो हि समुदायो भवति
तद्यथा शतं यूथं वनमिति नैकार्थ्या नाय
मेकार्थः किं तर्हि द्व्यर्थो बह्वर्थश्च प्लक्षोपि
ह्यर्थः न्यग्रोधोपि ह्यर्थः यदि तर्हि प्लक्षन्य
ग्रोधयोरभावेपि द्व्यर्थत्वं तयोरनेकार्थत्वाद्ब
हुवचनप्रसङ्गः तयोरनेकार्थत्वाद्बहुव
हुवचमिति वचनं प्राप्नोति तयोरनेकार्थ
त्वाद्बहुवचनप्रसङ्गः इति चेत् बहुत्वाभावात्

नयोरनेकार्थत्वाद्बहुवचनप्रसंग इति चे
न्। ननु किं कारणं बहुत्वाभावात्। न ब
हुत्वमस्ति किमुच्यते बहुत्वाभावादिति
यदिदानीमेवोक्तलक्षणोपि ह्यार्थायां न्यग्रोधो
पि ह्यर्थ इति यावताम वाचको ह्यर्थस्याभा
मपेक्षापि यद्येवं अन्यवाचकेनान्यस्य वच
नानुपपत्तिः अन्यवाचकेन शब्देनान्यस्य
वचनेनोपपद्यते अन्यवाचकेनान्यस्य
वचनानुपपत्तिरिति चेत् लक्षणस्य न्यग्रो
धत्वान्न्यग्रोधस्य लक्षणत्वान्न शब्दाभिधा
नेन विषयतिलक्षणोपि न्यग्रोधः न्यग्रोधोपि
लक्षणः कथं पुनः लक्षणोपि न्यग्रोधः न्यग्रो
धो लक्षणः स्यात् यावता कारणाद्धि शब्द
निवेशः कारणाद्धि शब्दनिवेश इति
चेत् तुल्यकारणत्वात् सिद्धं यदि तावन्न्यग्र
नीति लक्षणः न्यग्रोधेपि तद्भवति तथा न्य
ग्रोहतीति न्यग्रोधः लक्षणेपि तद्भवति दृ
ष्टेवेदं हि न च न्यग्रोधे लक्षणशब्दो दृश्यते द
र्शनेहन्तिरिति चेत् तस्मिन् भवति लक्षणोपि
न्यग्रोधशब्दो दृश्यते तत्र हि कारणं नैव
पलाके संप्रयोगो भवति न हि लक्षणप्रती
तामिलके न्यग्रोधशब्दानीयते न हि विषयं च

श्री
महा
भा
३५३

न हि विषये चेन इष्यते लक्षणन्यग्रोधत्वे किं
विषये हि विषये प्रयुक्ते पुनर्नियतवि
षयानाम शब्दाः स्युः वादरपुके अन्यत्रा
पि तद्विषयदर्शनात् अन्यत्रापि नियम
विषयाः शब्दाः दृश्यन्ते तद्यथा समान
एकवर्णो गौर्लोहित इति भवत्यश्वः
शोण इति समाने कृष्णवर्णो गौः कृष्ण
इति भवत्यश्वो हेम इति समाने वर्णे शु
क्लो गौः श्वेत इति भवत्यश्वः कर्क इति य
दि तर्हि लक्षणोपि न्यग्रोधः न्यग्रोधोपि ल
क्षणः एकेनोक्तत्वादपरस्य प्रयोगोनुपप
न्न इति चेत् तत्र किं कारणं अनुक्तत्वात्।
न्यग्रोधेन न्यग्रोधस्य अनुक्तः लक्षणेन न्य
ग्रोध इति कृत्वा न्यग्रोधशब्दः प्रयुज्यते क
थमनुक्तः यदिदानीमेवोक्तलक्षणोपि न्यग्रो
धः न्यग्रोधोपि लक्षणः इति सहभूतावन्यो
न्यस्यार्थमाहतुः नैतौ पृथक् कस्मात् किं का
रणं अभिधाने पुनः स्वाभाविकमभिधा
ने अशक्यत्वाद्धि कौचित् लक्षणन्यग्रोधयोरर्थ
मकल्पिकौ कौचित् क्रियागुणौ भवा ल
क्षण इवायं लक्षणः न तत्र तादृशे केसदृष्टः स्या
न् किमिमौ लक्षणाग्राहारिकन्यग्रोधौ ग्रा

होस्वित्लक्षणप्रयोगाविति तत्रसंदेहः
र्थ्योःप्रयोगेद्वन्द्वः प्रसज्यते इध्मप्रव्रश्च
कणावचनता इः खोचक्रपचथश्राय
स्यानिवेधनमक्रेयावाहृद्रमेति तत्रापि
क्रोदसंतत्वस्वपास्वपाभवतीत्येवसिद्धेसू
त्रेचभत्रतेयथाप्रासमेवास्त्वतत्तुचोक्त
चार्थेद्वंद्ववचने समासेपिचार्थसंप्रत्य
यादनिष्टप्रसंगइतिनैषदोषः इहचेद
द्वइत्ययनासिद्धे कथंपुनर्देवासवतिः
स्यात शाद्वोहोषः शाद्वसंभवाद्यैकार्थ
विज्ञास्यतेसायमेवंसिद्धेयदर्थग्रहणं
करोतितस्यैतत्प्रयोजनं यथैवंविज्ञाये
तचकृतेर्थेचार्थ इति कः पुनश्चकृतोर्थः
समुच्चयः अन्वाचयः इतरेतरयोगः समा
हारइति समुच्चयः प्लक्षश्चेत्युक्तेगम्यते
एतन्न्यग्रोधश्चेति अन्वाचयः प्लक्षश्चेत्यु
क्तेगम्यतएतन्न्यापेक्षतोयंप्रयुज्यतेइति इत
रेतरयोगः प्लक्षश्चन्यग्रोधश्चेत्युक्तेगम्यत
एतत् प्लक्षोपिन्यग्रोधसहायः न्यग्रोधो
पिप्लक्षसहायइति समाहारेपिक्रियते
प्लक्षन्यग्रोधमिति तत्रायमप्यर्थः द्वंद्वैक
वद्भावोपिनपठितव्योभवति समाहारे

कत्वात्सिद्धं एकादशद्वादशेतिकोयं
समासः एकादीनांदशादिभिर्द्वंद्वसमा
सः एकादीनांदशादिभिर्द्वंद्वइतिचेत्वि
शत्यादिष्वेकवचनंप्राप्नोति एकविंशतिः
द्वाविंशतिः सिद्धंत्वधिकान्तासंख्यायास
मानाधिकरणाधिकारेधिकलोपश्चेति
द्धमेतत्कथंसमानाधिकरणाधिकारे
वक्तव्यं अधिकान्तासंख्यासंख्ययासमस्यते अ
धिकशब्दस्यचलोपोभवतीतिएकाधि।
काविंशतिःएकविंशतिः द्व्यधिकावि
शतिः द्वाविंशतिः यदिसमानाधिकरणः
स्वरोनसिध्यति यदितत्संख्यायोःसर्वपदप्र
कृतिस्वरंभवतीति इहद्वंद्वेवतत् किं
पुनःकारणं द्वंद्वइत्येवतत् इहमाभूत
शतसहस्राणि अस्तुतर्हिद्वंद्वः नत्वेवा
त्मकमेकादीनांदशादिभिर्द्वंद्वइतिचेद्विंश
त्यादिष्वेकवचनप्रसंगाइति नैषदोषः स
र्वोहिद्वंद्वोविभाषयैकवद्भवति यदात
र्ह्येकवत्तदानपुंसकलिंगं लिंगमशिष्यं
लोकाश्रयत्वाल्लिंगस्य उपसर्जनं द्वंद्वेन
किमर्थमिदमुच्यते उपसर्जनस्यसर्वव
चनपरप्रयोगार्निवृत्त्यर्थं उपसर्जनस्य

पूर्ववचनं क्रियते परस्य प्रयोगो मा भूत्
न वा निष्ठादर्शनात् । नैतत्प्रयोजन
मस्ति । किं कारणं । अनिष्ठादर्शनात् । न
हि किंचिदनिष्टं दृश्यते । नहि कश्चिद्राजपु
रुष इति प्रयोक्तव्ये पुरुषराज इति प्र
युंक्ते यदि चानिष्टं दृश्यते तत्नोपयत्नो हृस्या
प्यथ यत्र दुष्टं दृश्यते कस्मान्नात्र प्राप्तस्य
पूर्वनिपातेन भवति । राज्ञः पुरुषस्य
राजपुरुषस्यानिष्पन्ने यः समासार्थोऽभि
धानस्या पूर्वनिपातः । निष्पन्ने यः
समासार्थोऽभिधानस्य पूर्वनिपातो
न भविष्यति । एवं नचेदसमस्तं भवितु
पसर्जनं सर्वमिति । अर्थोऽप्यभिन्न इति
कृत्वा प्रधानस्य पूर्वनिपातो न भविष्य
ति । अस्त्यन्तरे किमर्थं पुनरिदं निर्देशः तत्रम
उभाहाव । किं चातः । यदि तत्रैतयोर्निय
मो वक्तृषु नियमः तत्र शंखदुंदुभिवीणा
नामिति न सिध्यति । दुंदुभिशंखस्यापि पू
र्वनिपातः प्राप्नोति । अथाविशेषे मृदंगशंख
तूणवाः पृथक् नदन्ति संसदि । प्रासादे धन
पतिरामकेशवानामिति तत्र सिध्यति यथ
कुसितयास्तु अस्त्वविशेषेण । ननु चोक्तं

द्वयोर्नियमो वक्तृषु नियमः इति तत्र शंख
दुंदुभिवीणानामिति न सिध्यति दुंदुभि
शंखस्यापि पूर्वनिपातः प्राप्नोतीति यदे
तदस्त्यन्तरमित्येतद्दृष्टा जिविद्यामि प्र
यावाप्तनरस्त्वाननं ननु चोक्तं मृदंगशंख
तूणवाः पृथक् नदन्ति संसदि प्रासादे ध
नपतिरामकेशवानामिति न सिध्यतीति
अत्रैतेन निर्देशः शंखतूणवयोर्मृदंगेन
समासो वक्तव्यः शंखश्च तूणवश्च शंख
तूणवौ मृदंगश्च शंखतूणवौ चेति वान्ययः
किं पुनरिष्टं साधनमाहोस्वित्कृत इति
किं चातः यदि दृष्टमनेन तस्मात्स्वनाभिहि
तात् पृथग्ग्रहणाद्भवतम्यारभिहितात्
पुत्रो हि सदृशः पुत्रः पुंसि तु किंपु
नः साधनेन्याय्यो गुणारम्भाद कथं ज्ञाय
ते एवं हि कश्चित्कंचित्पृच्छति किं देवदत्तेऽ
ति मन्तव्यानाच्चेष्टं अर्थोऽहर्तृतेति कन
स्मिन्यस्मिन्नतीति महत्तोधिकरणाभू
न्वाप्तिनवाहनाभिसंबध्यमानः कर्तास
माप्यते । इष्टोपतः साधने यत्कर्म कर्मो
यस्मात् यत्करणं करणमेव यदाधिक
रणमधिकरणमेव पुनरिहितवच

न समनर्थके प्रथमाविधानस्यानवका
शत्वात् अनभिहिते वचनमनर्थके
किंकारणम् प्रथमाविधानस्यानवका
शत्वात् अनभिहिते वचनमनर्थकम्
किंकारणमेव प्रथमाविधानस्यानवका
शत्वा अनवकाशा प्रथमा सावचनाद्भवि
ष्यति सावकाशा प्रथमा कोऽवकाशः अ
कारकः वृक्षः प्लक्षः इति अवकाशोऽका
रकमिति चेदस्तिर्भवतीपरः प्रथमाभव
त्यवर्तमानोऽप्यस्ति अवकाशः अकार
कमिति चेन्न अस्तिर्भवतीपरः प्रथमाभव
त्यवर्तमानोऽप्यस्तीति गम्यते वृक्षः प्लक्षः
अस्तीति गम्यते विप्रतिषेधस्तु प्रथमाभा
वः अथवा द्वितीयादयः क्रियन्तां प्रथमे
ति प्रथमा भविष्यति विप्रतिषेधेन द्विती
यादीनामवकाशः कटं करोति भीष्ममु
दारं शोभनं दर्शनीयमिति प्रथमायाः
अवकाशो कारके वृक्षः प्लक्ष इति इ
हैमयं प्रयामोति कृतः कटो भीष्म उदारः
शोभनो दर्शनीय इति प्रथमा भविष्यति
विप्रतिषेधेन नभविष्यति परत्वाद्वितीया
मोति शेषलक्षणा च षष्ठी अशेषत्वात्र

भविष्यति कृत्वयोगात्परं विधाने ष
ष्ठ्यास्तन्निषेधार्थं कृत्वयोगात्परं वि
धाने षष्ठ्याः तन्निषेधार्थं कृत्वयोगा
त्परं विधाने षष्ठ्याः अनकन्निषेधा।
र्थमनभिहिताधिकारः कर्तव्यः कर्तव्यः
कट इति सकृत्कर्तव्यः यद्यकत्वाद
योविभक्त्याद्यो अथ हि कर्मादयोनाम्यो
नभिहिताधिकारेण अनभिहित इति
कर्माणि समयानिकषाहायोगे हूपसं
ख्याने समयानिकषाहायोगे हूपसं
ख्याने कर्तव्यं समयाग्रामं निकषाग्रा
मं हायोगं हादेवदत्तं हायज्ञदत्तं अ
पर आह द्वितीयाविधाने भितः परितः
समयाध्यधियोगे हूपसंख्याने द्विती
याविधाने भितः परितः समयाध्यधि
धियो हूपसंख्याने कर्तव्यं अभितो।
ग्रामं अभितः परितः परितोग्रामं परि
तः समयाः समयाग्रामं समयाग्रध्यधि
अध्यधिग्रामं अध्यधिधियोगाधियज्ञा
लम्समधिमन्दले अपर आह उभसर्वतसो
कार्याधिगुपर्यादिषु त्रिषु द्वितीयाम्रेडि
तोन्तेषु ततोन्यत्रापि दृश्यते उभसर्व

श्री
महा
भा
३५३

श्री
महा
भा
३५०

इभ्येताभ्यांतसन्ताभ्यांद्वितीयावक्तव्या
उभयतोग्रामं सर्वतोग्रामं धिग्जाल्मं
धिग्वृषलं उपर्यादिषुत्रिष्वाम्रेडितेषु
द्वितीयावक्तव्या उपर्युपरिग्रामं अध्य
धिग्रामं अधोधोग्रामं ततोन्यत्रापिदृश्य
ते हादेवदत्तंबुभुक्षितंनप्रतिभातिकिं
चित् तृतीयाकिमर्थमिदमुच्यते तृ
तीयायथास्यात् अथद्वितीयासिद्धा क
र्मणीत्येवतृतीयापिसिद्धाः कथंसुपां
सुपोभवन्तीत्येव अस्मिन्नपितस्मिन्सुपां
सुपोभवन्तीतितृतीयार्थोयमारंभः यथ
वास्याग्निहोत्रंजुहोतीति एवंतर्हितृती
यापिसिद्धा कथंकरणइत्येव अयमग्नि
होत्रशब्दोस्त्येवज्योतिषिवर्तते तद्यथा
अग्निहोत्रंप्रज्वलितमिति अस्तिहविषि
वर्तते तद्यथा अग्निहोत्रंजुहोतीति जु
होतिश्चास्त्येवप्रक्षेपणेवर्तते प्रक्षिपी
णात्यर्थे तत्रयदातावद्यदाग्रशब्दात्तृती
यातदाग्निहोत्रशब्दोज्योतिषिवर्तते जु
होतिश्चप्रीणात्यर्थे यद्यवाग्वाग्निहोत्रं
जुहोत्यग्निंप्रीणाति यदायवागूशब्दा
द्वितीयातदाग्निहोत्रशब्दोहविषिवर्तते

जुहोतिश्चप्रक्षेपणे यद्यवाग्वाग्निहो
त्रंजुहोति हविरग्नौप्रक्षिपति अन्तरा
रेणकस्मान्नभवति कितवाश्चशाले
कायनानामन्तरेणागतेति लक्षण
प्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति अ
थवायद्यपितावदयमन्तरेणशब्द
श्चपचारोनिपातश्चानिपातश्चअयंत
त्वन्तराशब्दः अयंत्वपचारोनिपातए
व तस्यासकोमाद्वितीयः सहायो
भवितुमर्हतीति अन्यदतोनिपातादेवंत
यथास्यगोर्द्वितीयेनार्थइतिगोरन्या
तीयतेनार्थोनगर्दभः अन्तरान्तरेणयुक्ता
नामप्रधानवचनं अन्तरान्तरेणयुक्तानाम
मप्रधानग्रहणंकर्तव्यं अप्रधानेद्विती
याभवतीतिवक्तव्यं अन्तरात्वांचमांच
कमण्डलुः अन्तरेणत्वांचकमण्डलुः क
मण्डलोर्द्वितीयामाभूदिति कःपुनरेताभ्यां
कमण्डलोर्योगः यत्त्वांचमांचान्तरात
कमण्डलुःस्यात् तत्रद्वितीयाकर्तव्या नव
क्तव्या कमण्डलोर्द्वितीयाकस्मान्नभव
ति उपपदविभक्तेःकारकविभक्तिर्ब
लीयसीतिप्रथमाभविष्यति कालाध्व

येनसंयोगेकर्मवत्कार्यतोभवतइति
वक्तव्यं किंप्रयोजनं लाघयर्थंल्लाद्द्भि
रभिहितेनहितोयामाभूदिति आस्य
तेमासः शय्यतेक्रोशः अथवक्तकाणां
किमर्थंस्याद्अयमपियथास्यात्आस्य
तेमासं शय्यतेक्रोशं अकर्मकाणांभा
वेलोभवतीतिभावेलोयथास्यात् न
नहिवक्तव्यं नवक्तव्यं प्राकृतमेवैत
कर्मयथाकटंकरोति शाकटंकरोती
ति एवमस्यापि यत्रकश्चित्क्रियाकृतो
विशेषउपजायते नैवशक्यं इहहिन।
स्यात् आदित्यंपश्यति हिमवंतंशृणोति
ग्रामगच्छति तस्मात्प्राकृतमेवतत्कर्म
यथा कटंकरोतिशकटंकरोतीति य
दितर्हिप्राकृतमेवतत्कर्माकर्मकाणां
भावेलोभवतीतिभावेलोनप्राप्नोतीति
नतर्हिवक्तव्यंनवक्तव्यं अकर्मणामि
त्युच्यते नचकेचित्कालभावाध्वभिर
कर्मकाः नएवंविज्ञास्यामः क्वचिद्ये
कर्मकाइतिअथवायेनकर्मणासकर्म
काश्चाकर्मकाश्चभवंतितेनाकर्मणां
नैवंतेनकर्मणाकश्चिदप्यकर्मकः अथ

वायत्कर्मभवतिचनभवतिचतेनाकर्म
काणां नैवंतेनकर्मकश्चिदपिनभवति
नतर्हीदानीमिदंवक्तव्यं वक्तव्यंच किं
प्रयोजनं येक्रियया तेनसंयोगास्तदर्थे
क्रोशंकुटिलानदीक्रोशंरमणीयेति अ
थवंक्रियापवर्गइतिवक्तव्यं साधनापव
र्गोमाभूत् मासमधीतोनुवाकः नचा
नेनशक्तइति समसौ क्रियामध्यइतिव
क्रियामध्यइतिवक्तव्यं इहापियथास्या
त् अद्यदेवदत्तोभुक्त्वाद्व्यहाद्भोक्ताद्व्य
हेभोक्ताकारकमध्यइतीयत्युच्यमानेइ
हैवस्यात् इहक्रोशायमिध्वासः क्रोशाद्वि
ध्यति क्रोशेविध्यति यत्रविध्यतियत्र
चविध्यत्युभयोस्तत्स्थोभवति नत
र्हिवक्तव्यंनवक्तव्यंतौनेगुणासाधनंक्रि
यायाः प्रवृत्तिः क्रियामध्येचकारकम
ध्यमपिभवति नचकारकमध्यएवसि
द्धं कर्म कर्मप्रवचनीययुक्तेप्रत्यादिभि
स्तुलक्षणादिषूपसंख्यानं कर्मप्रवच
नीययुक्तेप्रत्यादिभिस्तुलक्षणादिषूपसं
ख्यानंकर्त्तव्यं वृक्षंप्रतिविद्योतते साधु
देवदत्तोमातरंप्रति किंप्रयोजनं सप्तमी

पंचम्योः प्रतिषेधार्थं सप्तमीपंचम्यो
माभूतामिति स्याप्रुनिडणपाभ्यासवे
योः सप्तमीपंचम्यपाङ्परिभिरिति पंचमी
तत्राप्यपपर्योः अपतेरित्येतद्वक्तव्यं भ
वति नतर्हिवक्तव्ये नवक्तव्यं उक्तंवाकि
ममक्ते पकेतावड्कर्मप्रवचनीयैरिति इतर।
थापियपितावदयंपरिशाहोऽटरथाप्ता
योवर्जनेनच अपेनावल्लप्पपपपाहोऽटश्रा
पचारोवर्जनेनपव नयथाप्रुस्पगोद्विती
येनार्थइतिषमेवानीयतेनाखोनगर्दभ
इतियस्मात् कथमिदंविज्ञायते यस्मा
स्वयमीश्वरताईश्वरभावः तस्मात्कर्मप्र
वचनीययुक्तादिति आहोस्वित् यस्मा
स्वस्येश्वरस्तस्मात्कर्मप्रवचनीययुक्तादि
ति कश्चात्रविशेषः यस्येश्वरवचनमि
तिकर्तृनिर्देशश्चेद्वचनात्सिद्धं यस्मा
त्स्ववचनमितिकर्मनिर्देशश्चेत्तरेणावच
नात्सिद्धं अधिब्रह्मदत्तेपंचालाः आहृता
स्तेतस्मिन्भवति सप्तम्येवमत्रस्यादपि।
ग्रहीतेऽधिपरिग्रहीप्येतेभवति अथवा
नुपपत्तिस्तु प्रथमातत्रोपपद्यते कुतः
पंचालेभ्यः कान्तर्हिप्राप्तषष्ठीसप्तम्योसा

श्री
महा
भा
३५३

श्री
महा
भा
३५४

मीश्वराधियतीति तत्राधिः पठ्यते यद्य
पिनपठ्यते अधिरीश्वरवाचीतत्रपर्या
यवचनानाङ्ग्रहणं कथंज्ञायेत यद्ये।
कस्यचित्पर्यायवचनस्यग्रहणंकरोति
अधिपतिदायादेति षष्ठीतर्हिप्राप्नोति
शेषलक्षणाषष्ठी अशेषत्वान्नभविष्यति
द्वितीयातर्हिप्राप्नोति कर्मप्रवचनीययु
क्तेद्वितीयेति सप्तम्युक्तत्वात्तस्याभिसंब
धस्याद्वितीयानभविष्यति भवेद्यदायेःप
चालानामभिसंबधः सप्तम्युक्तः स्या
न यत्तुवल्लयैब्रह्मदत्तस्याभिसंबधस्त
चद्वितीयाप्राप्नोति एवंतर्हिस्ववचनात्
सिद्धमधिः स्वकर्मप्रवचनीयसंज्ञोभव
तीतिवक्तव्यं एवमपियदाब्रह्मदत्तोऽधि।
करणंसप्तमीतदा पंचालेभ्योद्वितीयाप्रा
प्नोति उपपदविभक्तेःकारकविभक्तिर्ब
लीयसीतिप्रथमाभविष्यति गत्यर्थक
र्मग्रहणन्नार्थग्रहणं अध्वनार्थग्रहणंकर
व्यं इहमाभूत् पन्थानंगच्छतीति आ।
स्थितप्रतिषेधश्च आस्थितप्रतिषेधश्चव
क्तव्यः योह्यत्रयानंगच्छति पथ्यंगच्छती
तेवेभवतितवा किमर्थंपुनरिदमुच्यते

चतुर्थी यथा स्यात् । अथ द्वितीया सिद्धा
कर्मणीत्येव चतुर्थ्यपि सिद्धा कथं संप्र
दान इत्येव न सिध्यति कर्मणा यमभिप्रैति
स संप्रदानमित्युच्यते क्रियया चायं सोऽयम
भिप्रैति कथं क्रियया गमि क्रियया क्रि
याग्रहणमपि तर्हि चोद्यते चेष्टायामन
ध्वनि स्त्रियं गच्छत्यजां नयतीत्यत्र प्रस
ङ्गः चेष्टायामनध्वनि स्त्रियं गच्छत्यजां
नयतीत्यत्र प्रसङ्गः चेष्टायामनध्व नि
स्त्रियं गच्छत्यजां नयतीत्यत्र प्रसङ्गो भ
वति सिद्धं त्वसंप्राप्तवचनात् सिद्धमेतत्
कथं असंप्राप्ते कर्मणि द्वितीयाचतुर्थ्यौ
भवत इति वक्तव्यं अध्वनस्त्वानपवा
दः एवं च कृत्वा यत्तदुक्तं तत्र वक्तव्यं भव
ति संप्राप्ते येन कर्मण्यध्वानं गच्छतीति
चतुर्थी संप्र चतुर्थीविधाने तादर्थ्य उप
संख्यानं चतुर्थीविधाने तादर्थ्य उप
संख्यानं कर्तव्यं यूपाय दारु कुण्डलाय हि
रण्यमिति किमिदं तादर्थ्यमिति तद
र्थभावस्तादर्थ्यं तादर्थ्येन किं सर्वा
श्चैव चतुर्थ्यन्तस्यार्थशब्देन सह समा
सः कथं चतुर्थीः प्रकृतिनैव यथा यवमि

त्तैमित्ताश्रये भवति केनैतेनाश्रयता
निर्देशेन काले चतुर्थ्या भवितव्यं च
तुर्थ्या च निर्देशः क्रियते तदनेनता
श्रये भवति इतरेतराश्रयाणि च न प्र
कल्पन्ते नैतदस्ति कर्तव्यं न कर्तव्यं आचा
र्यप्रवृत्तिर्ज्ञापयति भवत्यर्थशब्देन स
ह चतुर्थ्या यदयं चतुर्थी तदर्थेति चतु
र्थ्यन्तस्यार्थशब्देन सह समासं शास्ति न
त्वेतदवश्यं चतुर्थ्यन्तस्यार्थशब्देन स
ह समासो भवति किं तर्हि षष्ठ्यन्तस्या
पि तद्यथा गुरोरिदं गुर्वर्थमिति यदिद
मिति यदि तर्हि तादर्थ्ये उपसंख्यानं
क्रियते नार्थः संप्रदानग्रहणेन योऽस्
पाध्यायाय गां ददाति उपाध्यायार्थः स
भवति तत्र तादर्थ्यादेव सिद्धं संप
प्रदानग्रहणं कर्तव्यं यत्नेन संप्रदानस
ज्ञानं दृश्ये श्लाघायहविति श्लाघायस
दितमिति तत्र प्युपसंख्यानं कर्तव्यं श्रा
द्धाय प्रवर्तितो यद्यतिभवति तादर्थ्यं
चतुर्थीति यदयं चतुर्थी तदर्थार्थेति
चतुर्थ्यन्तस्यार्थशब्देन सह समासं शा
स्ति क्लृपि संपद्यमाने क्लृपिसंपद्यमाने

चतुर्थी वक्तव्या मूत्राय कल्पते यवा-
गूः मूत्राय यवाग्वमिति उत्पातेन ज्ञा-
प्यमाने च चतुर्थी वक्तव्या वाताय कपि-
लाय विद्युत् आतपाय चलोहिनी मे-
घोऽन्नाय पर्याहरति वेगा हितयोगे च
हितयोगे चतुर्थी वक्तव्या हितमरोच-
किने हितमामयाविने नमः स्वस्ति स्व-
स्तियोगे चतुर्थी कुशलार्थैराशिषि वा
विधानात् स्वस्तियोगे चतुर्थी कुशला-
र्थैराशिषि वा विधानाद्भवति विप्रतिषे-
धेन स्वस्तियोगे चतुर्थ्या अवकाशः स्व-
स्ति जाल्माय स्वस्ति वृषलाय कुशलार्थै-
राशिषि वा विधानस्यावकाशः अकु-
शलार्थाः कुशलं देवदत्ताय कुशलं दे-
वदत्तस्य इहोभयं प्राप्नोति स्वस्ति गोभ्यः
स्वस्ति ब्राह्मणेभ्यः इति चतुर्थी भवति
विप्रतिषेधेन फलमिति पर्यायस्यैव ग्रह-
णं फलमिति पर्यायमर्थस्य ग्रहणं कर्तव्यं
इह मा भूत् फलं कुरुते कन्यायामिति प्र-
परग्राह फलमिति पर्यायस्यैवेति वक्त-
व्यं इहापि यथा स्यात् फलं मलोमला-
य प्रभ्रं मलोमलाय प्रभवति मलोम-

श्री
महाभा
३०१

लायेति मद्रग्रहणानर्थक्यं तेन
भद्रेण सिध्यति न वा भद्रेण मद्रेण वा भु-
ने मद्रमिति एवं तर्हि योगविभागः क-
रिष्यते मद्रकर्मण्यपवादे विभाषा वि-
भाषा ततः ग्रहणाभ्यश्च विभाषेति
इहापि तर्हि प्राप्नोति त्वाकार्कं मद्रा-
न्नवाभ्रुकं मद्रमिति यदेतद् ग्रहणायोग्य-
तदनायोऽरिष्यति स्यामि इमेतार्यो द-
योभविष्यति नमोनावमभ्रेयाद्भुतौ आ-
नाद्य नमोऽद्भुत्रं मभ्रयावाद्भुतस्याद्द य-
ग्रहणाभनेष्यते तेनार्थाद्योभविष्य-
ति मद्रकर्मणा प्रकृष्य कान्मिनत्प्रहेण-
मद्रकर्मणा प्रकृष्य कान्तिनप्रहणाक-
नेध्य इह मा भूत् नरेणातवामद्र इति ॥
इति श्रीमद्भगवत्पतञ्जलिविवि-
रचिते व्याकरणमहाभाष्ये द्वितीयस्या-
ध्यायस्य तृतीयपादे प्रथममाह्निकं ॥
॥ कर्तृकरणयोस्तृतीया विधाने प्रकृत्यादि-
भ्य उपसंख्याने तृतीयाविधाने प्रकृ-
त्यादिभ्य उपसंख्यानं कर्तव्यं प्रकृत्या-
भिरूपः प्रकृत्याभिरूपः प्रकृत्या दर्श-
नीयः प्रायेण याज्ञिकाः प्रायेण वैयाक-

रणाः माठरोऽस्मि गोत्रेण गार्ग्योऽस्मि गो
त्रेण समेन धावति विषमेण धावति द्वि
द्रोणेन धान्यं क्रीणाति त्रिद्रोणेन धान्यं
क्रीणाति पंचकेन पशून् क्रीणाति स
हस्रेण धान्यं क्रीणाति तत्तर्हीदं वक्तव
क्तव्यं न वक्तव्यं कर्त्तृकरणयोरित्येव सि
द्धं इह तावत् प्रकृत्याभिरूपः प्रकृत्या
दर्शनीय इति प्रकृतिकृतेनाभिरूप
त्वेन प्राप्नोति कः प्रायेण वैयाकरणः
इति प्रधानत्र आर्यायेनेति यो यत्नो माठरो
ऽस्मि गोत्रेण गार्ग्योऽस्मि गोत्रेण पतेनाह
त्वाथ समेन धावति विषमेन धावतीति
इह मत्र प्रयोक्तृत्वेन प्रयुज्यते समेन प
था धावति विषमेणाप्यथा धावतीति
द्विद्रोणेन धान्यं क्रीणाति द्विद्रोणार्थं द्विद्रो
णं द्विद्रोणेन द्विद्रोणपरिमाणेन धान्यं क्रीणाति पं
चकेन पशून् क्रीणाति पञ्चार्थः पञ्चकः प
ञ्चकेन पशूला पशून् गृह्णाति साहस्रेण
धान्यं क्रीणाति सहस्र किमन्तरदृश्यणा ति
लैः सह माषान् वपति नैतदस्ति तिलैर्मि
श्रीकृत्य माषान् वपति नेयं कारणाव्यवस्थि
ह इदं तर्हि पुत्रेण सहागतो देवदत्त इति प

तदपि नास्ति प्रयोजनं प्रधानकर्त्तरि ला
दयो भवन्तीति प्रधानकर्त्तृत्वेनाभिधीय
ते यस्य ग्रामः प्रधाने सिद्धान्तमत्तीयाकं
श्रीमेव इदं तर्हि पुत्रेण सहागमनं देवदत्त
स्येति षष्ठ्यत्रवाधिका भविष्यति इदं तर्हि
पुत्रेण सहस्थूलः पुत्रेण सह पिङ्गल इति
इदं चाप्युदाहरणं तिलैः सह माषान् व
पतीति ननु चोक्तं तिलैर्मिश्रीकृत्य माषाव
पनेन यत्करणं इत्येवासिद्धमिति भवेत्सि
द्धं यदा तिलैर्मिश्रीकृत्योप्यन्ते कदा
चित्तु माषबीजावापं उपाप्यतेऽल्पं द्रष्टव्यं चेद
नुव्यानि ते तदाप्यस्यापि किंचिदुप्यते य
दि भविष्यति सहयुक्तेऽभविष्यतीति प्रधा
नवचनमनर्थकं उपपदविभक्तेः कार
कविभक्तिर्बलीयस्त्वात् प्रयत्नापि सहयु
क्तेऽप्रधानवचनमनर्थकं किं कारणम् उप
पदविभक्तिः कारकविभक्तिर्बलीयस्त्वा
त् अत्र प्रथमपदविभक्तेः कारकविभक्ति
र्बलीयसी भवति कान्य ग्रामाः स्वामीत्यज
नीयन्ते येनाग्र इत्येकस्मात्वं भवति प्रति
कारणमस्यान्तिग्रामादिकृतानादिकारणत्व
देशीनो वचने ग्रामादिकृताभरणीयावक

ष्या नन्वेवचेह्नि क्रियेरणं गोयोगोऽस्त्वन इति
वक्तव्यं तत्रहि वक्तव्यं नवक्तव्यं अप्र
शब्दायः समुदायशब्दः येनेति च करण
पक्षोत्तरीया येनावयवेनाङ्गोयोगोऽस्य ते
नास्मिन्भवितव्यं नचैतेनावयवेन समु
दायो योगोऽस्य ते इत्थंभू इत्थंभूतलक्षण
नस्य प्रतिषेधो वक्तव्यः अपि भवान्कम
ण्डलपाणिं छात्रमद्राक्षीदिति नवेत्थं
भूतस्य लक्षणेनाश्रयस्याभावात् नवाव
क्तव्यः किंकारणं इत्थंभूतस्य लक्षणेना
श्रयस्याभावात् येनेत्थंभूतलक्षणमस्यक
भूते तत्र भवितव्यं नचात्रेत्थंभूतलक्ष
णमस्यकभूते किंवक्तव्यमेतत् नहि
कथमनुच्यमाने गंस्यते नेत्याकायप्रथाने
नलक्षणं प्रति निर्दिशति इत्थंभूतलक्षण
इति सञ्ज्ञोऽन्य सञ्ज्ञः कृत्वयोगे षष्ठी विप्रति
षेधेन सञ्ज्ञोऽन्यतरस्यां कर्मणीत्यत्र कृत्व
योगे षष्ठी भवति विप्रतिषेधेन सञ्ज्ञोऽन्यत
रस्यां कर्मणीत्यस्यावकाशः मातरं सञ्ज्ञा
नीते मातामसञ्ज्ञानीते कृत्वयोगे षष्ठ्या अव
काशः इध्मप्रव्रश्चनः पलाशशातनः इहो
भयं प्राप्नोति पितुः सञ्ज्ञाता मातुः सञ्ज्ञाता

श्री
महा
भा
३७२

षष्ठी भवति विप्रतिषेधेन उपपदविभक्ते
स्त्रोपपदविभक्तिः उपपदविभक्तेस्त्रोपप
दविभक्तिर्भवति विप्रतिषेधेन अन्यारा
दितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहि
त्यस्यावकाशः अन्यो देवदत्तात् स्वामीश्व
राधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्चेति
त्यस्यावकाशः गोषु स्वामी गवां स्वामी इ
होभयं प्राप्नोति गोभ्योऽन्यः स्वामी अन्यो गा
वांस्वामी स्वराधिपतिदायादसाक्षिप्रति
भूप्रसूतैश्चेत्येतद्भवति विप्रतिषेधेन नैष
युक्तो विप्रतिषेधः नह्ययं गावोऽस्य प्रकाः
कस्तर्हि स्वामी एवंतर्हि तुल्यार्थैरतुलो
पमाभ्यामित्यस्यावकाशः तुल्यो देवदत्त
स्य तुल्यो देवदत्तेन स्वामीश्वराधिपतिदा
यादसाक्षिप्रतिभूप्रसूतैश्चेत्यस्यावकाशः स एव
इहोभयं प्राप्नोति तुल्यो गोभिः स्वामी तु
ल्यो गवां स्वामी तुल्यार्थैरतुलोपमाभ्या
मित्येतद्भवति विप्रतिषेधेन हेतौ निमि
त्तकारणहेतुषु सर्वासां प्रायदर्शनं निमि
त्तकारणहेतुषु सर्वाः प्रायेणदर्शनमि
ति वक्तव्यं किंनिमित्तं वसति किंनिमि
त्तं वसति केन निमित्तेन वसति कस्मै नि

मित्तायवसतिकस्मान्निमित्ताद्वसति
कस्यनिमित्तस्यवसति कस्मात्कारणा
द्वसतिकस्यकारणस्यवसति कस्मिन्
कारणेवसतिकोहेतुर्वसतिकंहेतुंवस
ति केनहेतुनावसति कस्मैहेतवेवस
ति कस्माद्धेतोर्वसतिकस्यहेतोर्वसति
कस्मिन्हेतौवसति अपादानेपंचमी
विधानेल्यब्लोपेकर्मण्युपसंख्यानं पं
चमीविधानेल्यब्लोपेकर्मण्युपसंख्या
नंकर्त्तव्यं प्रासादमारुह्यप्रेक्षतेप्रासाद
त्प्रेक्षते अधिकरणेच अधिकरणेचोप
संख्यानंकर्त्तव्यं आसनमास्थायप्रेक्षतेशय
नात्प्रेक्षते प्रश्नाख्यानयोश्च प्रश्नाख्या
नयोश्चपंचमीवक्तव्या कुतोभवान्पा
टलिपुत्रात् यतश्चाध्वकालनिर्माणं
तत्रपंचमीवक्तव्या गवीधुमतःसांका
श्यंचत्वारियोजनानि कार्त्तिक्याआग्र
हायणीमासे तद्युक्तात्कालेसप्तमी त
द्युक्तात्कालेसप्तमीवक्तव्या कार्त्तिक्या
आग्रहायणीमासे अध्वनःप्रथमाचस
प्तमीचवक्तव्याः गवीधुमतःसांकाश्यं
चत्वारियोजनानिचतुर्षुयोजनेषुतत्तर्हि

श्री
महा
भा
३२८

तद्बहुवक्तव्यं नवक्तव्यं अपादानइत्ये
वसिद्धम् इहतावत्प्रासादात्प्रेक्षते शा
यनात्प्रेक्षतेइति अपक्रामतितत्तस्मा
द्दर्शनम् यद्यपक्रामतिकिंनात्यन्ताया
पक्रान्तंभवतिसततत्वात् अथवान्य
प्रादुर्भावात् प्रश्नाख्यानयोश्चपंचमी
वक्तव्येतिइदमप्रयोक्तव्यंनप्रयुज्यते
कुतोभवानागतःपाटलिपुत्रादिति य
तश्चाध्वकालनिर्माणंतत्रपंचमीवक्तव्ये
ति इदमप्रयोक्तव्यंनप्रयुज्यते गवी
धुमतोनिःसृत्यसांकाश्यंचत्वारियो
जनानि कार्त्तिक्याआग्रहायणीमास
इति इदमप्रयोक्तव्यंनप्रयुज्यते का
र्त्तिक्याःप्रभृत्याग्रहायणीमासइति
तद्युक्तात्कालेसप्तमीवक्तव्येति इदम
प्रयोक्तव्यंनप्रयुज्यते कार्त्तिक्याआ
ग्रहायणीगतेमासइति अध्वनःप्रथमा
चसप्तमीचवक्तव्येतिइदमप्रयोक्त
व्यंनप्रयुज्यते गवीधुमतोनिःसृत्य
यत्रचत्वारियोजनानिगतानिगतः
सांकाश्यं चतुर्षुयोजनेषुततःसां
काश्यमिति अन्या अद् सूत्रेपदग्रह

णं किमर्थं न दिक्शब्दैर्योग इत्येवं सिद्धं प
ह्रानमर्थमध्यायेन निवर्त्स्यति तस्यायं पुर
स्तादपकर्षः क्रियते षष्ठ्यतसर्थग्रहणं कि
मर्थं षष्ठ्यतसप्रत्ययेनेत्युच्यमाने
इहैव स्यात् दक्षिणतो ग्रामस्य उत्तरतो ग्रा
मस्य इह न स्यात् उपरि ग्रामस्य उपरिष्टाद्ग्रा
मस्य अर्थग्रहणे पुनः क्रियमाणे तत्प्रत्य
येन च सिद्धं भवति यश्चान्येन तेन समाना
र्थः प्रत्ययप्रत्ययग्रहणं किमर्थं इह मा भूत्
प्राक्ग्रामात् प्रत्यक् ग्रामात् अञ्चूत्तरपद
स्यात्प्रयोजनमुक्तं तत्राप्यन्तरङ्गत्वामकृत
इत्यपि इतरादिषु पंचमीविधानात् इ
तरादिषु पंचमी विधेया प्रत्येवदत्तात्
प्रत्ययज्ञदत्तात् किमर्थं न कृते पंचमीग्र
हणमनुवर्तते क्व प्रकृतं अपादाने पंच
मीति अनधिकारात् अनधिकारस्य अधि
कारे हि द्वितीया षष्ठी विषये प्रतिषेधः
अधिकारे हि सति द्वितीया षष्ठी विषये प्र
तिषेधो वक्तव्यः स्यात् दक्षिणेन ग्रामं द
क्षिणेन ग्रामस्य एवं तर्हि अन्यतरस्यां ग्रह
णमर्थं यत्तेन पंचमी भविष्यति अन्यत
रस्यांग्रहणस्य प्रयोजनं किं यस्यां ना
प्राप्तायां द्वितीयारम्भे नैमायथा ॥

श्री
महा
भा
२७५

स्यात् कस्मांचनो ग्रामांयो अन्ततः षष्ठ्यान
न हि पंचमीग्रहणं कर्तव्यं न कर्तव्यं प्रकृत
मनुवर्तते क्व प्रकृतं अपादाने पंचमीति
ननु चोक्तमनधिकारात् अनधिकारः सः
अधिकारे हि द्वितीया षष्ठी विषये प्रतिषेध
इति एवं तर्हि संबन्धमनुवर्तिष्यते अपादा
ने पंचमी अन्यारादितरर्त्तेदिक्शब्दाञ्च
चूत्तरपदाजाहियुक्ते पंचमी षष्ठ्यतसर्थप्र
त्यये अन्यादिभिर्योगे पंचमी एनपा द्विती
या अन्यादिभिर्योगे पंचमी पृथग्विनानाना
भिस्तृतीयान्यतरस्याम् पंचमीग्रहणमा
नुवर्तते अन्यादिभिर्योग इति निवृत्तम् अ
थवा मंडूकगत्योऽधिकारः यथा मंडूका
उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकारः अथ
वान्यवचनाच्चकारादकरणात्प्रकृतस्यापवा
दो विज्ञायते यथोत्सर्गेण प्रसक्तस्या
स्याविभक्तेर्वचनात् चकारस्यानुकर्षणा
र्थस्याकरणात् प्रकृताया पंचम्या द्विती
याषष्ठ्योर्यौगिके भविष्यतः यथोत्सर्गेण
प्रसक्तस्यापवादो बाधको भवति अथ
वा वदानेनन अनुवर्तते च नाम विधयेन
चानुवर्तनादेव भवति किं न क्रियता ।

वेनीति हरंतिहरंकाष्ठेभ्यः पंचमीवि
धानेनयुक्तानां चमीप्रतिषेधः हरंतिका
ष्ठेभ्यः पंचमीविधानेनयकाष्ठेभ्यः प्र
तियोवक्तव्यः हराकामस्य नवानत्रापिद
र्शनादनर्थकः प्रतिषेधः तत्रापिपंचम्या
दर्शनान्मतिषेधोनर्थकः तत्रापिपंचमी
दृश्यते हरादावसथान्तरं हरत्पादावृषे
चते हराद्वभाव्यस्याद्व हराद्धकपिताद्रू
मिति सप्तमीविधानेक्तस्येन्विषयस्यकर्म
णउपसंख्यानं सप्तमीविधानेक्तस्येन्विष
यस्यकर्मणउपसंख्यानंकर्तव्यं अधीती
व्याकरणेपरिगणितीयाज्ञिक्येआम्ना
नीछंदसीति साध्वसाधुप्रयोगेच सा
ध्वसाधुप्रयोगेचसप्तमीवक्तव्या साधुर्दे
वदत्तोमातरि असाधुः पितरि कारका
र्हाणांचकारकत्वेसप्तमीवक्तव्या ऋद्धेषु
भुंजानेषुमूर्खाआसते ब्राह्मणेषुतरत्सु
वृषलाआसतेअकारकार्हाणांचाकारक
त्वे अकारकार्हाणांचाकारकत्वेसप्तमी
वक्तव्या मूर्खेष्वासीनेषुऋद्धाभुंजतेवृष
लेष्वासीनेषुब्राह्मणास्तरंति तद्विपर्या
सेच तद्विपर्यासेचसप्तमीवक्तव्याऋद्धेष्वा

श्री महा भा
३५३

श्री महा भा
३२५

सीनेषुमूर्खाभुंजते ब्राह्मणेष्वासीनेषु
वृषलास्तरंति निमित्तात्कर्मसंयोगेस
प्तमीवक्तव्या चर्मणिद्वीपिनंहंतिदंतयोर्ह
तिकुंजरम् केशेषुचमरींहंतिसीम्निपुष्क
लकोहतः इति यस्यभावेभावलक्षणंस
प्तमीविधानेभावलक्षणउपसंख्यानं
भावलक्षणेसप्तमीविधानेअभावलक्ष
णउपसंख्यानंकर्तव्यम् अग्निषुहूयमा
नेषुप्रस्थितः हुतेष्वागतः गोषुदुह्यमाना
सुगतः दुग्धास्वागतः किंपुनः कारणंन
सिध्यतिसिध्यति लक्षणंहिनामभवति ये
पुनः पुनर्लक्ष्यते सकृच्चासौकथंचित्कः
अग्निषुहूयमानेषुप्रस्थितोहुतेष्वागतः
गोषुदुह्यमानासुगतः दुग्धास्वागतः सि
द्धंतुभावप्रवृत्तौयस्यभावारंभवचनात्
सिद्धमेतत् कथंयस्यभावप्रवृत्तोहिनी
योयावत्प्राप्यते तस्यतिवक्तव्यम् सिध्य
तिमूर्तिनहिभिद्यते यथानासमेवास्य
तत्रचोक्तंभावलक्षणेसप्तमीविधानेभाव
लक्षणउपसंख्यानमिति नैषदोषः ना
त्विलूष्यवपनदेवलक्षणं भवति ये
नपुनः पुनर्लक्ष्यते सकृदपितत्सिसि

न्यायकल्प्यते नह्यपि लक्षणं भवति अपि
भवान् कमण्डलुपाणिं छात्रमद्राक्षीदिति
सह्यदेवासौ कमण्डलुपाणिश्छा
त्रः नस्यतेर्लक्षणं भवति पंचमी इ
ह कस्मान्न भवति कुशलो गवां सम्पन्नक्षीरत
मेति विभक्तश्चोच्यते नचैतद्विभक्तम् य
न्नह्यपि विभक्तम् विभक्तमेव यन्निमित्तं चै
तन्निमित्तं विभक्तमेव किं वक्तव्यमेतत् ना
हि कथमनुच्यमानं गंस्यते विभक्तग्रहण
सामर्थ्यात् यदि ह्ययद्विभक्तं च विभक्तं
च स्यात् विभक्तग्रहणमनर्थकं स्यात्
साधुनिपुणाभ्यामर्चायामप्रतेरिति वक्त
व्यम् इहापि यथा स्यात् साधुर्देवदत्तो मा
तरं परि मातरमन्विति अप्रतेरित्यप्रति।
नत्युच्यते कः प्रतिर्नाम स्वत्रनित्यवव
द्धः कुतस्तत प्रतिनोतिर्यच्च भावस्तथैवतिते
वर्तिते वक्ष्यत्यवासौ तत्र भवतीति तदेवे
इह कस्मान्न भवति अप्रयुक्ताः अधिकर
णैश्वर्ये इति श्रीमद्भगवत्पतञ्जलि
मुनिविरचिते व्याकरणमहाभाष्ये द्वि
तीयस्याध्यायस्य तृतीयपादे द्वितीयमाह्नि
कं प्रातिपदिका प्रातिपदिकग्रहणं।

किमर्थं उच्चैः नीचैरित्यत्रापि यथा स्यात्
किं पुनरत्र प्रथमया प्रार्थ्यते पदत्वम् यथा
अपदत्वं भविष्यति इदं तर्हि ग्रामे उच्चैस्त्वा
म् ग्रामे उच्चैस्तराम् सर्वस्याः प्रथमाया
विभाषेत्येष विधिर्यथा स्यात् अथ लिङ्गग्रहणं
किमर्थं स्त्री पुमान् नपुंसकमित्यत्रापि
यथा स्यात् नैतदस्ति प्रयोजनं पठ्यवात्र
प्रातिपदिकार्थः इदं तर्हि कुमारी वृक्षः कु
ण्डमिति अथ परिमाणग्रहणं किमर्थं द्रो
णः खारी आढकं इत्यत्रापि यथा स्यात् अ
थ वचनग्रहणं किमर्थं इह सम्प्रदायेषु वा
क्यपरिसमाप्तिर्दृश्यते तद्यथा गर्गाः श
तं दण्ड्यन्तामिति अर्थिनश्च राजानो हिरण्ये
न भवन्ति न च प्रत्येकं दण्डयन्ति तत्पर्यव
नानि सर्वाणि समवहितानि तैरेव स्यात् द्रो
णः खारी आढकमिति नैतदस्ति प्रयोजनं
प्रत्येकं वाक्यपरिसमाप्तिर्दृश्यते तद्यथा
गुणा वृद्धिसंज्ञः प्रत्येकं भवन्ति इदं तर्हि प्रयो
जनं उक्तेष्वेकत्वादिषु प्रथमा यथा स्यात्
एको द्वौ बहव इति अथ मात्रग्रहणं किम
र्थं एकं मात्रं यथा स्यात् कर्मादिविशि
ष्टे मा भूदिति नैतदस्ति प्रयोजनं कर्मादि

षुद्वितीयायामनाविशिष्टेवाधिकामविधे
ति अथवाचार्यप्रवृत्तिर्ज्ञापयति नकर्मादि
विशिष्टेप्रथमाभवतीति यदयंसंबोधने।
प्रथमेतिशास्ति नैतदस्तिज्ञापकंअस्तिह्यन
देतस्यवचनेप्रयोजनं किम् आमंत्रितमिति
वक्ष्यामीति यत्तर्हियोगविभागंकरोति ए
तस्याहिसंबोधनआमंत्रितमित्येवंब्रूयात्
इदंतर्हिप्रयोजनं उक्तेष्वेकत्वादिषुप्रथमा
यथास्यात् एकःद्वौबहवइतिवचनग्रह ।
णायैतत्प्रयोजनमुक्तं अथतत्रकस्मात्का
तम् प्रातिपदिकार्थलिंगपरिमाणवचन
मात्रेप्रथमालक्षणपदसमानाधिकर।
णउपसंख्यानंकर्तव्यं वीरःपुरुषःवीरः
पुरुषइति किंपुनःकारणंनसिध्यति अ
धिकत्वात् व्यतिरिक्तःप्रातिपदिकार्थइति
नप्राप्नोति नवावाक्यार्थत्वात् नवावक्तव्यं
किंकारणं वाक्यार्थत्वात् यदत्राधिकरणं
वाक्यार्थः अथवाभिहितेप्रथमेत्येतल्लक्ष
णंकरिष्यति अभिहितलक्षणायामन।
भिहितेप्रथमाविधिः अभिहितलक्षणा।
यामनभिहितेप्रथमाविधेयाः वृक्षःप्लक्ष
अस्तीतिगम्यते अभिहितानभिहितेप्र

श्री. महा. भा. ३०८

इति उक्तेचकिमुक्तं अस्तिर्भवतिपरःप्र।
थमपुरुषप्रयुज्यमानोऽप्यस्तीति वृक्षःप्ल
क्षः अस्तीतिगम्यते अभिहितानभि
हितेप्रथमाभः अभिहितानभिहितेप्र।
थमाभावप्राप्नोति कप्राप्नोति एवंतर्हिति
ङः समानाधिकरणेप्रथमेतिवक्ष्यतितिङ्प्र।
योगेप्रथमाविधेया वृक्षःप्लक्षइति उ
क्तेषुवाक्येषुकिमुक्तम् अस्तिर्भवतीपरः
प्रथमपुरुषप्रयुज्यमानोऽप्यस्तीति वृक्षः
प्लक्षः अस्तीतिगम्यते शतृशानचोस्त्व।
निमित्तभावात् लिङ्भावस्तयोरपवादत्वा
त् शतृशानचोस्त्वनिमित्तभावात् तिङः
अभावः किंकारणंतयोरपवादत्वात् श
तृशानचौ तिङ्पदौ तौचात्रनिमित्तवंतौ
नचापवादविषयेउत्सर्गोऽभिनिविशते
पूर्वंह्यपवादाअभिनिविशंति पश्चादु।
त्सर्गाः प्रकल्प्यवापवादविषयंततउत्स
र्गोऽभिनिविशते नतावदत्रकदाचित्ति
ङादेशोभवति अपवादोऽत्रशतृशानचौ
प्रतीक्षते प्रातिकूल्यदोषः कतर।
स्मिन्नदेशौ शतृशानचौ हैनवति अप्रथ।
माविधिनाश्रीयते प्रथमावाप्रतिषे

येनेति विभक्तिनियमे चापीष्टं भवति
विभक्तिनियमो वस्यादर्थनियमो वेति
तयदानावदर्थनियमः अथप्रथमा च वि
धिनाश्रीयते तदेषदोषः यदाविभक्ति
नियमः तदायद्यवाप्रथमाविधिर्वाश्रीय
ते यापिप्रथमाप्रतिषेधेनतदादोषोभव
ति षष्ठीशेषे शेषेऽभ्युच्यते कः शेषः क
र्मादिभ्योयेन्येर्थाः सशेषः यद्येवंशेषोप
कल्पने नहिकर्मादिभ्योऽन्येर्थाःसन्ति श
हानावद्राज्ञः पुरुषइति राजाकर्ता पुरुषः
प्रसंप्रदानेहृनस्यशाखेविनिहृनःशाखा।
याअधिकरणं तदायदेतन्त्वनामचव।
भिरेतस्यकार्थैर्भवतिक्रियणात अपहर।
णात् याज्ञायाविनिमयात्र अत्रचसर्व
त्रकर्मादयःसन्ति एवंतर्हिकर्मादीनाम।
विवक्षाशेषः कथंपुनः सतोनामाविव।
क्षास्यात् सतोप्यविवक्षाभवति तद्यथा
अलोमिकाएडका अनुदराकन्येति अ
सतस्त्रविवक्षाया ------ मिसमुद्रःकुं
डिकाविंध्योवर्धितकमिति किमर्थंपु।
नःशेषग्रहणंकम्प ------ केषव।
चनेत्पत्ययावधारणकेमवचनम् शेष

श्री॰
महा॰
भा॰
३०५

ग्रहणंकर्तव्यम् प्रत्ययानियम ------
नियतास्तत्रषष्ठीप्राप्नोति तत्रशेषग्रह
णंकर्तव्यम् षष्ठीनियमार्थम् शेषएव
षष्ठीभवतिनान्यत्रेति अर्थावधारणा।
त्व अथवार्थानियताः प्रत्ययाअनियता
शेषेचप्राप्नुवंतितत्रशेषग्रहणंकर्तेशेष
ग्रहणंकर्तव्यं शेषनियमार्थम् शेषएवष
ष्ठीभवतिनान्यत्रेति अर्थनियमेशेषग्र।
हणंशक्यमकर्तुम् कथम् अर्थानियताः
प्रत्ययाअनियताः ततोवक्ष्यामीषष्ठी।
भवति ननियमार्थमभिधेयत्रषष्ठीचान्या
चप्राप्नोति षष्ठ्येवतत्रभवति षष्ठीशेषइ
तिचेद्विशेष्यस्यप्रतिषेधः षष्ठीशेषइति
चेत् विशेष्यस्यप्रतिषेधोवक्तव्यः राज्ञः
पुरुषइतितत्रप्रथमाविधिः तत्रषष्ठीप्र
तिषिध्येनप्रथमाविधेया राज्ञःपुरुषइ
ति उक्तंपूर्वेणाभिसंबन्धम् अथवावाक्यार्थ
त्वात् यद्राजाधिकंवाक्यार्थः सः कृतोवा।
खलोनन पुरुषयत्राधिक्यंसवाक्यार्थः
स्यात्प्रनाराजनि यदाधिक्यंसवाक्या
र्थःस्यात् अन्तरेणापिपुरुषशब्द।
प्रयोगंराजनिसार्थोगम्यते तत्र।

नेदंतेरेणराजशब्दस्यप्रयोगेपुरुषेसो
र्थोगम्यतेतत्रकिंकारणंयेनैतदेवंभ
वति किंकारणं राजशब्दाद्धिभवान्
षष्ठीमुच्चारयति पुंगादिपुरुषशब्दा
दुच्चारयतगम्यतेसोर्थइति नतुचैत
नैनेवंभवितव्यं अर्थोनिमित्तेकेनशा
ब्दिनभवितव्यं तदेतदेवंदृश्यतां प्र
थ्येदृशमेवैतदेवंजानीयकयेनाज्ञानते
णापिपुरुषशब्दप्रयोगेराजनिसोर्थो
गम्यते किंपुनस्तत्स्वामीनेकिंकृते
पुनस्तत्रसहकृतेनयथाप्रातिपदिका
नांक्रियावनाविशेषाउपजायते तत्कृ
तास्तुसमासोःप्रवर्त्तेभवति कर्मकर
णामधिकरणंसंप्रदानमपादानमिति
तास्तुगतविभक्तीनामसौकदाचि
न्निमित्तेनेनापादीयते कदाचित्तत्
कदाचिन्निमित्तेनेनापादीयते यदाप्तु।
भवतिसंप्रतिकार्थे यदाहितेनाभि
चेन्नाख्यानापवनन्नभवति कर्मकक
रणामधिकरणमपादानंसंप्रदानमिति
षष्ठ्येवतद्धिराजनिसकृतेनसामित्वंमे।
वपुरुषेपिराजकृतेनसंबन्धेनषष्ठीप्राप्नो

श्री
महा
भा
३८०

ति राजशब्दादुत्पद्यमानयाषष्ठ्याऽवि
हितःसोर्थइतिकृत्वापुरुषशब्दान्नभ
विष्यति नतर्हीदानीमिदंभवति पुरु
षस्यराजेति भवतिराजशब्दान्तदाप्रथ
मा नतर्हीदानीमिदंभवति राज्ञःपुरु
षस्येतिभवतिवाक्यमर्थमपेक्ष्यते अर्थो
गर्थक्रमादिषुकर्मकबहुवचने कर्मादि
षुकर्मकबद्भावोवक्तव्यः किंप्रयोजनं प्रक
र्मकाणांभावेलोभवतीतिभावेलोयथा।
स्मात मातुःस्मर्यते पितुःस्मर्यतेअथ
वक्तव्यंकिमर्थं साधयकर्मणियथास्मात
मातास्मर्यते पितास्मर्यतेइति कर्माभि
धानेहिलिंगवचनानुपपत्तिःकर्मणभि।
धानेहिसतिलिंगवुगवचनयोरनुपप
त्तिःस्मात मातुःस्मर्यते मातुःस्मर्यतेमातृ
णांस्मर्यतेइति मातुर्यलिंगवचनंचतत्
स्मर्यतेशब्दस्यापिप्राप्नोति षष्ठीप्रसंगाच्च
षष्ठीचप्राप्नोतिकुतःस्मर्यतेशब्दात् मातुः
सामानाधिकरण्यात्षष्ठीप्राप्नोति अपर
आहषष्ठीप्रसंगाच्चषष्ठीप्रसक्तव्याकृतः
मातृशब्दात् स्मर्यतेशब्देनाभिहितेकर्मे
तिकृत्वाषष्ठीनप्राप्नोति नतर्हिवक्तव्यं

वक्तव्यो अविवक्षिते कर्म्मणि षष्ठी भवति
किं वक्तव्यमेतत् न हि कर्म्मण्यनुच्यमाने
गम्यते शेष इति वर्त्तते शेषश्च कः कर्मा
दीनामविवक्षा शेषः यदा च कर्म्म विवक्षि
तं भवति न तदा षष्ठी भवति तद्यथा स्मर
माहं मातरं स्मराम्यहं पितरमिति रुजार्था
नां ज्वरिसन्ताप्योरिति वक्तव्यं इहापि यथा
स्यात् चैरं सन्तापयति वृषलं सन्तापयति प्र
थ किमर्थं भाववचनानामित्युच्यते याव
ता रुजार्था भाववचना एव भवति भाव
कर्तृकाया यथा स्यात् इह मा भूत् नदीकू
लानि भङ्क्ती तिष्ठति तोया किमुदाहरण
माङ्क्षे निनाविदीक्ष्यते नोसमासमस्तउप
हेति नैतदस्ति पूर्वेणाप्येतत् सिद्धं इ
देनहि मामस्यानदहः सभायादीक्ष्यति।
ति अथ हविषोप्रस्थितस्येति वक्तव्यं इ
न्द्राग्निभ्यां भागहविर्वपामहः प्रस्थितेप्र
ष चतुर्थ्यर्थे षष्ठ्यर्थे चतुर्थी वक्तव्या य
त्वै वैणपिवति न सोम वीजायते यादते
यावति तस्य सायादन यानवाचिकृतेति।
तस्याकुलवो यामेकेन संयकमाः यास
र्षगेन सोइस्वामी याके साम्यलिविविवत

श्री
महा
भा
३८८

सौबलनिः यस्तानितनसोऽपुष्पमारकं
याकृतनितनसोऽनेरंध्रकोजायते प्रह
ल्पायेजरमाणायेभर्त्तः नन्तर्हि देवक्त
व्यं न वक्तव्यं योगविभागात्सिद्धं चत
र्थ्यांततः प्रथ्येवङ्कल्केऽकृदसि कर्तृकर्म
कृदुदाहरणे किमर्थं इह मा भूत् पचमो
दनं देवदत्त इति कर्तृकर्म्मणोः षष्ठी वि
धाने कृदुदाहरणानर्थकं लप्रतिषेधात्
कर्तृकर्म्मणोः षष्ठी विधाने कृदुदाहरणम
नर्थकं किं कारणं लप्रतिषेधात् प्रति
षिद्धेन तत्र षष्ठी न प्रतियोगेनेति तस्य क
र्मकर्त्तर्थे न हि कृदुदाहरणं कर्तव्यं कृतोपि
कर्तृकर्म्मणोर्न यथा स्यात् प्रयास्यते।
कर्तृकर्म्मणोर्न चभूदिति नैतद् स्तिप्रयो
जनं यातो हि ये प्रत्ययाविधीयंते लिङः
कृतस्त्र नवकृतव्यायामः इष्यते लिङः प्रयो
गप्रतिषिद्ध्यते न प्रथमः इहार्थं तस्य क
र्मकर्त्रर्थं कृदुदाहरणं कर्तव्यमिति किन्त
हि मे गार्थ्ये प्रव्यायप्रयोगेनेति प्रतिषेधं
वक्ष्यति स कृतो ये कर्तृकर्म्मणोर्न यथा
स्यात् प्रत्यासाव्ययस्यायेकर्तृकर्म्मणोन
चमाभूदिति उच्चैः करानाश्रोऽशेति तस्य

कर्मकर्त्रर्थमितिचेत्प्रतिषेधेपितदेत
कर्मकर्त्तव्यास्तिहि नेच्छन्तपतेकर्त्त।
कर्मणोनाव्ययस्य अधिकरणमध्या
व्ययं इदं तर्हि प्रयोजनं उभयप्राप्तौक
र्मणिषष्ठ्याः प्रतिषेधं वक्ष्यति सक्तौ
येकर्त्तृकर्मणीतत्रयथास्यात् कृतोयक
र्त्तृकर्मणीतत्रमाभूत् आश्चर्यमिदंहत
मोदनस्यच नामपाकः ब्राह्मणानाव
प्रादुर्भावइति अथक्रियमाणेपिकृ।
इहकस्मादेवात्रनभवति उभयप्राप्ता
वितिनैवंविज्ञायते उभयोः प्राप्तिः उभ
यप्राप्ताविति कथन्तर्हि उभयोः प्राप्तिर
स्मिन्सोयमुभयप्राप्तिः कृतौ उभयप्राप्ता
विति अथवाथतोपकर्त्तृकर्मणीतत्र
यथास्यात् नहित्स्यकर्त्तृकर्मणीति
यमाभूदिति कृतपूर्वीकटं भक्तपूर्वीओ
दनमिति नवक्तव्यो केनवानेनभवितव्यं
द्वितीययातावदत्रभवितव्यं किंकारणं
केनाभिहितकर्मनिकृतायोसौकृतनके
टकयोरभिसंबंधः सउमाते प्रत्ययेनिव
र्त्तते अस्तिचकर्मणः कटेनसंबंधइतिकृ
ताद्वितीयाभवति यदप्युच्यते प्रत्ययेन

श्री
महा
भा
३८२

चाभिहितोत्यनेनवक्तव्यं किंकारणं असाम
र्थ्यात् कथमसामर्थ्यं सापेक्षमसम
र्थंभवतीति नेदमभवेत्स्वगुणापेक्षवति
वाक्यं चयस्यगम्य यथावाक्यतत्तदाप्र
त्ययः यदाप्रत्ययः सामान्येनतदाहृतिः
तत्रावश्यं विशेषार्थिनाविशेषोनुप्र
योक्तव्यः कृतपूर्वीकिं कटं भक्तपूर्वी
किं ओदनमिति अथवेदं प्रयोजनं क
र्तृभूतपूर्वमात्रापिषष्ठीयथास्यात्
भेदिकादेवदत्तस्ययज्ञदत्तस्यकाष्ठाना
मिति उभयप्राप्तौ उभयप्राप्तौकर्मणिषष्ठ्या
प्रतिषेधेकादिप्रयोगप्रतिषेधः उभय
प्राप्तौकर्मणिषष्ठ्याः प्रतिषेधेकारि
प्रयोगप्रतिषेधोनभवतीतिवक्तव्यं भे
दिकादेवदत्तस्यकाष्ठानां चिकीर्षादि
स्वभिन्नकस्यउपसंख्यानं अकाकार
योः प्रयोगेन शेषेवितिवक्तव्यं शोभना
खलुदाक्षायणस्यसंग्रहस्यकृतिः कृत्य
चेत्कस्यचवर्त्तमानेनप्रसक्तभावउपसं
ख्याने कस्यचवर्त्तमानेनप्रसक्तेभाव
उपसंख्यानंकर्त्तव्यं अकाउसाहसिति न
टस्यभक्तं मयूरव्यंसकत्वेकोकिलस्यवा

हतमिति शेषविवक्षा नास्ति इदं शेष
लक्षणा षष्ठी भविष्यति शेषश्चोच्य
ते शेषश्च कः कर्मादीनामविवक्षा शे
षः कथं पुनः सतो नामाविवक्षा स्यात्
यदाक्षोदोहमिति नैवं किमस्यैतान्
यति कोकिलोऽभिव्याहरति सतोप्यवि
वक्षा भवति तद्यथा अलोमिका एडका
अनुदरा कन्येति असतश्च विवक्षा भव
ति समुद्रः कुण्डिका विन्ध्यो वर्धितकमि
ति यद्येवमन्तरेण वचनात् षष्ठी प्राप्नोति इ
दमहः स्रजे इहाह्निः स्रजे इहाह्नः स्रजे
ग्रामस्य पार्श्वेष्वेव वचनात् षष्ठीमिति
न लोकाव्ययः लादेशेऽलिड्ग्रहणं कि
किनोः प्रतिषेधार्थं लादेशेऽलिड्ग्रह
णं कर्तव्यं अलिटः प्रयोगे नेति वक्तव्यं
किं प्रयोजनं किकिनोरपि प्रयोगे प्रति
षेधो यथा स्यात् पपिः सोमं ददिर्गाः।
किं पुनः कारणं न सिध्यति किकिनोर्लादे
शत्वात् नहि तौ लादेशौ अलादेशा
नामस्यास्य प्रतिषेधः वास्मात् लादे
शानां हि भविष्यति तत्कथं आदृगम
हनजनः किकिनौ लिडिति लिड्वदिति

श्री
महा
भा
३८३

वक्ष्यामि स तर्हि वतिनिर्देशः कर्तव्यः
नह्यन्तरेण वतिमतिनिर्देशो गम्यते अन्त
रेणापि वतिमतिनिर्देशो गम्यते तद्यथा
एष ब्रह्मदत्तः अब्रह्मदत्तं ब्रह्मदत्त इत्या
ह ते मन्यामहे ब्रह्मदत्तवदयं भवती
ति एवमिहाप्यलिटं लिडित्याह लिड्
वदिति विज्ञास्यते न च उकारप्रयोगे
नेति वक्तव्यं कटं चिकीर्षुः ओदनं बुभुक्षुः
न तर्हि वक्तव्यं न वक्तव्यं उकारोऽप्यत्र नि
र्दिश्यते कथं प्रश्लिष्टनिर्देशात् उउक
उक न लोक इति उकप्रतिषेधे कमेर्भा
षायामप्रतिषेधः उकप्रतिषेधे कमेर्भा
षायां प्रतिषेधो न भवतीति वक्तव्यं दास्या
कामुकः वृषल्याः कामुकः अव्ययप्र
तिषेधे तोसुन्कसुनोरप्रतिषेधः अव्य
यप्रतिषेधे तोसुन्कसुनोरप्रतिषे
धो वक्तव्यः पुरा सूर्यस्योदेतोराधेयः पुरा
क्रूरस्य विसृपो विरप्शिन् शानन्चान
श्शतॄणां चोपसंख्यानं शानन्चान
श्शतॄणां चोपसंख्यानं कर्तव्यं सोमं
पवमानः नडमाघ्नानः अधीयन्पारा
यणं लप्रयोगे नेति प्रतिषेधो न प्राप्नो

ति माभूद्विशेषेणतत्त्रिशेषंभविष्यति
कथं तर्हीतिनेदंप्रत्ययग्रहणं किंत
र्हिप्रत्याहारग्रहणं कस्मान्नविहितो ना
प्रत्याहारः लटः शानच्छेनलः प्रभृतिप्र
त्ययानकारात् यदि प्रत्याहारग्रहणं
चौरस्य द्विषन् वृषलस्य द्विषन् इत्य
त्रापि प्राप्नोति द्विषः शतुर्वावचने द्वि
षः शतुर्वेति वक्तव्यं तच्चावश्यं वक्तव्यं
प्रत्ययग्रहणेऽसति प्रतिषेधार्थं तदेव
प्रत्याहारग्रहणेऽसति प्रतिषेधविक
ल्पार्थंभविष्यति अकेनोर्भेऽकस्य भ
विष्यति अकस्य भविष्यतीति वक्तव्यं
यवांल्लावकोव्रजति ओदनंभोजको।
व्रजति सक्तून्पायकोव्रजति ततः इन
श्राधमर्ण्ये च इनश्राधमर्ण्ये च भवि
ष्यतीति वक्तव्यं शतं दायी सहस्रं
दायी ग्रामं गामी कृत्यानां कर्तृग्र
हणं किमर्थं कर्मणि माभूदिति नैत
दस्ति प्रयोजनं भावकर्मणोः कृत्याः।
विधीयन्ते तत्र कर्मण्यभिहिते कर्म
णि षष्ठी न भविष्यति अत उत्तरं पठति
२५ भव्यादीनां कर्मणोऽनभिधानात् कृ

श्री
महा
भा
३८४

त्यानां कर्तृग्रहणं भव्यादीनां कर्मकृत्यै
रनभिहिते गेयो माणवकः साम्नाम्।
भव्यादीनां कर्मणोऽनभिधानात् कृत्या
नां कर्तृग्रहणं क्रियते किमुच्यते
भव्यादीनां कर्मकृत्यैरनभिहितमिति
नेहाप्यनभिहिते भवति कथं यावताम
यावेति एवं तर्हि योगविभागः करि
ष्यते कृत्यानां प्रयोगे षष्ठी न भवति त
तः कर्तरि वेति इहापि तर्हि प्राप्नोति गे
यो माणवकः साम्नामिति उभयप्राप्ता
विति वर्तते न तूभयप्राप्तिरस्ति गेयो
माणवकः साम्नामिति च भवति गेया
नि माणवकेन सामानीति च भवति
उभयप्राप्तिर्नाम भवति यत्रोभयोः प्र
सङ्गः अत्र च यदा कर्मण्यभिहितता
तेरि यदा कर्तरि तदा कर्मणि च ॥ ॥
इति श्रीमद्भगवत्पतञ्जलिमुनिविरचि
ते व्याकरणमहाभाष्ये द्वितीयस्याध्या
यस्य तृतीयपादे तृतीयमाह्निकं ॥ ॥
पादस्तृतीयः ॥ ॐ द्विगुः किमर्थमिदमु
च्यते प्रत्यधिकरणवचनायतेः साया
सामानाधिकरण्याद्विगोरेकवचन

विधानं प्रत्यधिकरणं वचनानामुत्पत्तिर्भ
वति किमिदं प्रत्यधिकरमिति अधिका
रणमधिकरणं प्रति प्रत्यधिकरणं संख्या
सामानाधिकरण्याच्च संख्या च बह्वर्थात
या सामानाधिकरण्यं प्रत्यधिकरणं वच।
नोत्पत्तेः संख्यासामानाधिकरण्याद्बहु।
वचनं प्राप्नोति इष्यते चैकवचनं स्यादिति
तच्चान्तरेण यत्नं न सिध्यतीति द्विगोरेकव।
चनविधानम् एतमर्थमिदमुच्यते अस्ति
प्रयोजनमेतत् किं तर्हीति तत्रानुप्रयोग
स्यैकवचनभावो द्विगुत्वात् तत्रानुप्रयोग।
स्यैकवचनं न प्राप्नोति पञ्चमूलीयमिति
किं कारणं अद्विगुत्वात् द्विगोरेवैकव
चनमित्युच्यते न चानुप्रयोगो ऽतः सिद्धं।
तु द्विगवर्थस्यैकवद्वचनात् सिद्धमेतत्
कथं द्विगवर्थ एकवद्भवतीति वक्तव्यम्
तत्र द्विवक्तव्यम् नवक्तव्यं नेदं पारिभाषि
कस्यैकवचनस्य ग्रहणम् किं तर्हि अन्वर्थग्र।
हणमुच्यते वचनम् कस्यार्थस्य वचन
मेकवचनम् एकशेषप्रतिषेधश्च एकशे
षस्य प्रतिषेधो वक्तव्यः पञ्चमूली च पञ्चमू।
ली च पञ्चमूली पञ्चमूल्याविति नवा नामस्याने

श्री॰
महा॰
भा॰
३८५

कत्वात् नवा वक्तव्यम् किं कारणं अन्य
स्यानेकत्वात् नैव द्विगोरनेकत्वात् कस्मा।
न्न हि द्विगवर्थसमुदायस्य समाहारग्रह।
णं चन हितप्रतिषेधार्थम् न हितार्थो हि
अत्रस्य माभूत् पञ्चकपाली पञ्चकपाला
इति किं पुनरयं पञ्चकपालशब्दः प्रत्येकं
परिसमाप्यते प्रस्तादेवचोदितं परिहा।
तं च अपरग्राहेन वा समाहारैकत्वात् न
वा योगविभागो वार्थः किं कारणम् स।
माहारैकत्वात् एकोऽयमर्थः समाहारो ना
मत स्यैकत्वादेकवचनं भविष्यति इदं तु।
अप्राणितूर्यसेनाङ्गानांतत्स्वोपदान्तर।
ग्रहणं प्राणितूर्यसेनाङ्गानां तत्स्वोप।
दोऽन्तरपदग्रहणं कर्त्तव्यम् प्राण्यङ्गानोप्रा
ण्यङ्गैः तूर्याङ्गानां तूर्याङ्गैः सेनाङ्गानां से
नाङ्गैरिति किं प्रयोजनं अतिकरो माभूदि
ति ततो द्विवक्तव्यम् नवक्तव्यं योगविभा।
गात्सिद्धं योगविभागः करिष्यति प्राण्य
ङ्गानाम् ततस्तूर्याङ्गानां ततः सेनाङ्गाना।
मिति सम द्विगो योगविभागः कर्तव्यः नक
र्तव्यः प्रत्येकमयं शब्दः परिसमाप्यत इति
अनुवादे इहकस्मान्न भवति वेदनकद।

कालापाः वर्धतेकठकालापाः स्थेणोः
स्थेणोः मिमिवक्तम् एकमपितिष्ठंत्कठ
कालापाद्दैत्यत्रापिप्राप्नोति अध्ययनयोश्चे
तिवक्तव्यं उदगाः कठकालापं प्रत्यष्ठात्
कठकौथुमम् उदगात्मौदपैप्पलादम् वि
शिष्टः ग्रामाग्रामाः इत्यत्रानगराणामिति।
वक्तव्यं इहमाभूत् मथुरापाटलिपुत्रं
म् उभयतश्चग्रामाणांप्रतिषेधोवक्तव्यः
शौर्यंचकेतवतंच शौर्यकेतवते जाम्ब
वशालूकिन्यौ क्षुद्रजंतवइत्युच्यते
केक्षुद्रजंतवः नकुलाजंतवः क्षुद्रजंतवः
यद्येवंयूकालिक्षं कीटपिपीलिकम् द
शमशकमितिनसिध्यतिएवंतर्ह्यन
स्थिकाः क्षुद्रजंतवः अथवायेषांस्वंशो
णितंनास्तितेक्षुद्रजंतवः अथवायेषांस
हस्रेणाञ्जलिः पूर्यतेतेक्षुद्रजंतवः अथ
वायेषांगोचर्ममात्रंराशिंहन्यमानंनपतितं न
भवतितेक्षुद्रजंतवः अथवानकुलपर्यन्ता
क्षुद्रजंतवः येषांच किमर्थः चकारः पा
त्रकार्थः येषांविरोधः शाश्वतिकस्ते
षांद्वंद्वएकवचनमेव यथास्यात् यदन्यत्
प्राप्नोतितन्माभूदिति किंचान्यत्प्राप्नोति

श्री·
महा·
भा·
३८५

पशुशकुनिद्वंद्वे विरोधिनांपूर्वविप्रतिषि
द्धं इतिवक्ष्यामि सपूर्वविप्रतिषेधेनपदि।
नवोभवति शूद्राणाम् अनिरवसितानामि।
त्युच्यते कुतोनिरवसितानाम् आर्यावर्ताद।
निरवसितानाम् कः पुनरार्यावर्तः। प्राग।
गदर्शनात् प्रत्यक्कालकवनात् द।
क्षिणेनहिमवन्तमुत्तरेणपारियात्रम् य
द्येवंकिष्किंधगब्धिकं शकयवनंशौर्य
क्रौञ्चमितिनसिध्यति एवंतर्ह्यार्यनिवा
सादनिरवसितानांकः पुनरार्यनिवासः
ग्रामोघोषोनगरंसंवाहइति एवमपिय
एतेमहान्तः संस्त्यायास्तेष्वभ्यन्तरेचण्डाला।
मृतपाश्चवसन्ति तत्रचण्डालमृतपाइतिन
सिध्यति एवंतर्हियाज्ञात्कर्मणोनिरवसि
तानां एवमपितक्षायस्कारम् रजकतन्तु।
वायमितिनसिध्यति एवंतर्हिपात्रादनि
रवसितानांयैर्भुक्तेपात्रंसंस्कारेणशुध्य
तितेनिरवसिताः गवाश्वप्रभृतिषु
यथोच्चारितंद्वन्द्ववृत्तंद्रष्टव्यं गवाश्वंगवैडकं
विभाषा वृक्षप्रकृतिः फलस्यैनावनस्प।
तिमृगपाक्षितत्क्षुद्रजन्तुधान्यतृणानाम् द
द्वेविभाषाएकवद्भवति वृक्षप्रकृतिरिति

वक्तव्यं पालवदरामलकानि वदरामल।
कम् सेना हस्त्यश्वम् हस्त्यश्वाः मवस्था।
नि प्लक्षन्यग्रोधम् प्लक्षन्यग्रोधाः मृगरु
रुपृषतं रुरुपृषताः शकुनिहंसचक्रवाकम्
हंसचक्रवाकाः व्यञ्जने पूपकालिन्तम् पा।
कालिन्ताः धान्ये व्रीहियवं व्रीहियवाः ति
लमाषम् तिलमाषाः तृणे कुशकाशम्
कुशकाशाः किंप्रयोजनम् बहुप्रकृतिरे
वयस्तत्र यथास्यात् क्रमाभूत् वदराम।
लके किंपुनरनेन याप्राप्तिः सानियम्य।
ते आहोस्विदविशेषेण किंचातः यद्यने
नयाप्राप्तिः सानियम्यते प्लक्षन्यग्रोधौ।
जातिरप्राणिनामिति नित्योद्वन्द्वैकवद्भा।
वः प्राप्नोति यथाविशेषेणानदोषोभवति
यथानदोषस्तथास्तु पशुशकुनिद्वन्द्वे वि।
रोधीनां पूर्वविप्रतिषिद्धं पशुशकुनिद्वन्द्वे ये-
षांचविरोधः शाश्वतिकः इत्येतद्भवति।
पूर्वविप्रतिषेधेन पशुशकुनिद्वन्द्वस्यावका
शः महाजोरभ्रम् महाजोरभ्राः हंसचक्र
वाकम् हंसचक्रवाकाः येषांचविरोधः
शाश्वतिकः इत्यस्यावकाशः ब्राह्मणश्र
